ISSN xxxx-xxxx

# SHARADA RESEARCH JOURNAL

**A Peer-Reviewed, Multidisciplinary Jurnal**

Volume 1 January 2026

Published by

**Research Management Cell (RMC)**

**Sharada Vidyapeeth, Mahendranagar**

Nepal Sanskrit University, Nepal

Email: sharadabidhyapeeth@gmail.com

**Sharada Research Journal**
Volume 1, January 2026

**Published by**
Research Management Cell (RMC)
Sharada Vidyapeeth
Mahendranagar, Kanchanpur
Email: sharadabidhyapeeth@gmail.com

**Sharada Research Journal** is a peer-reviewed multidisciplinary journal published by the Research Management Cell of Sharada Vidyapeeth, Mahendranagar, Kanchanpur, Nepal.

Copyright © Author(s) 2026.
ISSN xxxx-xxxx (Print)

**Layout and Cover Design:** Karan Kholala

## Editorial Board

Dr. Raj Kumar Saud
Hari Prasad Khatiwada
Shiv Lamichhane
Narayan Joshi
Ishwar Neupane

## Board of Reviewers

Mukund Lamichhane (PhD), Professor, Nepal Sanskrit University, Nepal
Binod Luitel (PhD, English Education), Professor, Tribhuvan University, Nepal
Nav Raj Pandeya (Grammar), Professor, Nepal Sanskrit University, Nepal
Khem Raj Joshi (MPhil, English Education), Nepal Open University
Purusottam Bhattarai (PhD, Jyotish), Associate Professor, NSU, Nepal
Indra Mani Rai (PhD, Education), Tribhuvan University, Nepal
Kashiraj Pandey (PhD, English), Kathmandu University, Nepal
Nirajan Bam (PhD Scholar, Development Studies), Pokhara University, Nepal
Shiba Prasad Sapkota (PhD Scholar, Management), FWU, Nepal
Dev Mani Bhattarai (PhD, Dharmashastra), Professor, NSU, Nepal
Baikuntha Prasad Ghimire (PhD, Law), Assistant Professor, NSU, Nepal
Ramesh Prasad Bhattarai (PhD, Nepali), Professor, NSU, Nepal
Raj Kumar Saud (PhD, English), Associate Professor, NSU, Nepal
Chudamani Joshi (PhD, Mathematics), Professor, TU, Nepal
Sabindra Raj Bhandari (PhD, English Literature), Tribhuvan University, Nepal

# सम्पादकीयम्

“नहि ज्ञानेन सदृशं पवित्रमिह विद्यते” इति वाक्यामृतं संश्रुत्य समधीत्यावगम्य च संसारज्ञानधाराप्रवाहे नैरन्तर्यप्रदानाय पावितविचारबीजभूतं सकलभाषामूलरूपं संस्कृतं विस्ताराय जगदेव संस्कारयितुं नेपालभूमौ नेपालसंस्कृतविश्वविद्यालयः जनिमधिगतवानिति महद्धर्षप्रकर्षस्य विषयः । “ऋते ज्ञानन्न मुक्तिः” इति वाणीबलादपि संस्कृतदीपप्रज्वालनाय वैश्विकपर्यावरणे एव महदायासः संस्कृतदासैः कृतो वर्तते । देवकालान्मनुष्यकालपर्यन्तं संस्कृतज्ञानज्योतिरविच्छिन्नरूपेण द्योतमाना विद्यते, द्योतिष्यते च भविष्यति । संस्कृतवाङ्मयस्य संस्कृतभाषायाश्च महत्त्वं कीदृगस्तीति विषयोऽपरिमेयः । भाषां विना जगद्व्यवहार एव समवरुद्धो भवति । व्यावहारिकजगति भाषाया अभावे ध्वान्तमेवानुभूयेताहरहः । दण्डिना सत्यमेव निगदितमस्ति-

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥

इत्थङ्कारं प्रागेव जगतः सुसञ्चालनाय, प्राचीनार्षपरम्पराया रक्षणाय, राष्ट्रस्य सुसंस्कृततासम्पादनाय, सुज्ञानामृतं वितर्तुं, लोककल्याणाय महायोगिनो नरहरिनाथस्य सत्सङ्कल्पेन नेत्रवेदाकाशहस्ततमे वैक्रमाब्दे (२०४३) संस्थापितोऽयं विश्वविद्यालयो मनोहरः ।

नेपालसंस्कृतविश्वविद्यालयः नैकविधक्षेत्रेषु नैकविधप्रणाल्या नैकविधप्राज्ञिकैश्च ज्ञानागारम्परिपूरयितुमजस्रं प्रयतमानो वर्तते । नेपालसंस्कृतविश्वविद्यालयान्तर्गतं शारदाविद्यापीठमनुसन्धानविधिना ग्रन्थलेखनेन, अनुसन्धानपत्रिकालेखनेन, शिक्षणेन, अन्यैश्चोपयुक्तैः कर्मभिश्च भगीरथ इव तपोनिरतं वर्तते । ज्ञानविज्ञानैः सम्बद्धानां नवीनतथ्यानामुद्धाटनाय प्रमाणितथ्यपरिष्काराय भाषासाहित्यव्याकरणकलासंस्कृतज्यौतिषादिषु पुनर्व्याख्यानाय गूढगभीरज्ञानप्रकाशनाय शारदाविद्यापीठं शारदानाम्नीं वार्षिकीमनुसन्धानपत्रिकां प्रकाशयितुकामं वर्तते । साम्प्रतं तत्पत्रिकायाः प्रथमाङ्कः पाठकानां समक्षं प्रस्तुतो वर्तते । अङ्केऽस्मिन् संस्कृतनेपाल्याङ्गलभाषावलम्बिता चतुर्दश लेखा निबद्धाः सन्ति । पत्रिकायां प्रविष्टिमधिगता लेखा विषयविज्ञैः समीक्षिताः सन्ति, तेन विज्ञसमीक्षितेति एषा पत्रिका ।

लेखावलोकनं विज्ञैः प्राथम्येन कृतं तथापि तेषां सर्वाङ्गपरीक्षणव्याख्यानप्रमाणीकरणानि लेखकाधीनानि सन्तीति सविनयं विनिवेदयामः । पाठकपक्षत आगतान् समुचितान् परिष्करणपरामर्शान् सहर्षं स्वीकरिष्यामः । अनुसन्धानपत्रिकेयं निश्छिद्राऽस्तीति वक्तुं न शक्यते । पाठका अस्या बाह्याभ्यन्तरस्वरूपं दृष्ट्वा अहोरात्रमस्मान् मार्गदर्शनं कुर्युरिति प्रार्थयामः । प्रतिपत्रिकं नवनवप्रयोगं सन्दर्शयिष्यामः त्रुटीश्च निवारयिष्याम इति विश्वसिम ।

शं करोतु शङ्करः

## Contents


1. अग्निपुराणे नाट्यचिन्तनम् 1-9
*उप प्रा. हरिलाल जोशी*
2. वैयाकरणसिद्धान्तलघुमञ्जूषारीत्या कर्तृत्वनिरूपणम् 10-16
*डा. जगन्नाथ शर्मा सापकोटा*
3. न्यायवैशेषिकदर्शनयोरभावपदार्थविमर्शः 17-25
*डा.रामप्रसाद पौडेल*
4. दर्शनशास्त्रसाहित्यशास्त्रयोः प्रस्तुतं मोक्षस्वरूपम् 26-35
*उत्तमप्रसादः खतिवडाः*
5. रीतेः काव्यात्मत्वविवेकः 36-51
*शिवराज लामिछाने*
6. संस्कृतव्याकरणे स्फोटविवेकः 52-63
*नारायण जोशी*
7. कारकान्तर्गतस्य कर्मपदार्थस्य निरूपणम् 64-72
*योगराजः कण्डेलः*
8. अभिज्ञानशाकुन्तले प्रकृतिचित्रणम् 73-84
*प्रकाश पौडेलः*
9. फलादेशे ग्रहाणामवस्थाविवेकः 85-98
*शालिग्राम ढकाल*
10. ज्योतिषशास्त्रे गण्डान्तदोषः 99-108
*ईश्वर न्यौपाने*
11. अच इति षष्ठ्यन्तम् 109-119
*मनोज भण्डारी*
12. धर्मस्वरूपविमर्शः 120-131
*विष्णु प्रसाद शर्मा*
13. ऋतुविचार खण्डकाव्यमा वक्रोक्ति 132-144
हरिप्रसाद खतिवडा
14. मुनामदन खण्डकाव्यमा पर्यावरण 145-156
रामप्रसाद खनाल
15. रससिद्धान्तका आयाम 157-168
*मनमाया के.सी.*
16. Role of Teachers and Learners in TBL 169-179
*Dr. Raj Kumar Saud*

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

# अग्निपुराणे नाट्यचिन्तनम्

उप प्रा. हरिलाल जोशी
प्राचार्यः
शारदाविद्यापीठम्, महेन्द्रनगरम्
Mail: joshiharilal12@gmail.com@gmail.com
DOI:

**सारः**

अग्निपराणं ज्ञानेन सम्बद्धान् विविधान् विषयान् प्रस्तौति, अत इदम् अग्निपुराणं समीक्षका विश्वकोषं मन्वते । अत्र काव्यशास्त्रेण सम्बद्धा विषया व्याख्याताः सन्ति । पुरातनस्य मतस्य अनुयायिनः केचन विद्वांसः काव्यशास्त्रेण सम्बद्धानां विषयाणां चिन्तकेषु ग्रन्थेषु इमं ग्रन्थं प्रथमं मन्वते । अस्य व्यासविहितत्वं तत्र ते कारणं कथयन्ति । काव्यगताया भाषायाः शैल्यादीनां तत्र वर्णितानां विषयाणां च अध्ययने तथा न नुभूयते । अत इतरे इमं सङ्कलनस्य ग्रन्थं मत्वा अत्रत्यानां विषयाणां काले काले प्रक्षेपं सूचयन्ति । अतः अस्य ग्रन्थस्य कालकर्त्रादिविषये विद्वांसो विवदमाना दृश्यन्ते । काव्यसम्बद्धानां विषयाणां मध्ये नाटकम् अत्र विषयीकृतम् अस्ति, तदर्थं च अग्निपुराणस्य ३३८ तमः अध्यायो यतमानः अस्ति । पुराणानां परिचयेन साकम् आरब्धे अस्मिन् आलेखे तदनु अग्निपुराणस्य परिचय उपस्थापितोऽस्ति । ततः अग्निपुराणस्य काव्यशास्त्रेण सम्बद्धस्य भागस्य विषयान् सूचीकृत्य अत्र नाट्यविषयप्रतिपादकम् अस्य पुराणस्य ३३८ तमम् अध्यायम् आधृत्य नाट्यविषयाः प्रतिपादिताः सन्ति । तत्र च प्रथमं नाटकलक्षणं प्रतिपाद्य नाटकप्रकारा निरूपिताः सन्ति । ततो नाटकप्रवृत्त्या साकं पूर्वरङ्गदीनां प्रतिपादनं विधाय अत्र अग्निपुराणम् आधृत्य पूर्वरङ्गस्य इतिकर्तव्यता सम्पादिता विद्यते । तदनु अग्निपुराणे वर्णितां सूत्रधारादिव्यवस्थां संसूच्य अत्र नाटकस्य आमुखव्यवस्था उपपादिता अस्ति । आमुखेषु प्रवृत्तकस्य, कथोद्घातस्य, प्रयोगातिशयस्य, इतिवृत्तस्य च निरूपणम् आलेखे विहितम् वर्तते । ततश्च अत्र अर्थप्रकृतीनाम्, चेष्टानाम्, सन्धीनां च निरूपणं विधाय अत्र नाटकस्य देशकालनिरूपणं सम्पादितम् अस्ति । एवम् अग्निपुराणे वर्णितानां सर्वेषां नाट्येन सम्बद्धानां विषयाणां प्रतिपादनं विधाय अयं लेखः उपसंहृतः अस्ति । नाटकस्य स्वरूपादीनां, तस्य विभागादीनाम्, तस्य तत्त्वादीनां च निरूपणे अग्निपुराणं क्षमत्वं भजते । परम् अत्रत्यानां विषयाणाम् अध्ययनेन नाट्येन सम्बद्धानां विषयाणाम् अपूर्णत्वं ग्रन्थे लक्ष्यते । पुस्तकालयविधिना सामग्रीसङ्कलनं विधाय निगमनपद्धत्या विषयप्रतिपादनं च कृत्वा विलिखितः अयं लेखः विश्लेषणविधिपरो वर्तते, यतो हि अत्र स्थापितानां सिद्धान्तानाम् एव अनुशीलनं विहितम् अस्ति ।

**शब्दबीजानि -** प्रवृत्तिः, पूर्वरङ्गः, सूत्रधारः, विदूषकः, अर्थप्रकृतिः, चेष्टा, सन्धिः ।

**विषयप्रवेशः**

अग्निपुराणे संसारे वर्तमानाः प्रायेण सर्वे अपि विषयाः समाविष्टाः सन्ति । अनेकेषां विषयाणां समावेशाद् इदं पुराणं विश्वकोषत्वेन व्यवह्रियमाणं वर्तते । अत्र भूगोलेन, खगोलेन, ज्योतिःशास्त्रेण, दर्शनेन, व्यवहारेण, साहित्येन, भाषया,

व्याकरणेन, उपचारपद्धत्या, वास्तुना, पौराणिकेन विषयेण, इत्याद्यैः अनेकैः विषयैः सह सम्बद्धा अनेके विषयाः उपवर्णिताः सन्ति। तस्मिन् एव क्रमे ग्रन्थकारेण अत्र काव्यशास्त्रेण सम्बद्धा विषया अपि उपस्थापिताः सन्ति। अस्मिन् पुराणे ३३७ तमाद् अध्यायाद् आरभ्य ३४८ तमम् अध्यायं यावत् काव्यशास्त्रेण सम्बद्धा विषयाः सन्ति। एवंविधे अस्य अग्निपुराणस्य काव्यशास्त्रेण सम्बद्धे एकादशभिः अध्यायैः सम्पन्ने काव्यशास्त्रीये भागे काव्यलक्षणाद् आरभ्य काव्यशास्त्रेण सम्बद्धाः प्रायेण सर्वे अपि विषया वर्णिताः सन्ति । रसानाम्, अलङ्काराणाम्, रीतीनाम्, अभिनयादीनां च निरूपणेन काव्यशास्त्रचिन्तने अग्निपुराणं स्वनाम्ना एव धन्यं सञ्जातम् अस्ति। एवंविधस्य अस्य पुराणस्य ३३८ तमः अध्यायो नाटकस्य निरूपणे प्रवृत्तो वर्तते। अस्मिन् लेखे इमम् एव अध्यायं विषयीकृत्य नाटकस्य स्वरूपादीनां निरूपणं विधीयते।

**समस्याकथनम्**

अग्निपुराणं पौरस्त्यानां विश्वकोषः अस्ति इति विदुषाम् अभिमतो वर्तते। अत्र काव्यशास्त्रेण सम्बद्धाः विषयाः अपि वर्णिताः सन्ति। छन्दसां निरूपणात् साकं समारब्धे अस्य पुराणस्य काव्यशास्त्रेण सम्बद्धे भागे अग्निपुराणेन छन्दोभिः साकं काव्यलक्षणादयः काव्यशास्त्रीयाः अनेके विषयाः निरूपिताः वर्तन्ते। तेषु विषयेषु नाट्येन सम्बद्धान् विषयान् विषयीकृत्य ग्रन्थकृता ३३८ तमः अध्यायः विरचितः अस्ति। अस्मिन् लेखे अग्निपुराणस्य ३३८ तमस्य अध्यायस्य नाट्यनिरूपणेन सम्बद्धा विषयाः समीक्षिता वर्तन्ते। अग्निपुराणेन अभिमतस्य नाट्यस्य स्वरूपादीनां समालोचनक्रमे अत्र तेन विषयेण सम्बद्धा अनेकाः समस्या उद्भाविताः सन्ति। विशेषतः अत्र निम्नसमस्ययोः समाधानार्थं यत्नो विहितो विद्यते–

क) अग्निपुराणे काव्यशास्त्रेण सम्बद्धाः के विषयाः निरूपिताः सन्ति ?

ख) अग्निपुराणेन अभिमतस्य नाटकस्य स्वरूपं तस्य भेदादिकं च कीदृशम् अस्ति ?

**उद्देश्यम्**

अग्निपुराणे लोके प्रचलितानां विविधानां विषयाणां सङ्ग्रहो वर्तते। अत इदं पुराणं पौरस्त्यानां विश्वकोषः कथ्यते। एवं विश्वकोषत्वेन सङ्कथ्यमानम् अग्निपुराणं काव्यशास्त्रेण सम्बद्धानां विषयाणां च चर्चा विहितवद् अस्ति। काव्यशास्त्रेण सम्बद्धेषु अग्निपुराणेन अभिमतेषु विषयेषु अस्मिन् लेखे नाट्यं विषयीकृतम् अस्ति। नाट्यस्य विषये अग्निपुराणेन अभिमतायाः धारणायाः अनुशीलनम् अस्मिन् लेखे विहितं वर्तते। तस्मिन् क्रमे समापतितानां समास्यानां समाधानाय अयं लेखो नितरां प्रयत्नशीलः अस्ति। विशेषतः समाधेयत्वेन अस्य लेखस्य उद्देश्यनिर्धारणम् इत्थं विहितं विद्यते-

क) अग्निपुराणे वर्तमानानां काव्यशास्त्रेण सम्बद्धानां विषयाणां सामान्यं दिग्दर्शनम्,

ख) अग्निपुराणेन अभिमतस्य नाटकस्य स्वरूपस्य तस्य भेदादीनां विषयाणां च निरूपणम्।

**अध्ययनविधिः**

अग्निपुराणं सङ्ग्रहशीलं पुराणम् अस्ति। अतः अत्र ज्ञानेन विज्ञानेन च सम्बद्धाः अनेके विषयाः प्रतिपादिताः सन्ति। काव्यशास्त्रेण सम्बद्धानां विषयाणां सङ्कलनम् अपि अनेन पुराणेन विषयीकृतम् अस्ति। अस्मिन् पुराणे काव्यशास्त्रेण सम्बद्धाः प्रायेण सर्वे अपि साधारणाः विषयाः उपस्थापिताः सन्ति। अत्र तस्य एव अग्निपुराणेन सम्बद्धस्य

काव्यशास्त्रीयस्य भागस्य नाट्येन सम्बद्धाः विषयाः अनुशीलिताः सन्ति । अस्मिन् लेखे सामग्रीणां सङ्कलनाय बाहुल्येन पुस्तकालयविधिः प्रयुक्तो विद्यते । सङ्कलितानां सामग्रीणां विश्लेषणेन अत्र समधेयत्वेन उपरि प्रतिज्ञातयोः समस्ययोः समाधानार्थं यत्नो विहितो वर्तते । अत्र अग्निपुराणं प्राथमिकसामग्रीत्वेन प्रयुक्तम् अस्ति चेत् नाट्यस्य लक्षणादिभिः सम्बद्धा अन्ये ग्रन्था लेखाश्च अत्र सहायकसामग्रीत्वेन प्रयुक्ता विद्यन्ते ।

**अग्निपुराणान्तर्गतं नाट्यम्**

अग्निपुराणं ३८२ अध्यायेषु विभक्तं पुराणम् अस्ति । इदं पुराणं विविधैः ज्ञानेन विज्ञानेन च सम्बद्धैः विविधैः विषयैः परिलसितं वर्तते । अस्य अग्निपुराणस्य ३२८ तमाद् अध्यायाद् ३४७ तमम् अध्यायं यावत् प्रायेण काव्यशास्त्रसम्बद्धा विषयाः सन्ति । छन्दोनिरूपणं त्यज्यते चेद् अपि ३३७ तमाद् अध्यायात् ३४७ तमम् अध्यायं यावद् एकादश अध्यायाः अत्र काव्यस्वरूपादीनां चर्चया काव्यकर्तॄणां मार्गनिर्देशनं कुर्वन्ति । तत्र ३३८ तमः अध्यायः नाट्यनिरूपणपरः अस्ति । तस्य नाट्यनिरूपणपरस्य अध्यायस्य अध्ययनात् प्राग् अत्र पुराणानां सामान्यं परिचयं प्रस्तुत्य अग्निपुराणस्य परिचयः उपस्थाप्यते । तदनु च अग्निपुराणस्य काव्यशास्त्रीये भागे वर्तमानानां विषयाणाम् अत्र सङ्केतः क्रियते । अनन्तरम् एव अत्र अग्निपुराणस्य ३३८ तमम् अध्यायम् आधृत्य नाट्यचिन्तनं विधीयते ।

संस्कृतवाङ्मये पुराणानां विशिष्टं स्थानं विद्यते । पौरस्त्यानां संस्कृतौ संस्कारे च पुराणानां प्रभावो दृश्यते । पुराणं पौरस्त्यानां संस्कृतेः प्राणः अस्ति, हिन्दुधर्मस्य मूलः आधारो विद्यते, इतिहासस्य च क्रोशशिला अस्ति । पुराणेषु पौरस्त्यानां श्रद्धा वेदेभ्यो न्यूना नास्ति । सर्वेषां वेदानां ज्ञाता अपि पुराणानाम् अज्ञाने विचक्षणो न मन्यते । उक्तं च – 'यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः । न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः (शास्त्री १९५९, पृ. १)' इति । पुराणेषु वर्णितान् पञ्चधा विषयान् आलम्ब्य पुराणस्य पञ्च लक्षणानि पुराणेषु एवं प्रस्तुतानि सन्ति- 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम् (व्यासः २०२९, पृ. २)' इति । एतदनुसारेण सृष्टेः, प्रलयस्य, मानवानां वंशविस्तारस्य, मन्वन्तराणाम्, ऋषिवंशानां राजवंशानां च उदारचरितानां जनानां च विषये पुराणेषु वर्णितं प्राप्यते । पुराणानि एतेषु पञ्चसु एव विषयेषु सीमितानि न सन्ति, अतः पुराणानि विषयाणां वैविध्यं प्रदर्शयन्ति ।

पुराणानां सङ्ख्या नियता अस्ति । अष्टादशसङ्ख्यकानां पुराणानां चर्चा सर्वत्र लभ्यते । पुराणानां नाम्नां निर्देशकः एकः श्लोकः प्राप्यते- 'मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् । अनापलिङ्गकूस्कानि पुराणानि विदुर्बुधाः (व्यासः २०६७, पृ. ७५)' इति । एतस्य पद्यस्य अनुसारेण मत्स्यपुराणम्, मार्कण्डेयपुराणम्, श्रीमद्भागवतपुराणम्, भविष्यपुराणम्, ब्रह्मपुराणम्, ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम्, विष्णुपुराणम्, वराहपुराणम्, वामनपुराणम्, वायुपुराणम्, अग्निपुराणम्, नारदपुराणम्, पद्मपुराणम्, लिङ्गपुराणम्, गरूडपुराणम्, कूर्मपुराणम्, स्कन्दपुराणं चेति पुराणानि अष्टादश सन्ति । एतानि अष्टादश पुराणानि प्रायेण सर्वैः विद्वद्भिः पुराणत्वेन स्वीकृतानि सन्ति । यद्यपि धार्मिकदृष्ट्या आध्यात्मिकदृष्ट्या च श्रीमद्भागवतमहापुराणस्य महत्त्वं सर्वोपरि वर्तते, तथापि ज्ञानविज्ञानदृष्ट्या अन्यानि अपि पुराणानि यथायथं वैशिष्ट्यं भजन्ते । अग्निपुराणं तेषु अष्टादशसु पुराणेषु अन्यतमं वर्तते इति तु तेषां नामनिर्देशात् स्पष्टं जातम् एव ।

अग्निपुराणं पौरस्त्यानां ज्ञानकोशो मन्यते । अग्निपुराणे वर्णितान् विविधान् विषयानाधृत्य समीक्षणं विधीयते चेद् अस्य ज्ञानकोशत्वं युक्तियुक्तं दृश्यते । अत्र वर्णिताः काव्यशास्त्रीयाः विषयाः अपि अस्य महत्त्वाख्यापने निरताः दृश्यन्ते ।

एतस्य अग्निपुराणस्य विषये पाश्चात्त्यैः विविधैः विद्वद्भिः वैज्ञानिकम् अन्वेषणं विहितम् अस्ति । 'डा. विल्सन' इत्यस्य पाश्चत्त्यस्य विदुषो मते अग्निपुराणं महत्त्वपूर्णो ग्रन्थो वर्तते । अत्र वर्णिता विषया यद्यपि प्राचीनाः सन्ति, तथापि एषां सङ्कलनं विविधेषु कालेषु जातं दृश्यते (शास्त्री १९५९, पृ. २) । मेक्डोनल इत्याख्यो विद्वान् महाभारताद् हरिवंशपुराणात् च विषयवस्तूनि गृहीत्वा रचितत्वाद् अग्निपुराणं महत्त्वहीनं मनुते (शास्त्री १९५९, पृ. २) । डा. विन्टरनित्जनामको विद्वान् पौरस्त्यवाङ्मयस्य प्रायेण सर्वेषां विषयाणां समावेशाद् अग्निपुराणं विश्वकोषं मनुते (शास्त्री १९५९, पृ. २) । अग्निपुराणे व्याकरणस्य, औषधविज्ञानस्य, शब्दकोषस्य, काव्यशास्त्रस्य, ज्योतिषस्य च विषयाः सङ्गृहीताः सन्ति । अतो भारतीयो विद्वान् वरदाचार्यः अपि अग्निपुराणं विश्वकोषं मनुते, बलदेवोपाध्यायश्च तद् एव अङ्गीकरोति (शास्त्री १९५९, पृ. २) । एवंविधानां पाश्चात्त्यानां पौरस्त्यानां च विदुषां मतपर्यालोचनेन ज्ञायते यद् अग्निपुराणे विविधेषु कालेषु विविधानां विषयाणां सङ्ग्रहः पाठकानां हितसम्पादनस्य उद्देश्येन विहितो दृश्यते। अतः स्पष्टतया अग्निपुराणं विश्वकोशं मन्तुं शक्यते।

यद्यपि पाश्चात्त्याः वेदव्यासस्य सर्वपुराणकर्तृत्वं प्रति सन्देहं कुर्वन्ति, तथापि अस्माकं पौरस्त्यपरम्परायाम् अष्टादशानां पुराणानाम् एव रचयिता वेदव्यासो मन्यते । अतः अग्निपुराणस्य च लेखको व्यास एव अस्ति । अग्निपुराणे परविद्याया अपरविद्यायाश्च चर्चा वर्तते । सर्वप्रथमम् अग्निदेवाद् वशिष्ठेन श्रुतत्वाद् अस्य नाम अग्निपुराणं जातमस्ति । उक्तं च- 'यत्तदीशानकं कल्पं वृत्तान्तमधिकृत्य च । वसिष्ठायाग्निना प्रोक्तमाग्नेयं तत्प्रचक्षते (व्यासः १९५७, पृ. १००)' इति । वशिष्ठमुखाद् व्यासेन व्यासमुखाच्च सूतेन श्रुत्वा सूतमुखाद् नैमिषारण्यक्षेत्रे शौनकादिभिः अस्य श्रवणप्रसङ्गः अग्निपुराणे एव लभ्यते (व्यासः १९५७, पृ. १) । यद्यपि अग्निपुराणस्य रचयितुः कालस्य च सम्बन्धे विमर्शस्य अनेके विषयाः सन्ति, परम् अत्र चर्चायाः विषयत्वेन तेषाम् उपस्थापनं न विधीयते। अधुना जनश्रुत्या व्यासस्य एव अग्निपुराणकर्तृत्वं स्वीक्रियते। एतेन पुराणानाम् आर्षत्वं च न व्याहन्यते। ३८३ अध्यायेषु निबद्धा ११४५७ श्लोका अग्निपुराणस्य कलेवरभूताः सन्ति। तत्र इतिहासेन, सर्गादिना, कर्मकाण्डेन, मूर्तिदेवालयानां निर्माणेन, भूगोलेन, ज्योतिषेण, युद्धविद्यया, तन्त्रविद्यया, वर्णधर्मेण, संस्कारैः, आश्रमव्यवस्थया, राजधर्मादिभिः, आयुर्वेदेन, काव्यशास्त्रेण, व्याकरणेन, योगेन, ब्रह्मज्ञानेन, अन्यपुराणवर्णितविषयैश्च सम्बद्धा अनेके विषया वर्णिताः सन्ति (शास्त्री १९५९, पृ. ७) । विविधानां विषयाणां समावेशादिदं पुराणं विश्वकोषत्वं भजमानं वर्तते । अत्र विदुषां प्रायेण समेषाम् अपि सम्मतिः दृश्यते । अनुसन्धातारः अस्य अध्ययनेन विविधानां विषयाणां ज्ञानं प्राप्नुवन्ति। अतः अस्य पुराणस्य महान् महिमा द्रष्टुं शक्यते अस्माभिः।

अग्निपुराणस्य ३३७ तमाद् अध्यायात् ३४७ तमम् अध्यायं यावद् एकादशाध्यायाः काव्यादीनां लक्षणं कुर्वन्ति। अतो विद्वांसः तान् एव एकादश अध्यायान् अग्निपुराणस्य काव्यशास्त्रेण सम्बद्धान् मन्वते। 'काव्यादिलक्षणम्' इति नाम्ना आरब्धे ३३७ तमे अध्याये काव्यनाटकादीनां अलङ्कारनिरूपणस्य प्रतिज्ञां विधाय ग्रन्थकारेण ध्वनितो वाङ्मयपार्यन्तिकानां विषयाणां सङ्केतो विहितो वर्तते । आदौ काव्यस्य परिभाषणं काव्यस्य महत्त्वप्रयोजनादीनां निरूपणं च विधाय अस्मिन् अध्याये ग्रन्थकृता गद्यकाव्यस्य सभेदं लक्षणं निरूपितम् अस्ति । पुनः अस्मिन् एव अध्याये पद्यकाव्यस्य भेदान् प्रतिपाद्य ग्रन्थकारेण महाकाव्यस्य चर्चा विस्तरेण विहिता वर्तते चेत् पद्यकाव्यस्य अन्येषां भेदानां सङ्क्षेपेण लक्षणं च विहितम् अस्ति (व्यासः १९५७, पृ. ६८६-६८८) । अग्निपुराणस्य ३३८ तमः अध्यायो नाट्यस्य निरूपणेन सम्बद्धो वर्तते । प्रथमं दृश्यकाव्यस्य भेदान् निरूप्य नाटकस्य लक्षणं तस्य प्रकारान् च ग्रन्थकृद् अत्र निरूपितवान् अस्ति । ततश्च अत्र अर्थप्रकृतीनाम्, चेष्टानाम्, सन्धीनां च निरूपणं विधाय बीजाख्याया अर्थप्रकृतेः, मुखाख्यायाः सन्धेश्च स्वरूपादीनि

निर्धारितानि विद्यन्ते। अन्त्ये च श्रेष्ठस्य नाटकस्य गुणान् निरूप्य ग्रन्थकृता अत्र नाटके प्रयोज्यानां देशकालादीनां सङ्केतः अपि विहितो वर्तते (व्यासः १९५७, पृ. ६८८-६९०)। पुनः अस्य पुराणस्य ३३९ तमे अध्याये ग्रन्थकृता शृङ्गारादीनां रसानां प्रतिपादनं विहितम् अस्ति। अत्र सप्रकारं शृङ्गारादीनां नवानां रसानां स्वरूपाणि सङ्कथ्य ग्रन्थकारः तेषां रसानां स्थायिभावानाम्, आलम्बनविभावानाम्, उद्दीपनविभावानाम्, अनुभावानाम्, व्यभिचारिभावानां च निरूपणं विहितवान् अस्ति। पुनः नायकनायिकादीनां नाटकपात्राणां लक्षणादिकं निरूप्य ग्रन्थकृता अयम् अध्यायः समाप्तिं नीतः अस्ति (व्यासः १९५७ पृ. ६९१-६९३)। अस्मिन् एव अध्याये कवेः प्रजापतिना साम्यं प्रदर्शयतः ग्रन्थकारस्य उक्तिः एवंविधा वर्तते- 'अपारे काव्यसंसारे कविरेव प्रजापतिः। यथास्मै रोचते विश्वं तथेदं परिवर्तते॥ शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्। स चेत् कविर्वीतरागो नीरसं व्यक्तमेव तत् (व्यासः १९५७, पृ. ६९१)' इति। अग्निपुराणस्य ३४० तमे अध्याये वामनेन अभिमतानां रीतीनां चर्चा वर्तते। अत्र पाञ्चाली, गौडी, वैदर्भी, लाटी इति नामभिः चतस्रो रीतयः प्रतिपादिताः सन्ति। चतसृषु प्रत्येकं रीतीनां स्वरूपस्य भेदादीनां च निरूपणेन साकम् अत्र अन्यासां भारती, आरभटी इत्यादीनां वृत्तीनां च वर्णनं ग्रन्थकृता विहितं दृश्यते (व्यासः १९५७, पृ. ६९४)। एवं च ३४१ तमे अध्याये ग्रन्थकारेण अग्निपुराणे नृत्यादौ विधेयानाम् अङ्गकर्मणां निरूपणं विहितम् अस्ति। अत्र नृत्ये नायिकाभिः कार्याणां चेष्टानां विभागं कृत्वा तेषां स्वरूपाणि च ग्रन्थकृता प्रतिपादितानि सन्ति। आङ्गिकाभिनयत्वेन अङ्गचेष्टानां निरूपणक्रमे ग्रन्थकारेण अत्र नाट्ये प्रयोक्तव्यानां सर्वेषामपि शरीरस्य अवयवानां चेष्टादयः प्रतिपादिताः विद्यन्ते (व्यासः १९५७, पृ. ६९५-६९६)। ततः सम्प्राप्तः ३४२ तमोऽध्यायो अभिनयादिनिरूपणपरो दृश्यते। अत्र ग्रन्थकारेण चतुर्विधानामेव अभिनयानां स्वरूपाणि प्रतिपादितानि सन्ति। ततोऽभिनयवशात् पुष्टिं प्राप्याणां शृङ्गारादीनां रसानां लक्षणनिरूपणेऽप्ययमध्यायो नितरां प्रयत्नशीलो दृश्यते। ततश्चास्मिन्नेवाध्याये ग्रन्थकारः अलङ्कारस्वरूपं प्रतिपाद्य तद्भेदान् निरूप्य च शब्दालङ्कारस्य नवानां भेदानां निदर्शनं कृतवानस्ति (व्यासः, १९५७ : ६९६-६९८)। ततश्च अग्निपुराणकृत् ३४३ तमे अध्याये भेदोपभेदानां निर्देशनेन अनुप्रासः, यमकम्, चित्रम्, बन्धः इत्याख्यानां चतुर्णां शब्दालङ्काराणां लक्षणं विस्तृत्या वर्णितवान् अस्ति (व्यासः, १९५७ : ६९९-७०२)। शब्दालङ्काराणां निरूपणानन्तरं अग्निपुराणस्य ३४४ तमे अध्याये ग्रन्थकृता अर्थालङ्काराः निरूपिताः वर्तन्ते। सर्वप्रथमं स्वरूपादीनां सप्तानाम् अलङ्काराणां परिगणनं विधाय स्वरूपालङ्कारभेदत्वेन उपमा, रूपकम्, सहोक्तिः, अर्थान्तरन्यासः इत्याख्याः चत्वारः अलङ्काराः उपस्थापिताः सन्ति। तेषां भेदोपभेदानां वर्णनानन्तरं विरोधमूलकानाम् अलङ्काराणां प्रतिपादनं विधाय ग्रन्थकृता हेत्वलङ्कारः अत्र सभेदं निरूपितो वर्तते (व्यासः १९५७, पृ. ७०३-७०५)। शब्दालङ्काराणाम् अर्थालङ्काराणां च पृथक् निरूपणाद् अनन्तरं ग्रन्थकृता ३४५ तमे अध्याये शब्दम् अर्थं च आश्रितानां शब्दार्थालङ्काराणां निरूपणं विषयीकृतम् अस्ति। प्रशस्त्यादीनां षण्णाम् अलङ्काराणां निरूपणेन प्रारब्धे अस्मिन् अध्याये आक्षेपध्वनेः अन्तर्गतत्वेन समासोक्तिः, पर्यायोक्तिः, अपह्नुतिः चेति त्रयाणाम् अलङ्काराणां प्रतिपादनं ग्रन्थकृता विहितम् अस्ति (व्यासः १९५७, पृ. ७०५-७०६)। अलङ्काराणां निरूपणाद् अनन्तरं ३४६ तमे अध्याये ग्रन्थकृता अग्निपुराणे काव्यगुणानां विवेको विहितो विद्यते। गुणं परिभाष्य समारब्धे अस्मिन् अध्याये काव्ये गुणानां महत्त्वं प्रतिपाद्य सभेदं गुणानां लक्षणानि प्रदर्शितानि सन्ति। अत्र सप्तानां शब्दगुणानां षण्णाम् अर्थगुणानां षण्णां च शब्दार्थगुणानां प्रतिपादनम् अस्ति (व्यासः १९५७, पृ. ७०६-७०७)। अग्निपुराणस्य काव्यशास्त्रचर्चाया अन्तिमः अध्यायः ३४७ तमः अध्यायः। अत्र ग्रन्थकृता परिहार्यत्वेन काव्यदोषा निरूपिताः सन्ति। वक्तृवाचकयोः भेदेन दोषाणां सप्तप्रकारकत्वं निरूप्य अस्मिन् अध्याये

तेषाम् एव दोषाणां लक्षणादीनि प्रतिपादितानि सन्ति। ततो दोषाणां परिहारोपायस्य कवीनां समुदाचाराणां च निरूपणेन अयम् अध्यायः समाप्तिं गतो वर्तते (व्यासः १९५७, पृ. ७०७-७१०)।

एवं छन्दोनिरूपणाद् आरभ्य ग्रन्थकारः अग्निपुराणस्य काव्यशास्त्रभागे काव्यस्य, नाटकस्य, रसानाम्, रीतेः, अभिनयस्य, नृत्यानाम्, अलङ्काराणाम्, गुणानाम्, दोषाणां च निरूपणं विहितवान् अस्ति। अत्र विषयनिरूपणाद् अपि सङ्ग्रहस्य प्रवृत्तिः आधिक्येन द्रष्टुं शक्यते।

अग्निपुराणस्य ३३८ तमः अध्यायो नाटकस्य स्वरूपादीनां वर्णनपरो विद्यते इति पूर्वम् एव उक्तम् अस्ति। इतः परम् अत्र तम् एव अध्यायम् आधृत्य नाटकस्य स्वरूपादीनि विविच्यन्ते।

'नाटयति' इत्यर्थे णिजन्ताद् नट्धातोः ण्वुल्प्रत्ययविधानेन नाटकशब्दो निष्पद्यते। काव्यस्य दृश्यभेदः प्रायेण नाटकशब्देन गृह्यते। नाटकं नाट्यं च कथ्यते। दशरूपककारो धनञ्जयः 'अवस्थानुकृतिर्नाट्यम्' (धनञ्जयः १९९४, पृ. ६) इति कथयन् अवस्थाया अनुकरणस्य नाट्यत्वं स्वीकरोति। चतुर्भिः एव अभिनयेन अनुकार्यस्य काव्ये वर्णितस्य नायकस्य धीरोदात्तादीनां गुणानाम् अनुकरणेन सारूप्यप्राप्तिः नाटकम् अस्ति। दृश्यत्वाद् नाटकं रूपं च कथ्यते। 'रूपं दृश्यतयोच्यते (धनञ्जयः १९९४, पृ. ७)' इति वचनं तत्र प्रमाणम् अस्ति। यथा दृश्यत्वेन नीलादीनां रूपत्वं स्वीक्रियते, तथैव दृश्यत्वाद् नाटकस्य च रूपत्वं स्वीक्रियते। अनुकार्यस्य अनुकर्तरि आरोपाद् इदं रूपकं च कथ्यते, यतो हि 'रूपकं तत्समारोपात् (धनञ्जयः १९९४, पृ. ७)' इति धनञ्जयस्य उक्तिः अस्ति। अग्निपुराणस्य अनुसारेण नाटकं धर्मः, अर्थः, कामः चेति त्रयाणां पुरुषार्थानां साधनस्य साधनम् अस्ति। उक्तं च अग्निपुराणे- 'त्रिवर्गसाधनं नाट्यमित्याहुः करणं च यत् (व्यासः १९५७, पृ. ६८९)।

अग्निपुराणे नाटकस्य सप्तविंशतिः प्रकाराः प्रदर्शिताः सन्ति। नाटकनिरूपणाख्ये अग्निपुराणस्य अस्मिन् ३३८ तमे अध्याये आदौ एव दृश्यकाव्यस्य प्रकाराः इत्थं प्रदर्शिताः सन्ति- 'नाटकं सप्रकरणं डिम ईहामृगोऽपि वा। ज्ञेयः समवकारश्च भवेत्प्रहसनं तथा॥ व्यायोगभाणवीथ्यङ्कत्रोटकान्यथ नाटिका। सट्टकं शिल्पकः कर्ण एको दुर्मल्लिका तथा॥ प्रस्थानं भाणिका भाणी गोष्ठी हल्लीशकानि च। काव्यं श्रीगदितं नाट्यरासकं रासकं तथा॥ उल्लाप्यकं प्रेङ्क्षणं च सप्तविंशतिधैव तत् (व्यासः १९५७, पृ. ६८८-६८९)'। एतस्या उक्तेः अनुसारेण नाटकम्, प्रकरणम्, डिमः, ईहामृगः, समवकारः, प्रहसनम्, व्यायोगः, भाणः, वीथी, अङ्कः, त्रोटकम्, नाटिका, सट्टकम्, शिल्पकम्, कर्णः, दुर्मल्लिका, प्रस्थानम्, भाणिका, भाणी, गोष्ठी, हल्लीशकम्, श्रीगदितम्, नाट्यरासकम्, रासकम्, उल्लाप्यकम्, प्रेङ्क्षणं चेति दृश्यकाव्यस्य सप्तविंशतिः प्रकाराः सन्ति।

सामान्या विशेषा चेति नाटकस्य द्वे प्रवृत्ती भवतः। प्रथमा सामान्या प्रवृत्तिः सर्वेषु नाटकेषु दृश्यते चेद् द्वितीया विशेषा प्रवृत्तिः केषुचिदेव नाटकेषु उपतिष्ठति। उक्तं च- 'सामान्यं च विशेषश्च लक्षणस्य द्वयी गतिः। सामान्यं सर्वविषयं विशेषः क्वापि वर्तते (व्यासः १९५७, पृ. ६८९)' इति। पूर्वरङ्गः, देशकालप्रस्तुतिः, रसाः, भावाः, विभावाः, अनुभावाः, अभिनयाः, अङ्कविभाजनम्, कार्यावस्थायाः प्रतिपादनं चेत्यादीनि सकलानां नाटकानां विषयत्वेन स्थितानि तत्त्वानि नाटकस्य सामान्याः प्रवृत्तयः सन्ति। विशेषप्रवृत्तीनां प्रयोगो विशेषावसरेषु एव जायते। अत्र अग्निपुराणस्य प्रमाणम् यथा- 'पूर्वरङ्गे निवृत्ते द्वौ देशकालावुभावपि। रसभावविभावानुभावा अभिनयास्तथा। अङ्कः स्थितश्च सामान्यं सर्वत्रैवोपसर्पणात्। विशेषोऽवसरे वाच्यः सामान्यं पूर्वमुच्यते (व्यासः १९५७, पृ. ६८९) इति।

नाटकारम्भात् पूर्वं रङ्गमञ्चे यद् विधीयते, तत् पूर्वरङ्गं कथ्यते । अग्निपुराणस्य अनुसारेण पूर्वरङ्गस्य नान्द्यादीनि द्वात्रिंशद् अङ्गानि सन्ति । तत्र इष्टदेवानां प्रणतिः, गुरुजनानां स्तुतिः, गवां ब्राह्मणानां नृपादीनां मङ्गलकामना च विधीयते । उक्तं च अग्निपुराणे- 'इतिकर्तव्यता तस्य पूर्वरङ्गो यथाविधि । नान्दीमुखानि द्वात्रिंशदङ्गानि पूर्वरङ्गके ॥ देवतानां नमस्कारो गुरूणामपि च स्तुतिः । गोब्राह्मणनृपादीनामाशीर्वादादि गीयते (व्यासः १९५७, पृ. ६८९)' इति । नाटके नान्द्याः अन्ते सूत्रधारस्य प्रवेशः कार्यते । सूत्रधारो नाटकस्य विषयादीनां सङ्केतकर्ता अस्ति । सूत्रधारो नाटककर्तुः वंशपरम्पराया गुरुपरम्परायाश्च सूचनं विधाय नाटकस्य पूर्वकथां संसूचयति । ततो नाटकस्य प्रयोजनं तत्सन्देशं च स सूत्रवाक्यैः विदधाति । कथयति अग्निपुराणम् अत्र- 'नान्द्यन्ते सूत्रधारोऽसौ रूपकेषु निबध्यते । गुरुपूर्वक्रमं वंशप्रशंसा पौरुषं कवेः । सम्बन्धार्थश्च काव्यस्य पञ्चैतानेष संसृजेत् (व्यासः १९५७, पृ. ६८९)' इति । सूत्रधारो नटीविदूषकयोः पारिपार्श्विकस्य वा साहाय्येन एतान् विषयान् सङ्केतयति । नट्या विदूषकेण पारिपार्श्विकेन वा चमत्कृतिपूर्णै रमणीयैः वाक्यैः संवादं विधाय सूत्रधारो नाटकस्य आरम्भे विषयादीनां सङ्केतनं करोति । अयं संवादः आमुखं प्रस्तावना वा कथ्यते । अग्निपुराणवचनमत्र एवमस्ति- 'नटी विदूषको वापि पारिपार्श्विक एव वा । सहिताः सूत्रधारेण संलापं यत्र कुर्वते ॥ चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुख्यं तत्तु विज्ञेयं बुधैः प्रस्तावनापि सा (व्यासः १९५७, पृ. ६८९) इति । नाटकस्य बीजम् आधृत्य आमुखस्य प्रवृत्तकम्, कथोद्घातः, प्रयोगातिशयः चेति त्रयो भेदाः सन्ति । उक्तम् अस्ति अग्निपुराणे- प्रवृत्तकं कथोद्घातः प्रयोगातिशयस्तथा । आमुख्यस्य त्रयो भेदा बीजांशेषूपजायते (व्यासः १९५७, पृ. ६८९) इति ।

यत्र सामयिकं चरित्रम् आश्रित्य सूत्रधारो विषयादिकं वर्णयति, वर्णनस्य समकालम् एव सम्बद्धानां चरित्राणां प्रवेशश्च रङ्गमञ्चे भवति, तत्र प्रवृत्तकं नाम आमुखं जायते । उक्तं च अस्ति अग्निपुराणे- 'कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत् । तदाश्रयस्य पात्रस्य प्रवेशस्तत्प्रवृत्तकम् (व्यासः १९५७, पृ. ६८९) इति । यत्र सूत्रधारस्य वाक्यं वाक्यार्थं वा पुनः उच्चारयतः पात्रस्य प्रवेशो विधीयते, तत्र कथोद्घाताख्यम् आमुखं सम्भवति । उक्तं च अग्निपुराणे- सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव वा । गृहीत्वा प्रविशेत्पात्रं कथोद्घातः स उच्यते (व्यासः १९५७, पृ. ६८९)' इति । यत्र च सूत्रधारः विषयाणां सङ्केतनादिकं विधाय स्वकर्तव्यस्य समाप्तिं कृत्वा निष्क्रामति, तदनन्तरं नाटकस्य पात्राणां प्रवेशो भवति, तत्र प्रयोगातिशयाभिधम् आमुखं भवति । उक्तं च- 'प्रयोगेषु प्रयोगं तु सूत्रधृग्यत्र वर्णयेत् । ततश्च प्रविशेत्पात्रं प्रयोगातिशयो हि सा (व्यासः १९५७, पृ. ६८९)' इति ।

इतिवृत्तं नाटकस्य कथावस्तु वर्तते । एतद् नाटकस्य शरीरम् उच्यते । अस्य च सिद्धम् उत्प्रेक्षितं चेति भेदद्वयं वर्तते । शास्त्रादिभ्यो गृहीतम् इतिवृत्तं सिद्धं कथ्यते चेत् कविकल्पनया प्रसूतम् इतिवृत्तम् उत्प्रेक्षितं कथ्यते । अत्र अग्निपुराणेन अभिहितं वर्तते यत्- 'शरीरं नाटकादीनामितिवृत्तं प्रचक्षते । सिद्धमुत्प्रेक्षितं चेति तस्य भेदावुभौ स्मृतौ । सिद्धमागमदृष्टं च सृष्टमुत्प्रेक्षितं कवेः (व्यासः १९५७, पृ. ६८९-६९०) इति ।

अर्थस्य अभिप्रायस्य प्रकृतिः उपायः अर्थप्रकृतिः अस्ति । अतो नाटकस्य फलप्राप्तेः उपायाः अर्थप्रकृतिशब्देन अभिधीयन्ते । बीजम्, विन्दुः, पताका, प्रकरी, कार्यं चेति पञ्च अर्थप्रकृतयो नाटके भवन्ति । अर्थप्रकृतीनां फलरूपाः चेष्टाश्च आरम्भः, यत्नः, सद्भावः, नियताप्तिः, फलागमः चेति पञ्च एव सन्ति । अर्थप्रकृतीनां चेष्टाभिः सन्धायकानि सन्धयश्च मुखम्, प्रतिमुखम्, गर्भः, विमर्शः, निहरणं चेति पञ्च एव विद्यन्ते । एतस्मिन् विषये अग्निपुराणे अभिहितं वर्तते यत्- 'बीजं विन्दुः पताका च प्रकरी कार्यमेव च । अर्थप्रकृतयः पञ्च पञ्च चेष्टा अपि क्रमात् । प्रारम्भश्च प्रयत्नश्च प्राप्तिः सद्भाव एव च । नियता

च फलप्राप्तिः फलायोगश्च पञ्चमः ॥ मुखं प्रतिमुखं गर्भो विमर्शश्च तथैव च । तथा निहरणं चेति क्रमात् पञ्चैव सन्धयः (व्यासः १९५७, पृ. ६९०)' इति । बीजं नाटकस्य तत् स्थलम् अस्ति, यत्र कथावस्तुनः स्वल्पः सङ्केतः विधीयते । तेन सङ्केतेन दर्शका नाटकस्य समग्रमपि कथावस्तु अनुमातुं शक्नुवन्ति । अग्निपुराणमत्र कथयति- 'अल्पमात्रं समुद्दिष्टं बहुधा यत्प्रसर्पति । फलावसानं यच्चैव बीजं तदभिधीयते (व्यासः १९५७, पृ. ६९०)' इति । बीजं चमत्कृतेन अर्थेन, रसादिना च उपस्थाप्यते । बीजे नाटकेन सम्बद्धस्य कथावस्तुनः अनुकृतिस्थलं मुखसन्धिः अस्ति । कथितम् अस्ति अग्निपुराणे- 'यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा । काव्ये शरीरानुगतं तन्मुखं परिकीर्तितम् (व्यासः १९५७, पृ. ६९०)' इति । अभीष्टस्य कथावस्तुनो निबन्धनम्, कथाया अक्षीयमाणत्वम्, अभिनयादिना नाटकस्य आनन्दमयत्वम्, गोपनीयानां वस्तूनां गोपनम्, आख्यानस्य आश्चर्येण कथनम्, प्रकाशनीयानां वस्तूनां प्रकाशनं चेति नाट्यविषया मुखसन्धौ एव सङ्केतनीयाः । एवं यत्र न विधीयते, तद् नाटकम् अङ्गहीनो जन इव शोभाहीनं भवति । उक्तं च- 'इष्टस्यार्थस्य रचना वृत्तान्तस्यानुपक्षयः । रागप्राप्तिः प्रयोगस्य गुह्यानां चैव गूहनम् । आश्चर्यवदभिख्यातं प्रकाशानां प्रकाशनम् । अङ्गहीनो नरो यद्वन्न श्रेष्ठं काव्यमेव च (व्यासः १९५७, पृ. ६९०) इति । बीजस्य मुखसन्धेश्च स्वरूपप्रदर्शनानन्तरं बिन्द्वादीनां प्रतिमुखादीनां निरूपणं च यत् कर्तव्यम् आसीत्, तद् अग्निपुराणे विहितं न दृश्यते । इतः परं देशकालादीनां निरूपणेन ग्रन्थकारो नाटकेन सम्बद्धम् इमम् अध्यायं समाप्नोति ।

काम् अपि कथां देशकालयोः अभावे नाटककर्ता निबद्धुं न शक्नोति । अतो यथानियमं नाटकेषु देशकालयोः उपनिबन्धनं कार्यम् । उक्तम् अस्ति अग्निपुराणे- 'देशकालैर्विना किञ्चिन्नेतिवृत्तं प्रवर्तते । अतस्तयोरुपादानं नियमात्पदमुच्यते (व्यासः १९५७, पृ. ६९०)' इति । अत्र अग्निपुराणे नाटके प्रयोज्ययोः देशकालयोः सङ्केतः अपि विहितः अस्ति । अग्निपुराणस्य अनुसारेण नाटके भारतवर्षेण सम्बद्धानाम् एव देशानां प्रयोगो विधेयः, कालश्च सत्येन त्रेतया द्वापरेण वा सम्बद्धः प्रयोज्यः । देशकालयोः सम्यग् उपाख्यानेन विना दर्शकानां मनसि रसस्य अनुभूतिः नियमेन न जायते, तेन देशकालयोः सम्यग् निबन्धनेन एव नाटकम् उत्कर्षं प्राप्नोति । अत्र अग्निपुराणं ब्रूते- 'देशेषु भारतं वर्षं काले कृतयुगत्रयम् । नर्ते ताभ्यां प्राणभृतां सुखदुःखोदयः क्वचित् (व्यासः १९५७, पृ. ६९०)' इति । नाटकस्य अङ्के सृष्ट्या सम्बद्धानां विषयाणां निबन्धनं च अग्निपुराणं दोषं न मनुते । अग्निपुराणे अभिहितम् अस्ति- 'सर्गे सर्गातिवार्ता च प्रसज्जन्ती न दुष्यति (व्यासः, १९५७ : ६९०)' इति ।

एवं नाटकेन सम्बद्धानां विविधानां विषयाणां प्रतिपादनेन नाटकनिरूपणाख्यः अयम् अग्निपुराणस्य ३३८ तमः अध्यायः अत्र एव समाप्तिं गच्छति । इतः अधिकाः अपि नाटकेन सम्बद्धाः अनेके वर्णनीयाः विषयाः सन्ति परम् अस्मिन् अध्याये ग्रन्थकारः तान् विषयान् न विषयीकरोति । अतः अध्यायः अयम् अपूर्ण इव प्रतीयते ।

उपसंहारः

ज्ञानेन विज्ञानेन च सम्बद्धाः अनेके विषयाः अग्निपुराणे समाविष्टाः सन्ति । तेन अग्निपुराणं विश्वकोषत्वेन व्यवह्रियते । अत्र काव्यशास्त्रेण सम्बद्धा विषया अपि अन्तर्हिता विद्यन्ते । ३३७ तमाद् अध्यायात् ३४७ तमम् अध्यायं यावद् अग्निपुराणं काव्यशास्त्रीयाणां विषयाणां चर्चां करोति । तेषु ३३८ तमे अध्याये नाटकेन सम्बद्धा विषया उपवर्णिताः सन्ति । नाटकस्वरूपस्य, विभागानाम्, तत्त्वानाम्, नटीविदूषकयोः, आमुखादीनाम्, कथावस्तुनः, अर्थप्रकृतीनाम्, चेष्टानाम्, सन्धीनाम्, देशकालयोश्च प्रतिपादनम् अग्निपुराणेन नाटकनिरूपणपरे अस्मिन् अध्याये विहितम् अस्ति । यद्यपि नाटकेन

सम्बद्धानां विविधानां विषयाणां समावेशः अग्निपुराणस्य अस्मिन् ३३८ तमे अध्याये वर्तते, तथापि अयम् अध्यायः अपूर्ण इव प्रतीयते। अत्र अर्थप्रकृतीनां सन्धीनां च विभागस्य निरूपणाद् अनन्तरं बीजाख्याया अर्थप्रकृतेः, मुखाख्यायाः सन्धेश्च सम्यक् प्रतिपादनं विहितम् अस्ति, परं बिन्द्वादीनाम् अर्थप्रकृतीनां प्रतिमुखादीनां सन्धीनां च विषये ग्रन्थो मौनम् आकलयति। पुनः देशकालयोः निरूपणेन असौ अध्यायः समाप्तिं गतः अस्ति। इतः परम् अन्येषु अध्यायेषु नाटकेन सम्बद्धानाम् एव अभिनयादीनां निरूपणसम्बद्धाः प्रसङ्गाः प्राप्यन्ते, परं ततो वियोजितानां विषयाणां योगः कुत्रापि न प्राप्यते। यद्यपि नाटकनिरूपणे अग्निपुराणस्य पूर्णत्वं न दृश्यते, तथापि काव्यशास्त्रेण सम्बद्धानां विविधानां विषयाणां प्रस्तुत्या अयं ग्रन्थः काव्यशास्त्रनिरूपकाणां ग्रन्थानां पङ्क्तौ स्वकीयां दृढाम् उपस्थितिं प्रदर्शयति।

**सन्दर्भग्रन्थसूची**

धनञ्जयः (सन् १९९४), दशरूपकम्, द.सं., मेरठ : साहित्य भण्डार।

व्यासः (वि.सं. सन् १९५७), अग्निपुराणम्, प्र.सं., कोलकाता : गुरुमण्डल सिरिज।

व्यासः (वि.सं. २०६७), श्रीमद्देवीभागवतमहापुराणम् (सानुवादः), प्र. ख., गोरखपुर : गीताप्रेस।

व्यासः (वि.सं. २०२९), कूर्मपुराणम्, प्र.सं., वाराणसी : सर्वभारतीय काशीराजन्यासमण्डलम्।

शास्त्री, रामलाल वर्मा (सन् १९५९), अग्निपुराण का काव्यशास्त्रीय भाग, प्र.सं., दिल्ली : नेशनल पब्लिशिङ्ग हाउस।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**वैयाकरणसिद्धान्तलघुमञ्जूषारीत्या कर्तृत्वनिरूपणम्**

डा. जगन्नाथ शर्मा सापकोटा
सहप्राध्यापकः
महेशसंस्कृतगुरुकुलम्, देवघट्टः
Gmail: jagannathsharma9847@gmail.com
DOI:

**लेखसारः**

वैयाकरणसिद्धान्ते द्वितीयादिविभक्तयः द्विविधाः– उपपदविभक्तयः, कारकविभक्तयश्चेति। प्रथमा तु सर्वत्र कारकविभक्तिरेव। तत्र समीपस्थपदनिमित्तकाः विभक्तय उपपदविभक्तयः । एवं कारकत्वव्याप्यकर्मत्वादिनिमित्तकाः विभक्तयः कारकविभक्तयः। तत्र कर्मत्वं नाम किम्, कर्तृत्वं नाम किमिति विचारावसरे नैकानि मतानि बुद्धिपथमारोहन्ति। तन्त्रान्तरावलम्बिनः स्वीयरीत्या कर्तृत्वमुपस्थापयन्ति। वैयाकरणेष्वपि दीक्षितादिप्रभृतयोऽन्यथैव तद् वर्णयन्ति। नागेशभट्टाश्च फणिभाषितभाष्याब्धेः समुद्धृत्य स्वीयमेव सिद्धान्तं प्रतिपादयन्ति। तदेवाश्रित्य लेखेऽस्मिन् सर्वादौ सामान्यतः कर्तृसंज्ञासूत्रं व्याख्याय तत्र सूत्रे स्वातन्त्र्यं कीदृशं गृह्यते इति प्रतिपादनपुरस्सरमेतद्विषये दीक्षितादीनां मतं नैयायिकादीनां मतं नागोजिभट्टानां मतञ्चोपस्थाप्य भाष्यारूढः सिद्धान्तः क इति सविस्तरं प्रतिपाद्यते। किञ्च तैस्तैराचार्यैः तत्तन्मतानाश्रयणे किं बीजमित्यपि लेखेऽस्मिन् समुपगुम्फितं वर्तते । अत्रैतावान् निष्कर्षः, कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वं कर्तृत्वमिति दीक्षितादयः, तत्तत्क्रियानुकूलकृत्याश्रयत्वं तत्त्वमिति नैयायिकाः, तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमेव वेह तत्वम्भाष्यतः तथैव लाभादिति नागेशः।

**विषयपरिचयः**

"स्वतन्त्र: कर्ता" (अष्टाध्यायी १।४।५१॥) इति सूत्रमिदं पाणिन्यष्टके प्रथमाध्याये चतुर्थपादे चतुष्पञ्चाशत्तमं भवति । स्वं तन्त्रं यस्य सः स्वतन्त्रः इति बहुव्रीहिसमासः। स्वप्रदान इति एतदर्थः। तथा च कारकाधिकारात्क्रियाजनने य: प्रधान: स: कर्ता इति सूत्रार्थो भवति। तत्र प्राधान्यञ्च विवक्षाभेदेन सम्भवति। तथा चोक्तं हरिणा-

धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते।।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥(भर्तृहरि.सन् २०२३, ३।७।९१) इति।

तथा चोक्तं मनोरमायामपि कारकप्रकरणे 'अयं भाव:-' इत्यादिना- कारकत्वं तद्व्याप्यकर्तृत्वादिषट्कं च वस्तुविशेषे विशेषणविशेष्यभाववन्न व्यवतिष्ठते। न हि गौस्सर्वं प्रति गौरेव न तु किंचित्प्रत्यगौरितिवद् विशेषणं विशेषणमेवेति सुवचम् । तथा च कयाचिद् धातुव्यक्त्या उपस्थापितेऽर्थे क: कर्ता प्रश्ने प्रकृतव्यक्त्युपात्तव्यापाराश्रयतया विवक्षितः कर्ता इति॥

तथा च तण्डुलं पचति चैत्र इत्यत्र प्रकृतधातुः पचधातुः, तदर्थः - विक्लित्तिः, तदनुकूलो व्यापारश्च, तत्र व्यापाराश्रयः चैत्रो भवति एवं धात्वर्थफलाश्रयः तण्डुलो भवतीति तण्डुलस्य फलाश्रयत्वेन "कर्तुरीप्सिततमं कर्म"(पाणिनिसूत्रम्.१ ।४ ।४९॥) इति सूत्रेण धात्वर्थव्यापारजन्यफलशालित्वं कर्मत्वमिति कर्मसंज्ञायां कर्मणि द्वितीया"(पाणिनिसूत्रम्.२ ।३ ।२॥) इति सूत्रेण द्वितीयाविभक्तौ तण्डुलमिति । धात्वर्थव्यापाराश्रयत्वेन चैत्रस्य कर्तृसंज्ञायां "कर्तृकरणयोस्तृतीया"(पाणिनिसूत्रम्.२ ।३ ।१८॥) इति सूत्रे अनभिहिते तृतीया इत्युक्तत्वेन अत्र तिप् प्रत्ययेन कर्तुः अभिहितत्वेनाभिहिते तु प्रथमैव इति प्रथमाविभक्तौ चैत्रस्तण्डुलं पचतीति । तथा च कारकाधिकारसामर्थ्यात्स्वतन्त्रपदबलाच्च सामान्यत: प्रकृतधात्वर्थव्यापारजनने य: प्रधान: स: कर्ता इत्यर्थोऽत्र शब्दलभ्य: । विस्तरस्त्वग्रे प्रतिपाद्यते ।

**लेखसमस्या:**

वैयाकरणसिद्धान्तमञ्जुषारीत्या कर्तृत्वस्वरूपप्रतिपादनाय प्रस्तुतेऽस्मिन् लेखे लेखोपस्थापनात्पूर्वं समुपस्थिता: समस्या: निम्नाङ्किता: वर्तन्ते-

क) "स्वतन्त्र: कर्ता" इति शास्त्रोपस्थापितं स्वातन्त्र्यं कीदृशम् ?

ख) कर्तृसंज्ञाप्रयुक्ततृतीयाविभक्तेर्थ: क: ?

ग) कर्तृत्वस्वरूपनिर्णयावसरे भाष्यानुगृहीत: सिद्धान्त: क: ?

घ) विषयेऽस्मिन् भर्तृहरिप्रभृतीनां दर्शनान्तरीयानाञ्च किं मतम् ?

**लेखोद्देश्यम्**

तत्र भवान्पाणिनि: सर्वादौ महेश्वरप्रसादादष्टकं प्रणिनाय । तामेव चाष्टाध्यायीमाश्रित्य वररुचिर्वार्तिकं प्रणिनाय, भगवान् पतञ्चलि: महाभाष्यं विरचयामास । एतत्त्रिमुनिनिगदितमेव शाब्दिकसिद्धान्तं शब्दतत्वविद्भि: शास्त्रविद्भिश्च प्रक्रियानिर्वाहाय तत्तत्पदशक्तिज्ञानाय सादरं प्रमाणत्वेन आद्रियते । स्थितेऽस्मिन्तत्रैव "स्वतन्त्र: कर्ता" इति शास्त्रबोधितकर्तृत्वशक्तिस्वरूपनिर्णयाय खण्डनमण्डनपुरस्सरं प्रस्तुतोऽयं लेख: न केवलं शाब्दिकपथानुयायिनामेवापि त्वितरेषामपि महते उपकाराय भविष्यति । अस्य च लेखस्य प्रागुक्तसमस्याया समाधानमेव प्रमुखमुद्देश्यं भवति । तथा च अधोनिर्दिष्टान्युद्देश्यानि लेखस्यास्य भवितुमर्हन्ति-

क) कर्तृसंज्ञाविधायकसूत्रोपस्थापितस्वातन्त्र्यपदार्थनिर्णय:,

ख) दीक्षितनागेशप्रभृतीनां कर्तृत्वपदार्थविचार:,

ग) कर्तृत्वलक्षणे सिद्धान्तमतोपस्थापनम्,

घ) कर्तृसंज्ञाप्रयुक्ततृतीयार्थविमर्श: ।

**अध्ययनविधि:**

प्रस्तुतशोधकार्ये सन्दर्भे विश्लेषणविधि:, तुलनात्मकविधिश्चाश्रितो विद्यते । एवं कर्तृलक्षणनिरूपणावसरे

परिष्कारात्मकविधिस्तथा सिद्धान्तप्रतिपादनावसरे तुलनात्मकविधि:, विवरणात्मकशैल्या समीक्षणात्मकश्च विधि: समाश्रितो वर्तते।

**सामग्रीसङ्कलनप्रस्तुतिः**

'वैयाकरणसिद्धान्तलघुमञ्जूषारीत्या कर्तृत्वनिरूपणम्' इत्याख्येऽस्मिन्विषये प्रस्तुतशोधकार्यस्य सम्पादनाय विशेषतः नागेशभट्टविरचितशेखरलघुमञ्जूषे समाश्रिते वर्तेते, तथा तद्व्याख्यानग्रन्थानाञ्च लेखसामग्रीरूपेण सङ्कलनं कृतं वर्तते । एवमेव श्रीमद्भट्टोजिदिक्षितकृतप्रौढमनोरमा, तट्टीकाभूतं शब्दरत्नं, वाक्यपदीयम्, प्रदीपोद्योतसहितमहाभाष्यम्, काशिकादिग्रन्थाश्चात्र लेखे सहायकरूपेणोपयुक्ता: वर्तन्ते।

**विषयप्रवेशः**

सप्तसु विभक्तिषु "कर्तृकरणयोस्तृतीया" (पाणिनिसूत्रम्.२ ।३ ।१८॥) इति शास्त्रबलात्कर्तृत्वं करणत्वञ्चार्थः । तत्र कर्तृत्वं नाम "स्वतन्त्रः कर्ता" इति शास्त्रबोधितकर्तृत्वशक्तिमत्वम्, तच्च स्वातन्त्र्यसमनियतम् । तथा च स्वातन्त्र्यमर्थात्कर्तृत्वं नाम किमिति विचारे न तावत्सामान्यतः व्यापाराश्रयत्वं कर्तृत्वमिति वक्तुं शक्यम्, सर्वेषामपि कारकाणां स्वस्वव्यापारद्वारा प्रधानक्रियानिष्पादकत्वमिति स्वव्यापारमादाय सर्वेषामपि कर्तृत्वं स्यादिति लक्षणमिदमव्यावर्तकं स्यात् । एवं तर्हि प्रकृतधात्वर्थव्यापाराश्रयत्वं कर्तृत्वम्, सर्वेषां कारकाणां व्यापाराश्रयत्वेऽपि न तद्गतव्यापारः सर्वोऽपि धातुवाच्य इति न पूर्वोक्तदोषः । यदा तु तद्गतव्यापारस्य धात्वर्थत्वं विवक्ष्यते, तदा तस्य कर्तृत्वमिष्यत एव, साध्वसिश्छनत्तीति यथा । तथा ह्युक्तम् – "धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते"।।

यद्गतव्यापारः धातुनोच्यते सः कर्तेति तात्पर्यमिति चेदेवमपि अग्नेर्माणवकं वारयतीत्यत्र उत्तरदेशसंयोगानुकूलव्यापारः माणवकनिष्ठः धातुवाच्य इति तदाश्रयत्वेन माणवकस्य कर्तृत्वापत्तिरतः प्रधानीभूतधात्वर्थव्यापाराश्रयत्वं कर्तृत्वमिति वक्तव्यम्, तत्र प्रधानीभूतत्वञ्च तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वे सति तद्धात्वर्थत्वम् । तथा हि देवदत्तः पचतीत्यत्र विक्लित्यनुकूलव्यापारः तद्धात्वर्थः, तन्निष्ठविशेष्यतानिरूपितप्रकारता विक्लित्तिनिष्ठा तदाश्रयत्वमोदनस्य तदनाश्रयत्वं देवदत्तस्येति लक्षणसमन्वयः । अग्नेर्माणवकं वारयतीत्यत्र माणवकव्यापारस्योक्तप्राधान्याभावेन न दोषः । नन्वत्र धात्वर्थनिष्ठप्रकारतानिरूपकधात्वर्थाश्रयत्वम्, विशेष्यताश्रयधात्वर्थत्वमित्येव वा सिद्धे प्रकारतानाश्रयत्वनिवेशो किमर्थ इति चेत्तत्र चित्रिप्रभाकाराः– "अजां ग्रामं नयति"इत्यत्राजायाः कर्तृत्ववारणार्थमेतत् । तथा हि उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारो नयतेरर्थः । तत्र उत्तरदेशसंयोगो धात्वर्थः,तन्निष्ठा प्रकारता तन्निरूपकधात्वर्थः तदनुकूलव्यापारः, तदाश्रयत्वमजाया इति तस्य कर्तृत्वापत्तिर्दोषः । एवमेव विशेष्यताश्रयधात्वर्थत्वं तत्त्वमिति मतेऽपि उत्तरदेशसंयोगनिरूपितविशेष्यता तदनुकूलव्यापारनिष्ठा तदाश्रयत्वमजायामिति दोषः, अतः प्रधानीभूतत्वमुपदर्शितरीत्यैव वक्तव्यमित्याहुः।

वस्तुतस्त्वस्त्वत्र कर्तृत्वप्राप्तिस्तथापि प्रधानीभूतव्यापारजन्यधात्वर्थफलाश्रयतया कर्मत्वान्न दोषः । न च परत्वादन्तरङ्गरत्वाच्च कर्तृसंज्ञैव प्राप्नोतीति वाच्यम्, "हेतुमति च" (पाणिनिसूत्रम्. ३ ।१ ।२६॥) इतिसूत्रस्थभाष्यरीत्या प्रधानकार्यस्य सर्वतो बलबत्त्वात्कर्मत्वस्यैव प्रवृत्तेः । अत एव च गतिबुद्धिसूत्रस्य

नियामकत्वं प्रतिपादितं ग्रन्थकृद्भिः । तथा चेदमत्र प्रयोजनं वक्तव्यम्– पच्यते तण्डुलः स्वयमेवेति । अत्र विक्लित्तिमात्रं धात्वर्थः । तथाह्युच्यते–"धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति । यन्निष्ठव्यापारः धातुनोच्यते सः कर्तेति विवक्षितार्थः । तथाचेह कर्मण एव कर्तृत्वेन विवक्षणात्तन्निष्ठा विक्लित्तिरेव धात्वर्थः । एवञ्च धात्वर्थनिष्ठप्रकारतानिरूपकधात्वर्थाश्रयत्वम्, विशेष्यताश्रयधात्वर्थत्वमित्येवोक्तौ एकस्मिन्विशेष्यताप्रकारतयोरसम्भवेन स्वस्य स्वनिरूपकत्वाभावेन चेह तण्डुलस्य कर्तृत्वं न स्यादतः प्रधानीभूतत्वमिह तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वरूपं विवक्षणीयमिति । तदुक्तौ तु एकस्यां विक्लित्तौ विशेष्यताया अभावान्न तन्निरूपितप्रकारताऽपीति तदनाश्रयत्वरूपं तत्वमस्त्येवेति भावः ।

तथा चेदानीं कर्तृलक्षणमस्ति– तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयो यस्तद्धात्वर्थः, तदाश्रयत्वमिति । अत्र विशेषणदलाभावे विशेष्यदलाभावे वा 'रूपवन्तं गच्छति' इत्यत्र दोषः स्यादतो दलद्वयनिवेशनम् । तथाहि प्रथमदलाभावे तद्धात्वर्थाश्रयत्वमित्येवोक्तौ उत्तरदेशसंयोगरूपतद्धात्वर्थाश्रयत्वेन रूपवतः कर्तृत्वापत्तिः, उक्ते तु तस्मिन्नुत्तरदेशसंयोगस्य तद्धात्वर्थत्वेऽपि नोक्तं प्राधान्यमिति न तदाश्रयस्य रूपवतः कर्तृत्वमिति भावः । तथैव द्वितीयदलानिवेशेऽपि तत्रैव दोषः । तथा हि तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयो यः, तदाश्रयत्वमित्येवोक्तौ तद्धात्वर्थः उत्तरदेशसंयोगानुकूलव्यापारः, तन्निष्ठविशेष्यतानिरूपितप्रकारता विक्लित्तिनिष्ठा तदनाश्रयत्वं यथा व्यापारे तथा रूपेऽपि तदाश्रयत्वं रूपवत इति पुनर्दोषः, द्वितीयदलनिवेशे तु रूपं न धात्वर्थ इति न दोषः । एवमपि 'पक्वस्तण्डुलो देवदत्तेन' इत्यत्र तण्डुलस्य कर्तृत्वं प्राप्नोति । तथा हि "सार्वधातुके यक्" इति भाष्यरीत्या कर्मप्रत्ययसमभिव्याहृतिदशायां फलमेव प्रधानं भवति । तथा चेह विक्लित्तेः प्राधान्यात्तदाश्रयत्वेन तण्डुलस्य कर्तृत्वं प्राप्नोति । अतः लक्षणे कर्तृप्रत्ययसमभिव्याहारे इत्यपि योजनीयम् । तथा च 'पक्वस्तण्डुलो देवदत्तेन'इत्यादौ कर्मप्रत्ययसमभिव्याहारदशायां फलस्य प्राधान्येऽपि 'पचति तण्डुलं देवदत्तः''पाचकः देवदत्तः तण्डुलस्य' इत्यादौ व्यापारस्यैव प्राधान्यान्न तत्रातिव्याप्तिः । तथा चैवं कर्तृलक्षणं भवति– कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वमिति । एवमपि कालिकादिसम्बन्धेन तादृशव्यापाराश्रयत्वं स्थाल्यादीनामप्यस्तीति तेषामपि कर्तृत्वापत्तिरतः तदाश्रयत्वं व्यापारतावच्छेकसम्बन्धेन विवक्षणीयम् । येन सम्बन्धेन व्यापारः कर्तरि उत्पद्यते स सम्बन्धः व्यापारतावच्छेदकसम्बन्धः । स चेह समवाय इति कालिकादिसम्बन्धमादाय न दोषः । तथा चेह सूत्रे एतादृशं स्वातन्त्र्यं विवक्षितमिति 'सामग्रीसाध्यायां क्रियायां सर्वेषां स्वव्यापारे स्वातन्त्र्यात्सूत्रे स्वतन्त्र इति अव्यावर्तकमिति' यदुक्तं तत्परास्तम्, एतादृशस्वातन्त्र्यस्य युगपत्सर्वेष्वसम्भवादिति बोध्यम् ।

ननु वैयाकरणसिद्धान्ते कृतेरपि व्यापार एवान्तर्भावात्गुरूतरभारोत्तोलनादिषु क्रियाया अनिष्पत्तावपि तदनुकूलकृतिरूपव्यापारस्य सद्भावात्तदाश्रयत्वेन प्रागुक्तकर्तृत्वं स्यादिति चेत्तत्रोच्यते– कर्तृसंज्ञाविषये सति सम्भवे कर्तृत्वशक्तिः तद्धात्वर्थकृतिव्यापारोभयाश्रयत्वसमानाधिकरणैव ग्राह्या । तथा हि देवदत्तः पचतीत्यादौ तदधिकरणवृत्तित्वरूपं धात्वर्थकृतिव्यापारसामानाधिकरण्यं देवदत्ते । अचेतनादिषु कृतेरेवासम्भवात्'स्थाली पचति'इत्यादौ स्थाल्यादेः कर्तृत्वसिद्धये सति सम्भवे इति । एवञ्च यत्र कृतिव्यापारावेकत्र सम्भवतस्तत्र तदुभयसमानाधिकरणमेव कर्तृत्वं ग्राह्यम् । तेन गुरूतरभारोत्तोलनादिषु यत्नसत्वेऽपि तत्क्रियाया अनिष्पत्या न

कर्तृत्वव्यवहारः । वस्तुतस्त्वतीन्द्रियस्य यत्नस्य कार्यानुमेयत्वन तत्क्रियाया अनिष्पत्तौ न तज्जनककृतिसत्वे मानमिति नात्र दोषप्रसक्तिरपीत्याहुः ।

तत्र प्रश्नः– ननु कृतिव्यापारोभयाश्रयत्वसमानाधिकरणैव कर्तृत्वशक्तिर्गृह्यत इति स्वीकारे 'मत्तो भूतं न तु मया कृत'मिति व्यवहारः कथम्? तथा हि कृतिसमानाधिकरणैव कर्तृत्वशक्तिर्गृह्यत इत्युक्तौ इह कर्तृत्वसद्भावदशायामपि तन्निषेधः कथमुपपद्यते । किञ्च पिष्टकभक्षणदशायां नान्तरीयकतया तन्मध्यस्थशर्कराभोजने जातेऽपि शर्कराभक्षणाश्रयत्वेन तत्कर्तृत्वापत्तिरिति ।

समाधानम्– अत्र धात्वर्थकृतिः साध्यत्वाख्यविषयतया क्रियाविषयैव ग्राह्या । तथा च साध्यत्वाख्यविषयताभिन्नविषयतावती क्रिया यस्या कृतेः,तादृशी कृतिः ग्राह्येति भावः । तथा चेह तत्क्रियायाः सद्भावेऽपि न कर्तुरिदं करोमीत्याशयः, एवमेव पिष्टकभोजनं करोमीत्येवाशयः भोक्तुः, न तु शर्कराभोजनं करोमीति इत्यतः नातिव्याप्तिः ।

प्रागुक्तस्वातन्त्र्यपदार्थे च व्यापारस्य धातुत एव लाभात्"अनन्यलभ्यः शब्दार्थः" इति न्यायेन आश्रयत्वेन कर्ता प्रत्ययार्थः । तथा च 'चैत्रः सुप्यते' इत्यत्र चैत्राभिन्नाश्रयवृत्तिः स्वाप इति बोध इति दीक्षितभूषणकारप्रभृतयः । वस्तुतस्तु सुपां द्योतकत्वस्यैव सिद्धान्तितत्वाद्द्योत्यार्थस्य च विशेषणत्वमेव न्याय्यमिति कर्तृचैत्रीयः स्वाप इति बोधः । तत्र कर्तृशब्दस्य संज्ञाशब्दत्वेन विशेषणविशेष्यभावे कामचाराच्चैत्रकर्तृकः स्वाप इति वा बोधः । वस्तुतः नागेशसिद्धान्ते विभक्तिवाच्यस्याप्यर्थस्य संसर्गताख्यविषयतया भानाङ्गीकारात्कर्तृक्रियाभावसम्बन्धेन चैत्रविशिष्टः स्वाप इति बोधः ।

अत्र नैयायिकाः– कर्तृत्वं नाम तत्तत्क्रियानुकूलकृत्याश्रयत्वम् । तथा हि कृञ्धातोः तृचि कर्तृशब्दो निष्पद्यते । तत्र कृञः तत्तत्क्रियानुकूलयत्नार्थकत्वम्, तृच आश्रयार्थकत्वमिति शब्दशक्तिलभ्योऽयमर्थः । तथा चोक्तम्–"तत्तत्क्रियानुकूलकृत्याश्रयः कर्ता । कृञ कृत्यर्थकत्वेन कृप्रकृतिकतृचा तथैव लाभादिति"॥ तत्र च "अनन्यलभ्यः शब्दार्थः" इति आश्रयस्य प्रकृत्या लाभात्कृतिमात्रं तृतीयार्थ इति ।

तत्खण्डनम्– यदि त्वमनन्यलभ्यन्यायेन कृतिमात्रार्थकत्वं ब्रूषे, तर्हि मास्तु तदर्थकतामपि । कृतेरपि धातुलभ्यतायाः सिद्धान्तितत्वात् । न चास्माकं मते कृतिः न धात्वर्थ, अपि तु प्रत्ययार्थ एवेति वाच्यम् । 'रथेन गम्यते' इत्यादावचेतनेऽसम्भवात् । न च तत्र लक्षणेति वाच्यम्, विभक्तौ लक्षणाभावस्य सर्वतान्त्रिकैः स्वीकारात् । "सुपां सुलुक्–०" (पाणिनिसूत्रम्.७ ।१ ।३९॥) इति सूत्रञ्चैतदर्थे मानम् । एवञ्च नैयायिकोक्तं तृतीयायाः कृतिमात्रवाचकत्वमयुक्तमेव । शब्दमर्यादया तदर्थलाभ इत्यप्यसंगतमेव, कृञः कृतिमात्रवाचकत्वाभावादिति बोध्यम् ।

अत्र नागेशभट्टाः– प्रधानधात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति दीक्षितोक्तमयुक्तम्, स्वतन्त्रपदस्य तत्रापरिभाषणादतः तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं, स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमेव वा तत्वम् । तथा हि कारके तथा हि "कारके" इति सूत्रभाष्यादिदं लभ्यते । तत्रेदं भाष्यम्- स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा, ननु च भोः कर्तृस्थेऽपि यत्ने कथ्यमाने स्थाली संभवनक्रियां धारणक्रियां च करोति, तत्रासौ स्वतन्त्रा । क्वेदानीं परतन्त्रा स्यात् ? एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये स्वतन्त्रा । तद्यथा - अमात्यादीनां

राज्ञा सह समवाये परतन्त्र्यं, व्यवाये स्वातन्त्र्यम् । किं पुनः प्रधानम् ? कर्ता । कथं पुनर्ज्ञायते - कर्ता प्रधानमिति ? यत्सर्वेषु साधनेषु संनिहितेषु कर्ता प्रवर्तयिता भवतीति । ।(शास्त्री, सन् २०२३,पृ.२४५)

अस्माच्च भाष्यात्प्रधानक्रियानिष्पादनसमर्थेषु सर्वेषु कारकेषु सन्निहितेष्वपि यः सर्वाणि कारकाणि प्रवर्तयति, स कर्ता इति एतदर्थः । तथा चात्र भाष्ये 'कर्ता प्रवर्तयिता भवति' इति शब्दतः तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वरूपमेव स्वातन्त्र्यं लभ्यते इति भावः । अत एवोक्तं हरिणापि–

प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तनात् ॥
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते ॥(भर्तृहरि.सन् २०२३, ३ ।७ ।१०१,१०२)

अयञ्च सर्वोऽपि कारिकाग्रन्थः एतद्भाष्यव्याख्यानपर एव । एवं 'स्वतन्त्रः कर्ता' इति सूत्रस्थं भाष्यमपीह प्रमाणम् । तथा हि तत्र भाष्यम्– किं यस्य स्वं तन्त्रं स स्वतन्त्रः ? किं चातः ? तन्तुवाये प्राप्नोति । नैष दोषः । अयं तन्त्रशब्दोऽस्त्येव विताने वर्तते । तद्यथा, - आस्तीर्णं तन्त्रम्, प्रोतं तन्त्रमिति । वितानमिति गम्यते । अस्ति प्राधान्ये वर्तते । तद्यथा, - स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते । स्वप्रधान इति गम्यते । तद्यः प्राधान्ये वर्तते तन्त्रशब्दस्तस्येदं ग्रहणम् ।(शास्त्री, सन् २०२३,पृ.२७७)

अस्माच्च भाष्यात्स्वप्रधानस्यैव कर्तृत्वमिति स्पष्टमेव लभ्यते । स्वप्रधानत्वञ्च स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमेव । तत्वञ्च प्रधानेन देवदत्तादिना समवाये तेषामेव, न स्थाल्यादेरिति नातिप्रसङ्गः । तथा च तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं, स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमेवेह स्वातन्त्र्यं गृह्यते । अत एव भाष्ये 'पाचयति चैत्रो मैत्रेण' इत्यादौ प्रयोजकसन्निधाने तदधीनत्वात्प्रयोज्यस्य तस्य कर्तृत्वं न सिद्ध्यतीति आशङ्क्य प्रागुक्तं स्वातन्यत्र्यं साधितं कर्तृसंज्ञासूत्रे । दीक्षितोक्तरीत्या तु पाचयतीत्यादौ धातुद्वयमाश्रित्य प्रयोज्ये तदुक्तस्वातन्त्र्यस्य निराबाधं सत्वेन तदनापत्तिरूपाशङ्कायाः तत्समाधानस्य च वैयर्थ्यापत्तिरिति बोध्यम् ।

**निष्कर्ष:**

"स्वतन्त्र: कर्ता" इति शास्त्रबलात्स्वातन्त्र्यं कर्तृत्वसमनियतमिति तु सर्वसिद्धं मतम् । परं किं नाम स्वातन्त्र्यमिति विचारावसरे बहूनि मतानि परिदृश्यन्ते । तत्र दीक्षितेन्द्रैः पारिभाषिकं स्वातन्त्र्यमिह गृहीतम् । तच्च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वरूपम्, नागेशभट्टास्तु सूत्रे स्वतन्त्रपदसत्वात्प्रसिद्धार्थकत्वेनापि तस्य सर्वेष्टसिद्धेः पारिभाषिकस्वातन्त्र्यग्रहणे न मानम् । भाष्यकारा अपि मदुक्तार्थे एवानुकूला इति प्राधान्यलक्षणं स्वातन्त्र्यं स्वीकुर्वन्ति । तच्च तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं वा । इदञ्चोभयमपि स्वातन्त्र्यं प्रयोजकसन्निधाने प्रयोज्यस्याप्यस्त्येव । यदि हि प्रयोज्य: परतन्त्र: स्यात्तदा करणादिरिव सर्वथा कुर्यादेव, अयन्तु कदाचिन्न करोत्यपि । तेन ज्ञायते प्राधान्यमिदं प्रयोजकसन्निधाने प्रयोज्यस्यापि अस्त्येवेति । इदन्त्वत्रावधेयम्–दीक्षितोक्तस्वातन्त्र्याङ्गीकारेऽपि न कश्चिल्लक्ष्यदोषः, तथापि पूर्वोक्तरीत्या सूत्राक्षरमर्यादया कारकेसूत्रस्थभाष्यात्कर्तृसंज्ञासूत्रस्थभाष्याच्च

नागेशाभिमतस्वातन्त्र्यमेव कर्तृसंज्ञोपयोगीति लभ्यत इति युक्ततममेतदिति। (शास्त्री, सन् २०१६)

**सन्दर्भग्रन्थसूची-**


शास्त्री, महामहोपाध्यायपेरिसूर्यनारायण (सन्२०१६) श्रीकौण्डभट्टकृत-वैयाकरणभूषणसार: । श्रीवेङ्कटेश्वरवेदविश्वविद्यालय:, तिरुपति-५१७५०२।

पेरि,महामहोपाध्यायसूर्यनारायणशास्त्री (सन्१९८७) श्रीनागेशभट्टकृतवैयाकरणसिद्धान्तलघुमञ्जूषा । राष्ट्रियसंस्कृतविश्वविद्यालय:(केन्द्रियविश्वविद्यालय:), तिरुपति-५१७५०२।

कौमुदी(२०२३) श्रीमद्भट्टोजिदीक्षितविरचिता,चौखम्बासुरभारतीप्रकाशनम्,वाराणसी।

शास्त्री, श्रीभार्गव (सन्२०२३) महर्षिः पतञ्जलिः, महाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान॥

मिश्र, वंशीधरमिश्रविरचितवंशीव्याख्योपेता श्रीनागेशभट्टविरचिता परमलघमञ्जुषा(सन् २००६), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

श्रीभट्टोजीदीक्षितः(सन् २००९) प्रौढमनोरमा (अव्ययीभावान्ता), चौखम्बा संस्कृत संस्थान, वाराणसी।

श्रीनागेशः( सन् १९४१),लघुशब्देन्दुशेखर: सुब्रह्मण्य शास्त्री, वेङ्कटेश्वरशास्त्री। श्रीविद्यामुद्रणालय:, आन्ध्रा।

भर्तृहरि, (सन् २०२३) वाक्यपदीयम्, वाराणससी, सुरसरस्वतीभवनग्रन्थमाला।

पाणिनिसूत्रम्, अष्टाध्यायी प्राविधिकमाध्यमेन {ashtadhyayi.com(app)} नीलेश बोडस।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**न्यायवैशेषिकदर्शनयोरभावपदार्थविमर्शः**

डा.रामप्रसाद पौडेल
उपप्राध्यापकः
वाल्मीकिविद्यापीठम्, काष्ठमण्डपः
Gmail: rpp3654@gmail.com
DOI:

**सार**

पदार्थज्ञानस्य परमं प्रयोजनं मोक्ष इत्यामनन्ति मनीषिणः। परमत्वञ्च निरतिशयत्वे सति क्षयशून्यत्वम् । तत्र मोक्षश्च तत्त्वज्ञानाधीनः, तत्त्वानि च कानि ? इति जिज्ञासायां न्यायमते प्रमाणप्रमेयादयः षोडश पदार्था एव तत्त्वानि सन्ति । तेषां यथार्थज्ञानान्मिथ्याज्ञाननाशः, तेन दोषाणामभावः, तेन च प्रवृत्तीनामभावः, तेन च जन्मनोऽभावः, तेन चैकविंशतिदुःखध्वंसात्मको मोक्षो नैयायिकानां सिद्धान्तः । यद्यपि महर्षिणा गैतमेन प्रमाणप्रमेयादिषोडशभावपदार्थानामुपदेशसन्दर्भे साक्षादभावपदाथर्स्यानुपदेशस्तथापि निःश्रेयसस्य पदार्थस्य निर्वचनप्रसङ्गे तदत्यन्तिकमोक्षोपवर्ग (न्यायभाष्य १.१.२२) इत्यनेन सूत्रघटकात्यन्तपदेन अत्यन्तपदेनैवाभावपदार्थस्य ग्रहणान्न्यायमतेऽपि अभावपदार्थः स्वीकृतः । अस्य सूत्रस्य व्याख्यानोपक्रमे भाष्यकारेण तेन दुःखेन जन्मनाऽत्यन्तविमुक्तिरपवर्ग (वात्स्यायनभाष्य पृ.२७ ) इति व्याख्यातम् । तत्रात्यन्तविमुक्तिपदेन एकविंशतिदुःखानामात्यन्तिकाभाव एव परमपुरुषार्थत्वेन बोध्यः । एवं वैशेषिकदर्शनस्य प्रणेत्रा कणादेन धर्मं व्याख्यातुकामेन पूर्वं धर्मस्य लक्षणमुक्त्वा तदनन्तरं द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्था निगदिताः । तेषामाशयस्तु धर्मविशेषप्रसूतादेव द्रव्यादिसप्तपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानादेव निःश्रेयसाधिगम इति । तत्र वैशेषिकदर्शनेन प्रतिपादिताः सप्तपदार्था नैयायिकानामप्यविरुद्धाः सन्ति । अतस्तयोर्दर्शनयोः षोडशपदार्थानां सप्तपदार्थानां वा तत्त्वज्ञानमपवर्गोपयोगि भवतीति निष्कर्षः ।

शब्दकुञ्जी– मोक्षः, अभावः, तन्मात्रधीः , अनुपलब्धिः, अपवर्गः ।

**विषयप्रवेशः**

पदार्थज्ञानस्य परमं प्रयोजनं निःश्रेयसाधिगम इति न्यायवैशेषिकदर्शने प्रतिपादयतः । निःश्रेयसाधिगमश्च तत्त्वज्ञानाधीनम् , तत्त्वानि कानि ? इति जिज्ञासायां तत्र न्यायदर्शनस्य प्रणेत्रा गैतमेन पदार्थोद्देशक्रमे प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान् निःश्रेयसाधिगमः (न्या. सू. १.१.१) इति प्रथमसूत्रेणैव प्रमाणादिषोडशपदार्था निर्दिष्टाः । तेषां यथार्थज्ञानान् निःश्रेयसाधिगम इति फलितम् । निःश्रेयश्चात्यन्तिकैकविंशतिदुःखध्वंसः । दुःखानि चैकविंशतिः, शरीरं, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, दुःखं, सुखं च । एतेषां पदार्थानां तत्त्वज्ञाने सति (यथार्थज्ञाने सति ) अनात्मनि शरीरपुत्रादिषु मिथ्याज्ञाननाशः, तेन च दोषाभावः, तेन प्रवृत्त्यभावः, ततः सर्वेषां प्रारब्धकर्मणां नाशः, तेन च जन्मनोऽभावः, एवं प्रकारेण

सर्वविधदुःखानामात्यन्तिकध्वंस एव परमपुरुषार्थो निगदितः । ध्वंसश्चाभावपदार्थस्य भेदः । अत्र यद्यपि न्यायदर्शने साक्षात् पदार्थत्वेनाभावो न निर्दिष्टस्तथापि निःश्रेयसपदार्थघटकत्वेन संशयपदार्थघटकत्वेन वाभावपदार्थोपदिष्टः । एवं नव्यन्यायप्रणेत्रा गङ्गेशोपाध्यायेनापि तत्त्वचिन्तामणिग्रन्थे अभाववाद इति शीर्षकेनाभावो निरूपितः । एवमनुमितिकारणीभूतव्याप्तिज्ञानस्य विषयीभूतव्यापारलक्षणानि साध्याभाववदवृत्तित्वमित्यादीन्यपि प्रायेणाभावघटितानि दृश्यन्ते । एवं लोकेऽपि जनाः प्रायेणाभावमादाय व्यवहरन्ति । एतेनाभाविषये स्वतन्त्रपदार्थेऽस्ति न वा ? सः प्रमेयत्वेन प्रमाणत्वेन वा केन स्वरूपेण ज्ञेयः ? सः कतिविधः ? तस्य च लक्षणं किमिति प्रायेणा न्यायशास्त्राध्येतृणां जिज्ञासा उपजायन्ते । तासां परिपूर्तयेऽभावपदार्थः तत्त्वमीमांसया निरूपणीयः । एवं वैशषिकदर्शनेष्वपि एवंविधा जिज्ञासाः प्रादुर्भवन्ति तासां सर्वासां जिज्ञासानां परिपूर्तये प्राधान्येन न्यायवैशेषिदर्शनान्तर्गतस्याभावपदार्थनिरूपणसन्दर्भे प्रसङ्ग सङ्गत्या प्राप्तान्येषां दर्शनानामप्यभावविषयिणी परिचर्चात्र निबन्धे विधीयते ।

**समस्याकथनम्, उद्देश्यञ्च**

प्रमेयनिरूपणं हि प्रमाणाधीनमिति मत्वा तत्र महर्षिणा गैतमेन प्रथमसूत्रेण प्रमाणप्रमेयादयः षोडशपदार्था उपदिष्टा । एवं कणादेनापि द्रव्यादयः सप्त पदार्था उपदिष्टाः । तदनन्तरमेतेषां पदार्थानां तत्त्वज्ञानञ्च मोक्षोपयोगि भवतीति प्रादर्शि । तत्रोभयत्रापि दर्शने मुख्यत्वेन सूत्ररूपेण अभावपदार्थस्योपदेशो नैव दृश्यते । पुनश्च तत्र तत्र तेषां सूत्राणां व्याख्यानसन्दर्भे अभावपदार्थस्य कथनं प्रायेण न्यायदर्शनस्य सूत्रे वैशेषिकदर्शनस्य सूत्रे वा दृश्यते । एतावता तत्र जिज्ञासूनां मनसि नानाविधाः समस्या जायन्ते । तद्यथा अभावः किमर्थं सूत्रकारेण नोपदिष्टः । तस्य लोकोपयोगित्वमेव कथमस्ति । स अभावः कतिविधः ? किञ्च तल्लक्षणं संभवति ? स च नित्यो न वेति विषये दार्शनिकानां विविधानि मतानि सन्ति । तेषु कस्य मतमाश्रृत्य व्यवहारः सम्पदानीय इति व्यवहर्तृणां समस्या जायते । तेषां समस्यानां समाधानायात्र न्यायवैशेषिकदर्शनसम्मताभावपदार्थं समुपस्थाप्य तेषां विवेचनं समाधानञ्च लेखस्य प्रमुखोद्देश्यं वर्तते ।

**शोधविधिः**

निगमात्मकविधिमागमात्मकिविधिञ्चाश्रृत्यायं निबन्धो विरचितः । कुत्रचिद् व्यासशैलीं कुत्रचिच्च समासशैलीमाश्रृत्य विरचिते निबन्धे पुस्तकालयस्याप्युपयोगो विहितः ।

**न्यायसूत्रेऽभावविमर्शः**

तत्र प्रथमतो महर्षिणाक्षपादेन न्यायसूत्रस्य द्वितीयाध्ययस्य द्वितीयाह्निके सप्तमसूत्रान् नाभावः प्रामाण्यम् ( न्या. सू.२.२.७) इति सप्तमसूत्रादारभ्य द्वादशसूत्रपर्यन्तमभावः पर्यालोचितम् । तत्र अभावस्य प्रमाणान्तरत्वमाङ्क्य तस्य प्रत्यक्षप्रमाणादिनैव प्रमेयत्वं प्रसाध्य तत्राभावस्य प्रध्वंसाभावप्रागभावात्यन्ताभावान्योन्याभावत्वेन चातुर्विध्यं प्रादर्शि । एवं तत्र न्यायदर्शनस्य प्रथमसूत्रघटकं तत्त्वज्ञानाद् इति पदं तद्धटकं यत्तत्त्वं तत्किमिति ? जिज्ञासायां भाष्यकारो वात्स्यायनः, वार्तिककार उद्योतकरः, टीकाकारो वाचस्पतिमिश्रमहोदयः परिशुद्धिकार उदयनश्च स्वस्वमतानुसारं व्याख्यायाभावपदार्थस्यास्तित्वं साधयन्ति ।

**वात्स्यायनमतेऽभावविमर्शः**

तत्र भाष्यकारः तत्त्वपदार्थमेवं व्याकुरुते । सतश्च सद्भावोऽसतश्चासद्भावः (न्यायभाष्य पृ.३) इत्यत्र सत्पदेन सद्भूतं तत्त्वं भावपदार्थो गृहीतः, एवमसत्पदेन असद्भूतं तत्त्वमभावपदार्थो गृहीतः ।

**उद्योतकारमतेऽभावविमर्शः**

एवमुद्योतकारेण यथा गन्धवती पृथिवी, अगन्धा आप (न्यायवार्तिक पृ. ३५ ) इत्यनेन वाक्यद्वयेन तत्त्वपदस्य सदसदर्थं विधाय विधेयत्वेन भावं निषेधत्वेनाभावञ्च बोधयित्वा तयोर्व्यवहारस्य पार्थक्यमपि प्रदर्शितम् । यथा सतः पदार्थस्य प्रत्यक्षं स्वतन्त्रेण जायते । अभावस्य प्रत्यक्षे तु प्रतियोगिनां ज्ञानमधिकरणस्य च ज्ञानमावश्यकमस्ति । यथा घटस्य चक्षुर्व्यापारेण प्रत्यक्षं जायते, घटाभावस्य प्रत्यक्षे तु चक्षुरतिरिक्तघटाभावस्य प्रतियोगिनो घटस्य तदधिकरणस्य चावश्यकता अस्तीति प्रोक्तमस्ति । यद्यपि साक्षात्सूत्रेषु साक्षादभावो नैव निर्दिष्टस्तथापि सूत्रकारेण सूत्रेषु भावपदार्थस्य निर्देशनादभावपदार्थोऽपि निर्दिष्टो भवतीति तात्पर्यं तेन प्रतिपादितम् ।

**टीकाकारमतेऽभावविमर्शः**

वाचस्पति मिश्रस्तु तात्पर्यटीकायां यथा गोपालाङ्गना अपि, कमत्रास्ति स्तेन अस्मद्धनं वा अपवरके न वेति सन्दिहानाः प्रदीपमुपादाय समन्तादवलोक्य, अस्तीह अस्मद् धनं, नास्ति स्तेन इति सममेव निश्चिन्वन्ति, न तु स्तेनाभावनिश्चयाय उपायान्तरमुपादत्त (न्यायपरिशुद्धिः ) इत्यादिवचनेन आबालसाधारणप्रतीतिरेवाभावस्यास्तित्वे प्रमाणं प्रख्यापयन्ति । एवञ्च तत्र न्यायदर्शनस्य प्रथमसूत्रोपदिष्टं प्रमाणादिपदार्थानां तत्त्वज्ञानं तस्माज्जायमानं निःश्रेयसमप्यभावात्मकप्रमेयत्वेनैव मूर्धाभिषिक्तं विद्यते ।

**परिशुद्धिकारमतेऽभावविमर्शः**

न्यायपरिशुद्धितात्पर्यटीकायां तत्र उदयनाचार्या अर्थोऽपि शत्रुपुत्राद्यभावादिः, प्रवृत्तिरपि अहिंसादिः (न्यायपरिशुद्धि पृ.११२) इति वचसा प्रमेयत्वेनाभावं परिगृह्णन्ति ।

**न्यायमञ्जरीकारमतेऽभावविमर्शः**

न्यायमञ्जरीकारो जयन्त भट्टस्तु तत्राभावस्यास्तित्वं निराकुर्वतां विरोधिनां मतं निराकुर्वन् इह घटो नास्ति इति ज्ञानमेकमेवेदं इह कुण्डे दधि इति ज्ञानवद् उभयालम्बनम् अपरनयनव्यापारस्य भवति (न्यायमञ्जरी पृ.११३ ) इत्यादिवचनेन अभावात्मकप्रमेयस्यास्तित्वं साधयन्ति । एवं प्रत्यक्षप्रमाणेन तस्याभावपदार्थस्य प्रत्यक्षं प्रतिपादयता तेनानुपलब्धिप्रमाणस्य खण्डनमपि विहितम् । उक्तञ्च तेन- 'कण्टकाभावमालक्ष्य पथि पदं निधीयते । पश्यन्नभावं को नाम निह्नुवीत सचेतनः (न्यायमञ्जरी पृ.१३३ )' इति ।

**भासर्वज्ञमतेऽभावविमर्शः**

भासर्वज्ञस्तु अभावपदार्थस्य प्रमाणत्वेन च निरूपणं कुर्वन् न्यायवैशेषिप्रकरणग्रन्थे प्राथम्येन प्रमेयत्वेनाभावं स्वीकृतवान्। तत्र तेन प्रमाणत्वेनाभावस्य ग्रहणमागमानुमानप्रत्यक्षेषु विहितम्, प्रमेयत्वेनाभावस्य निरूपणं विशेषणविशेष्यभावविधया त्रिषु रूपेषु कृतम्।

**वैशेषिकमतेऽभावविमर्शः**

वैशेषिकदशर्ननस्य प्रणेता महर्षि कणादो धर्मं व्याख्यातुं प्रतिजानीनो वैशेषिकसूत्रे प्रथमाध्यायस्य यतोऽभ्युदयनिश्रेयसिद्धिः सः धर्मः (वै.सू १.१.२ ) इत्यनेन द्वितीयसूत्रेण सूत्रेण धर्मस्य लक्षणं विधाय द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्था उपदिष्टाः । एवञ्च धर्मविशेषप्रसूतात् तेषां द्रव्यगुणकर्मसामान्यविशेषसमवयायानां सप्तानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानस्य निःश्रेयसोपयोगित्वं प्रत्यपादयत् । यद्यपि तेन द्रव्यादिसप्तपदार्थानामुपदेशक्रमे धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्यभ्यां तत्त्वज्ञानान्निश्रेयसम् (वैशेषिकदर्शन १.१४) इत्यस्मिन् सूत्रे तत्त्वज्ञानोपयोगित्वं षण्णां द्रव्यादिपदार्थानामेवोक्तत्वाद् अभावपदेन साक्षादभावस्यानुक्तत्वादभावस्य तत्त्वज्ञानविषयत्वं नायाति तथापि अग्रे स्वयं महर्षिणा नवमाध्याये अभावपदार्थस्य व्याख्यानादभावपदार्थः सप्तमपदार्थत्वेनाभ्युपेयो भवति। एवञ्च तस्य ज्ञानमपि निःश्रेयसोपयोगित्वं भवत्येव। एवञ्च तत्रोक्तसूत्रादनुक्तोऽप्यभावपदार्थः कथं गृह्यते एतस्मिन् विषये तत्र आचार्याणां यानि मतानि दृश्यन्ते तेषामत्रोपस्थानं क्रमेण क्रियते। तत्र व्योमशिवाचार्यो यथोक्तसूत्रस्य व्याख्यानमेवं कुर्वन्ति। यतो हि भावपदार्थं विना अभावपदार्थमापादयितुं न शक्यते । कस्यचिद् वस्तुनः परिज्ञानादेव तस्याभावः कुत्रिचित् प्रतिपादयितुं शक्यते । अतो भावपदार्थमुद्दिश्यैवाभावपदार्थेऽप्युपदिष्टो भवतीति अभावपरत्वमर्थमनेन प्रकारेण सङ्गमयन्ति । उक्तञ्च तेन व्योमवतीव्याख्यायां भावपरिज्ञानापेक्षितत्वादभावस्य न पृथगुपसंख्यानम् । ज्ञाते हि भावे तदभावः प्रतीयत एव (व्योमशिवाचार्यः, व्योमवतीव्याख्या पृ. १४) इत्यादिवचनेन न्यायकन्दलीकारो]ऽप्युक्तसूत्रस्य व्याख्यानमेव प्रकारेण कुर्वन्ति । तत्र महर्षिणा काणादेन अभावपदार्थ स्वातन्त्रेण नैव निर्दिष्टः । यतो ह्यभावस्य भावाधीनत्वाद् भावानां निर्देशनादेवाभावोऽपि निर्दिष्टो भवतीति तस्याशयः। उक्तञ्च तेन अभावस्यपृथगनुपदेशो भावपारतन्त्र्यान्न त्वभावादिति (श्रीधरभट्टः, न्यायकन्दली पृ. १८)। एवमुदयनाचार्यास्तु सूत्रमिदमेवं व्याख्यायाभावपरत्वं सङ्गमयन्ति। तथा ह्यभावस्य प्रतियोगिज्ञानाधीनज्ञानविषयत्वादभावत्वेन प्रतीयमानः स्वतन्त्रोऽप्यभावपदार्थः सूत्रकारेण पृथङ् नैवोपदिष्ट इति । उक्तञ्च तेनाभावस्तु स्वरूपवानपि पृथङ् नोदिष्टः प्रतियोगिनिरूपणाधीननिरूपणत्वान्न तु तुच्छत्वात् ( उदयनाचार्य किरणावली पृ.४६)। अत्र मथुरानाथतर्कवागीशेन स्वस्य कीरणावलीरहस्यटीकायां तुच्छत्वादिति पदस्य अप्रामाणिकत्वादित्यर्थं विधाय स्वतन्त्रेच्छेन महर्षिणा अभावानिरूपणे महर्षीणामुद्देशविषयत्वाभावहेतुं प्रदर्श्याभावस्याप्रामाणिकत्वं निराकृतम्। तथा चोक्तं वस्तुतस्तु स्वतन्त्रेच्छस्येति न्यायेन विवक्षादिहेत्वभावादेव नाभावो विभक्तेत्येव तत्त्वम्। न तु तुच्छत्वादिति। न तु अप्रामाणिकत्वादित्यर्थः(किरणावलीरहस्यम्, पृ.१४)

**शिवादित्यमतेऽभावविमर्शः**

वैशेषिकदर्शनस्य प्रशिद्धाचार्यः शिवादित्य सप्तपदार्थीनामकं ग्रन्थं व्यरचयत्। तत्र तेन पदार्थस्य लक्षणं कृत्वा पदार्थेषु सप्तमः साक्षादभावपदार्थ एव स्वीकृतः। उक्तञ्च तेन प्रतीतिविषयाः पदार्थाः। ते च द्रव्यगुणकमर्सामान्यविशेषसमवायाभावाख्याः सप्तैव इति ( सप्तपदार्थी पृ. १२ )

एतेन भासर्वज्ञानन्तरं अभावत्वेनाभावपदार्थस्य प्रथमतो निर्वचनं शिवादित्याचार्यैरेव विहितमिति मन्ये। ततः परं अन्ये अधुनिका दार्शनिका स्वातन्त्रेणाभावपदार्थं स्वीकृत्यैव विविधान् ग्रन्थान् व्यरचयन्। यथा हि भाषापरिच्छेदे मुक्तावलीकारः

द्रव्यं गुणः तथा कर्म सामान्यं सविशेषकम्।

समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः॥ कारिकावली १५ )।

एवमन्नम्भट्टोऽपि स्वातन्त्रेण सप्तमपदार्थत्वेनाभावं स्वीकृत्यैव सप्तपदार्थान् निर्दिशति द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्था इति ( तर्कसंग्रहः )

**मीमांसादर्शने अभावविमर्शः**

तत्र मीमांसका अनुपलब्धिप्रमाणत्वेनाभावं स्वीकुर्वन्ति। कुमारिलभट्टेन मीमांसादर्शने भाट्टमते पञ्चविधः प्रमेयः प्रतिपादितः। तेनादौ भावाभावात्मकं पदार्थं प्रतिपादयित्वा भावपदार्था द्रव्यजातिगुणक्रियाभेदेन चतुर्षु भागेषु विभक्तः। उक्तञ्च–

वयं तावत् प्रमेयं तु द्रव्यजातिगुणक्रियाः।

अभावश्चेति पञ्चैतान् पदार्थानाद्रियामहे॥ (मानमेयोदय.पृ.१४८ )

एते च प्रमेयात्मकाः पदार्थाः प्रमाणाधीनाः सन्ति। अत आदौ प्रमाणमेव निरूपणीयं भवति। तत्र मीमांसादर्शनेन प्रत्यक्षानुमानोपमानवाक्यार्थापत्त्यनुपलब्धिभेदाच्छड्विधानि प्रमाणानि स्वीकृतानि सन्ति। तत्र प्रत्यक्षादिप्रमाणेन सिद्धभूतानां पदार्थानामभावज्ञानं येन प्रमाणेन जायते तदनुपलब्धिप्रमाणमुच्यते। अर्थात् प्रमाणपञ्चकाभाव एव अनुपलब्धिप्रमाणलक्षणं इत्युक्तं भवति। एवमुक्तः श्लोकवार्तिककारसिद्धान्तो हरिभद्रसुरीमहोदयेन यथा प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते। वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ( षड्दर्शनसमुच्चय ७६ )। यथा घटप्रत्यक्षं चक्षुषा जायते घटाभावस्य प्रत्यक्षन्तु त्वनुपलब्धिप्रमाणेन भवति। उक्तञ्च भाष्यकारेण—" अभावोऽपि प्रमाणाभावलक्षणो नास्तीत्यर्थस्यासन्निकृष्टस्य प्रसिद्ध्यर्थं प्रमाणम्" (शावरभाष्य,१।१) इति। अर्थात् कस्याप्यभावस्य प्रत्यक्षार्थं प्रमाणानामभावोऽप्रमाणान्तरं येन विनापि सन्निकर्षं पदार्थानामशदंशस्येदं नास्तीतिपश्नतीत्या प्रत्यक्षं जायते। वस्तुतो यदा घटादयः पदार्थाः सत्त्वेन प्रतीयन्ते तदान्येषां प्रमाणानां विषया भवन्ति, यदा चैते एव पदार्था असत्त्वेन प्रतीयन्ते तदा अभावात्मकानुपलब्धिप्रमाणस्य विषया भवन्ति। एतेन च मीमांसकानामते अभावात्मकानुपल्धिप्रमाणेन अभावात्मकप्रमेयानां सिद्धिर्जायते। उक्तञ्च पार्थसारथिमिश्रेण अभावोऽपि प्रमाणाभावो, नास्तीत्यस्यार्थस्यासन्निकृष्टस्येति (शाबरभाष्य पृ.८७)। तत्राभात्मकाभावप्रमेयः सः प्रागभावादिभेदेन चतुर्धा भवति। यथा दुग्धे दधि जायत इति प्रतीतिविषयीभूतो योऽभावः स प्रागभाव इत्युच्यते। दध्नि यः पयसो योऽभावः प्रध्वंसाभाव इत्युच्यते। गवि योऽश्वादीनामभावः सोन्योन्याभाव उच्यते, एवं श्रृङ्गस्य यदसद्रूपं शशमूर्धावयवसमवेतं सोऽत्यन्ताभाव उत्यते। तत्र कुमारिलभट्टस्तु वस्तुत्वेनाभावात्मकं प्रमेयं स्वीकुर्वन्ति।

तत्र प्रभाकरस्तु अभावस्याधिकरणस्वरूपत्वं स्वीकरोति। यथा घटाभाववद् भूतलमित्यत्र घटाभावस्याधिकरणस्वरूपत्वेन

भूतले विशेषणविधया ज्ञातो हि घटाभावो भूतलाद् व्यतिरक्तो कश्चन स्वतन्त्रपदार्थविशेषो नास्ति। अत उक्तप्रतीते घटाभावो भूतलमेव बोधयति। उक्तञ्च तेन दृश्ये प्रतियोगिनि या तदेकविषया बुद्धिः सैव तस्य प्रतियोगिनोऽभाव इत्युच्यते (प्रकरण पञ्जिका पृ.८७ )। प्रभाकराणां मते घटाभावस्य ज्ञानस्वरूपत्वे स्वीकृते सति बौद्धानां क्षणिकविज्ञानवादस्य प्रवेश इति मत्वा श्रीहर्षः प्रभाकरमाक्षिप्य बुद्धबन्धु नाम्ना सम्बोधयति ।

गुरुर्धियमभावस्य स्थाने स्थानेऽभिषिक्तवान्।

प्रसिद्ध एव लोकस्य बन्धुबुद्धः प्रभाकरः ॥ (खण्डनखण्डखाद्यम् )।

तदापेक्षस्तु शालिकनाथे वयमपि संसृष्टबुद्धेः कारणविनाशं अभावं ब्रूमः, किन्तु भावान्तरोदय एव कारणविनाश इति ब्रूमः (प्रकरणपञ्जिका पृ.२२८ ) इति वचनेन निवार्यते।

**बौद्धमतेऽभावविमर्शः**

बैद्धदर्शनेऽभापदार्थो नाङ्गीक्रीयते। तत्र प्रमाणवार्तिकारो धर्मकीर्ति सत्वेनासत्त्वेन वाभावस्य अस्तित्वं निषेधयति। अभावो यदि सन् तदा सतो निषेधो न। यदि असन् तदा असतो निषेध एव न भवतीति तर्केणोभयथापि अभावस्यास्तीत्वं निराकृत्य प्रोक्तं प्रमाणवार्तिके

सतां च न निषेधोसऽस्ति सोऽसत्सु च न विद्यते।

जगत्यनेन न्यायेन नञर्थः प्रलयं गतः ॥ (प्रमाणावार्तिक पृ. २२६ )।

**नव्यन्यायमतेऽभावविमर्शः**

तत्र प्राचीनन्यायबैद्धमीमांसानां मते अभावपदार्थं विचार्य चिन्तामणिकास्य मतानुसारेणाभावपदार्थो विमृश्यते । तत्र हि चिन्तामणिकारस्तु पूर्वपक्षत्वेन ननु इत्यदिना मीमांसामतमुपस्थाप्य अभाववादः प्रारब्धः । तथा हि मीमासंकाः अभावं स्वतन्त्रपदार्थत्वेन परिगणनां न कुर्वन्ति । ते अभावस्य अधिकरणत्वं स्वीकुर्वन्ति । एवं च तस्य प्रत्यक्षमपि संयोगादीनां सन्निकर्षेणैव भवतीति तेषां सिद्धान्तः । यथा हि घटाभाववद् भूतलमित्यत्र अभावस्याधिकरणारूपत्वेन घटाभावो भूतलस्वरूपः । तस्य च प्रत्यक्षं संयोगसन्निकर्षेणैव भवतीति उक्त्वा घटाभावस्यातिरिक्तत्वे तस्य प्रत्यक्षे विशेषणविशेष्यभावरूपसन्निकर्षकल्पनाप्रयुक्तं गारवदोषमप्युद्भावयन्ति।

यथोक्तमीमासामतं खण्डयितु प्राचीननैयायिका एवं वदन्ति । यदि अभावस्याधिकरणस्वरूपत्वं स्वीक्रीयते तदा भूतले घट इति प्रतीतेर्विरोधिनी भूतले घटो नास्तीति प्रतीति न स्यात्। यतो हि तत्र घटेन सह भूतलस्य विरोधाभावादधिकरणस्वरूपस्य भूतलात्मकाभावस्य विरोधो न भवति। एवञ्चोभयप्रतीतिविषयत्वं भूतले सत्त्वात् तयोः प्रतीत्योः समानत्वमपि स्यादिति। एवं वदन्तं प्रति मीमांसक उभयप्रतीता वैषम्यं साधयितुमाह घटाभाववद् भूतलमित्यत्र केवलस्य अभावस्य ज्ञानविषयत्वं भूतलमेव भवति तदेव विषयवैषम्यं विरोधं संपाद्य यथोक्तदोषा निरस्यन्त इत्यपि मीमांसकानामसदुत्तरमेव। यतो हि भूतले घटो नास्तीति प्रतीतेरर्थो भूतले केवलविशेषः कैवल्यं बोधयेदेवं वा अभावस्याधिकरणत्वेन भूतलस्वरूपत्वाद् भूतले भूतलमित्यर्थप्रतीत्या पुनरुक्तिदोषोऽपि भवति । एवञ्च सर्वजनानुभवसिद्धो यो आधाराधेयभावसम्बन्धस्तस्यापि विलोपापत्तिर्भवति। अतोऽभावस्यातिरिक्तत्वं स्वीकर्त्तव्यमेव।

एवं वदन्तं प्राचीननैयायिकं प्रत्याह मीमांसको घटवद् भूतलं एवं घटाभाववद् भूतलमित्यनयोः प्रतीत्योरभयत्र भूतलविशेषत्वेन समानत्वे सति तयोर्विरोधो न स्यात्। अतस्तत्र भिन्नत्वं सम्पादयितुं यत्र भूतलविशेषे घटाभावो विधीयते तत्र भूतलविशेषो विद्यते। यत्र च भूतले घटो विधीयते तत्र भूलविशेषो नास्त्यतः भूतलविशेषो घटाभावस्यैव एवं रीत्या तत्र पार्थक्यं विरोधत्वञ्च सम्पादयितुं शक्यत एव। एवञ्च नैयायिकेनापीदं तथ्यं स्वीकर्तव्यमेव। अन्यथा भूतलविशेषत्वादभावो विधीयत उतो वा अभाववद् भूतलत्वाद् विशेषोऽस्तीति रीत्या न्यायमते अन्योन्याश्रयदोषः समापतति। एवञ्च सर्वत्र भूतले घटाभावस्यासत्त्वाद् भूतलविशेषे एव घटाभावस्य विधेयत्वेन तत्र विरोधप्रत्ययो भवत्येव। न हि तत्राभावः स्वतन्त्रपदार्थत्वेन कल्पनीय इति।

एवं विवदन्तं प्रति नैयायिकाः प्रश्नद्वयमाध्यमेनाभावस्यास्तित्वसाधनाय प्राहुः। कीदृशे भूतले अभावो विद्यते ? घटाभावास्य प्राक् भूतले किमासीदिति ? इति प्रतिपश्ने घटवत्त्वं हि तदुत्तरं भवति। एवं अभाववति च इह भूतले घटो नास्तीति प्रतीत्या घटाभावभूतलयोराधाराधेयभावत्वेन परिज्ञानादभावः स्वतन्त्रः सप्तमपदार्थोऽकामेनापि स्वीकर्तव्यम्।

मीमांसकश्च पुनः तर्कयन्ति यदा भूतले घटो नास्तीति प्रतीतै भूतलमात्रस्यैव तन्मात्रत्वेनानुभवविषयतया भासमानत्वात् भूतलस्याधारत्वेन ज्ञानाभावाच्च अभावपदार्थो न स्वतन्त्र इति सिद्धम्। एवंप्रकारकानुभवमादाय व्याख्यां कुर्वन्तं प्रति प्राह चिन्तामणिकारः। अहो व्याख्यानकैशलम् ? अनुभवोऽपि व्याख्याय कथ्यत इत्यादिवचनेन तन्मतं निराकुर्वन्नाह। मीमांसकैर्यत् तन्मात्रं स्वीकृतं तच्च न स्पष्टीकृतम्। तस्य स्वरूपनिर्वचने कृते सति तैरपि अभावपदार्थरकामेनापि स्वीकरणीय एव। तन्मात्रज्ञानं तन्मते भूतलज्ञानमित्यपि कथयितुं न शक्यते। एवं सति घटवद् भूतलमिति प्रतीतावपि भूतलस्य तदीयज्ञानविषयत्वस्य सत्त्वेन तयोर्द्वयोः प्रतीत्योरविरोधापत्तिः।

एवं तत्र प्रशस्तपादभाष्यटीकारेण श्रीधरेणाभावपदार्थस्यानुमानप्रमाणान्तर्भावसन्दर्भे प्रभाकरमतमुद्दिश्याप्रमेयभूतस्याभावस्य कथं प्रमाणत्वेनोपन्यस्तमित्युक्त्वा मीमांसकेन बौद्धमतमनुसृतमिति निगदितम्।

तत्र प्रभाकरस्य मते प्रतियोगिनः स्मरणं तन्मात्रधीरेवाभावपदार्थः, तेषां सिद्धान्ते अनेका दोषाः समापतन्ति। यथा भूतले धावमानस्य बालकस्य कीलकस्य स्मरणाभावदशायां भूतलस्य ज्ञानं न स्यात्र। एवं तेन कण्टकेन पाद विद्धतापि न स्यात्।

एवं कुत्रचिद्ध्रदस्य बन्धे नष्टे सति तन्मते ह्रदस्यैवाभावे ज्ञाते बन्धाभावस्य ज्ञानमपि न स्यादिति तात्पयर्यम्।

अपरश्च दोषो भूतले नष्टे घटे भूतलस्वरूपस्याभावस्य परिज्ञानात् किञ्चत्क्षणानन्तरं घटाभावस्य नाशेन घटाभावाभावस्य परिज्ञानात् पुनर्घटस्य ज्ञानमपि स्यादिति भावः। एतद् दूषणत्रयं मीमांसकमतस्यासमीचीनत्वं द्योतयति। एवं नास्ति बुद्धिरेवाभावस्यास्तित्वं साधयति। तत्र प्रतियोगिसत्त्वदशायां भूतले घटाभावस्य व्यवहाराभावात् तदेवव्यवहारो घटाभावस्यास्तित्वं साधयति।

एवं तत्त्वचिन्तामणिग्रन्थस्य प्रकाशटीकाकर्त्रा मीमांसकमतं सूचयित्वा घट पटो न इति प्रतीतोऽपटाभावस्य प्रतयोगिनो पटस्य तदभावस्य चाधिकरणं घट एव भवितुमर्हतीति अवोचत्। एवं खण्डनखण्डनखाद्यकारेणापि अन्योन्याभावस्य खण्डनं कृतम्। तत्र तेन घटः पटो न इत्यत्र पटाभावस्य प्रतियोगिना पटेन घटस्य तादाम्यं न ह्यनुभवस्य विषयः। एवं वायोर्न रूपमित्यत्रापि रूपाभावस्य प्रतियोगिरूपसंयुक्तो न वायुर्न प्रसिद्धः। अत अप्रसिद्धं वस्तु संकल्प्य तत्साधनाय विहताः प्रयासाः तिरस्करणीयाः। वस्तुतो मीमांसकानां मते यद्यभावः स्यात्तदैवान्येषामभावानामधिकरणं भवेत्। तेषां मते घटयुक्तभूतलाद्भिन्नं भूतलमेवाभावपदार्थः। नैयायिकास्तु तत्रैव घटाभावस्याधेयतया प्रसिद्धिः। अत एव तत्र भूतले समयभेदेन कदाचिद् घटवत्त्वं

कदाचिच्च घटाभाववत्वं प्रतीयते । तत्र चिन्तामणिकारेण पूर्वपक्षत्वेन प्रभाकरसिद्धान्तमुद्धृत्य न्यायशास्त्रस्य सिद्धान्तपक्षो निरूपितः । अभावश्च अत्रेदं नास्ति इति प्रतीत्या जायमानो बोधः । तत्र प्रायेणाभावानां प्रतियोगिज्ञानाधीनज्ञानविषयत्वेन बोधः । एवं तत्र रघुनाथशिरोमणिस्तु अभावस्य स्वरूपसम्बन्धत्वमरीकृत्वा निर्वचनं विहितम् । उक्तञ्च तेन अभावत्वञ्च इह इदं नास्ति इदमिह न भवतीति प्रतीतिनियामकः स्वरूपसम्बन्धविशेषः ।

**निष्कर्षः**

नव्यन्यायदर्शनस्य प्रणेता महर्षिगौतमस्तत्र प्रथमसूत्रेणैव प्रमाणाप्रमेयादिषोडशपदार्थान् प्रतिपादयित्वा तेषां प्रयोजनमपि प्रत्यपादयत् । एवं वैशेषिकदर्शनस्य प्रणेता कणादोऽपि धर्मं व्याख्यतुं प्रतिज्ञाय तत्र द्वितीयसूत्रेण धर्मस्य लक्षणमुक्त्वा द्रव्यादिसप्तपदार्थानुपद्दिश्य तेषां धर्मविशेषप्रसूतात् साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निश्रैयसाधिगमत्वरूपफलमपि सूचितवान् । अत्र यद्यप्युभयदर्शने द्रव्यादिसप्तपदार्थानामुद्देशक्रमे अभावपदार्थो नैवोल्लिखितस्तथापि तत्र तत्र तेषां पदार्थानां लक्षणसन्दर्भे विभिन्न स्थाने चाभावपदार्थस्य निरूपणात्तेनैव न्यायवैशेषिकदर्शनाभिमताभावः स्वतन्त्रपदार्थः सिद्धो भवति । यथा न्यायदर्शने सूत्रकारेणैव निःश्रेयसपदार्थघटकत्वेन संशयपदार्थघटकत्वेन वाभावपदार्थो निर्दिष्टः । एवं गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिग्रन्थे अभाववाद इति शीर्षकेनाभावस्य प्रपञ्चनं, न्यायदर्शनस्य प्रथमसूत्रघटकतत्त्वज्ञानादिति पञ्चम्यन्तपदघटकतत्त्वपदं व्याख्याय भाष्यकारो वात्स्यायनः, वार्तिककार उद्योतकरः, टीकाकारो वाचस्पतिमिश्रमहोदयः परिशुद्धिकार उदयनश्च स्वस्वमतानुसारमभावपदार्थस्यास्तित्वं साधयन्ति । एतेन न्यायदर्शनस्य स्वतन्त्रत्वेनाभावपदार्थस्यास्तित्वं साधितं भवति । एवं वैशेषिकदर्शने१पि स्वयं महर्षिकणादः द्रव्यादिसप्तपदार्थानामुपदेशसन्दर्भेऽभावपदार्थं नैवोपदिष्टवान् । परन्त्वग्रे नवमाध्यायेऽभावपदार्थं व्याख्याय तस्य सप्तमपदार्थत्वेन स्वीकृतः । तस्य स्वतन्त्रतया सूत्रे किमर्थं नोपदेश इत्यत्र विदुषां विभिन्नमतानि सन्ति । तत्र शिवाचार्यस्तु अभावज्ञानं प्रतियोगिज्ञानाधीनमतः सूत्रकारेण पदार्थत्वेऽपि तस्य स्वतन्त्रतया नोपादानम् । उक्तञ्च तेन भावपरिज्ञानस्यापेक्षितत्वादभावस्य न पृथगुपसङ्ख्यानम् । ज्ञाते हि भावे तदभावः प्रतीयत एव (व्योमशिवाचार्य, व्योमवती पृ.१४) । एवं न्यायकन्दलीकारस्य अभावस्य भावपरतन्त्राधीनत्वान्न सूत्रकारेण पृथगुपदेश इत्यादिकं प्रतिपादनमपि तट्टीकायां दृश्यते । एवमन्येषामुदयनमथुरानाथप्रभृतयोऽपि विद्वांसोऽभावपदार्थस्यास्तित्वसाधने युक्तिं स्फोरयन्ति । एवं तत्र मीमांसकेषु कुमारिलभट्टोऽप्यभावपदार्थस्यास्तित्वं प्रतिपादयन् तस्य साक्षात्करणायानुपलब्धिप्रमाणमपि स्वीकुर्वन्ति । परन्तु तत्र न्यायवैशेषिकदर्शनेन प्रतिपादितमभावपदार्थं निराकर्तुं बौद्धाः मीमांसकेषु प्रभाकरश्चाभावपदार्थस्य स्वतन्त्रास्तित्वं निराकुर्वन्ति । तत्र प्रभाकरस्त्वभावस्याधिकरणानतिरिक्तत्वं साधयति । यथा हि घटाभाववद् भूतलमित्यत्र घटाभावस्य भूतलानतिरिक्तत्वं प्रसाधयन्ति । एवं बौद्धा अप्यभावं निराकर्तुं युक्तिं प्रदर्शयन्ति । यथा सतो न निषेधस्तथैव शशशृङ्गसदृशानामसतामपि निषेधो नैव युक्त इति । एवमग्रे तत्त्वचिन्त्रमणिकत्रा गङ्गेशोपाध्यायेनापि अभाववादात्मके प्रकरणे प्रभाकरमतमुल्लिख्य तर्कप्रमाणाभ्यां निराकृत्याभावपदार्थस्य स्वतन्त्रास्तित्वं साधनाय बाह्या युक्तयः प्रदर्शिताः । एवमभावस्य कुत्रचिदधिकरणे देशे काले च प्रत्यक्षप्रमाणेन आधाराधेयतया भानादभावः स्वतन्त्रपदार्थ इति ।

**सन्दर्भग्रन्थसूची**


उद्योतकरः,भरद्वाजः,(१९६७) न्यायवार्तिकम् (भाष्यवार्तिकतात्पर्यटीकापरिशुद्धिसहिता), सम्पा.अनन्तलाल ठाकुर दरभङ्गा, विहार।

उदयनाचार्य, किरणावली, सम्पा. गौरीनाथ शास्त्री, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

ताताचार्य, देशकतिरुमल (१९७९). वैशेषिकसूत्रवृत्तिः. इलाहावाद : गङ्गानाथ झा केन्द्रीय संस्कृतविद्यापीठम्।

धर्मकीर्ति,(१९८४)प्रमाणवार्तिकम् (मनोरथनन्दवृत्तिः, द्वि. सं.), सम्पा. द्वारिकादास शास्त्री, वाराणसी : बौद्धभारतीप्रकाशन ।

नारायणाद्वयी, (१९९६ इ.) मानमेयोदयः.(द्वि.सं.). वाराणसी : चौखम्बा विद्याभवन । प्रशस्तपादाचार्य, (१९७८)प्रशस्तपादभाष्यम् (श्रीधराचार्यकृतन्याकन्दलीयुतम्, द्वि. सं.) सम्पा. श्रीदुर्गानन्द, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

भट्ट, अन्नम् (१९६९ इ.) तर्कसंग्रहः. वाराणसी : चौखम्बा संस्कृत सिरीज।

भट्ट जयन्त, (१९७५) न्यायमञ्जरी (गुर्जरभाषानुवादसहिता, प्र.सं.), प्रथमाह्निकम्, सम्पा. नागीन जी.साह, अहमदावाद : ला.द.भा.संस्कृति विद्यामन्दिर।

भट्टाचार्य, विश्वनाथपञ्चानन (२०६१). वाराणसी : चौखम्बा संस्कृत संस्थानम्।

मथुरानाथतर्कवागीशः (१९८१ ). किरणालीरहस्यम्, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

महर्षिगौतम, (१९७६) न्यायदर्शन (द्वि.सं.), सम्पा.द्वारिकादास शास्त्री, वाराणसी : बौद्धभारती प्रकाशन।

वात्स्यायन, ( १९७८) न्यायभाष्यम्. मुम्बई : मणिलाल इच्छाराम देसाई।

व्योमशिवाचार्य, (१९८४), व्योमवती (प्रथमो भागः ), सम्पा. वाचस्पति मिश्र, वाराणसीः सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

शाबरभाष्यम्. (१९८४ इ.) सम्पा. मण्डनमिश्र, दिल्ली : लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठम्।

श्रीहर्ष, खण्डनखण्डखाद्यम् (अनुभूतिस्वरूपाचार्यविरचितशिष्यहितैषिणीटीकासंवलितम्), सम्पा.इस्टर ए. सोलोमन, गुजरात ।

सूरि, हरिभद्र (२०१९ इ.) षड्दर्शनसमुच्चयः. दिल्ली : भारतीयज्ञानपीठम्।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**दर्शनशास्त्रसाहित्यशास्त्रयोः प्रस्तुतं मोक्षस्वरूपम्**

उत्तमप्रसादः खतिवडाः
सहप्राध्यापकः
नेपालसंस्कृतविश्वविद्यालयः
Gmail: up.sharma977@gmail.com
DOI:

**शोधसारः**

जगति यावन्तोऽपि प्राणिनः सन्ति, सर्वेऽपि प्राणिनः सुखप्राप्तये दुःखपरिहाराय च प्रयतन्ते । तत्रापि मनुष्याः सुखदुःखप्राप्तिपरिहारयोरुपायान्वेषणेऽहरहः प्रयतमानास्तत्साधनं स्वस्वभावानुकूलमभिलषन्ति । "तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये, आयासायापरं कर्म विद्यान्या शिल्पनैपुणम्"इति विष्णुपुराणकथनमाधृत्य वास्तविकज्ञानस्य मोक्षोपयोगित्वमनुभूयते । "ऋते ज्ञानान्न मुक्तिः" इति श्रुत्यंशोऽपि ज्ञानस्य मोक्षफलकत्वं सूचयति । वस्तुतः सर्वेऽपि मोक्षमिच्छन्ति । परन्तु तत्साधनमजानन्तो सर्वे प्राणिनःभ्रममाणा दरीदृश्यन्ते । केचन विवेकिनःदार्शनिकसिद्धान्तं स्वीकृत्य मुक्तिमिच्छन्ति । दार्शनिकानामपि मोक्षविषये पृथक् पृथग्धारणा विद्यते । तत्र नैयायिकाः "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय-वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इत्युक्त्वा मोक्षस्वरूपं प्रदर्शयन्ति चेदन्ये वैषेशिकसांख्ययोगवेदान्तमीमांसाबौद्धजैनसम्बद्धाः सर्वेऽपि स्वस्वसिद्धान्तानुसारं मोक्षं प्रतिपादयन्ति । अस्मिन्नेव क्रमे साहित्यिकानामपि "चतर्वर्गफलप्राप्तिः सुखादल्पधियामपि"इत्यनयारीत्या मोक्षविषये स्वकीया धारणालङ्कारशास्त्रेषु दृश्यते । तेषां मतानुसारं परनिर्वृतिरेव मोक्षो विद्यते । सा च सत्काव्यसेवनादेव जायते । सत्काव्यमाध्यमेन क्रमशो धर्मप्राप्तिः, धर्मादर्थः, अर्थात्कामोऽन्ते धर्मार्थकामानां सुसेवनाच्चित्तशुद्धिर्जायते, चित्तशुद्धेश्च तत्त्वज्ञानाधिगतिः । ततः परा निर्वृतिरथवा मोक्ष इति साहित्यिकानां क्रममुक्तिरनुमीयते । विशेषत आलेखेऽस्मिन्नेत एव विषया विवेचिताः सन्ति ।

**प्रमुखाः शब्दाः-** अपवर्गः, ऋजुः, निर्वृतिः, मूलाविद्या, शेमुषी ।

**विषयपरिचयः**

अखिलब्रह्माण्डभाण्डान्तर्वर्तिनो जीवाः सुखं प्रेप्सन्ति दुःखञ्च परिजीहीर्षन्ति । परं तत्प्राप्तिपरिहारयोरुपायविन्मानवनिवह एव । मानवजीवनं खलु धर्मादिचतुर्विधपुरुषार्थसाधनेनैव सार्थकम् । धर्मादीनां मूलं साधनं वेदवेदान्तादिशास्त्रमिति नाविदितमेतत् सामान्यानामपि जनानाम् । ग्रन्थग्रन्थिभेदनपुरःसरं वेदादिशास्त्रालोचनं न सर्वेषां सुकरम् । कुशाग्रबुद्धयो निरवद्यविद्याद्योतितान्तःकरणाः केचन मनीषिण एव तदध्वाध्वनीनत्वं भजन्ते । तदा त एव पुरुषार्थभाजो बोभूयेरन् । परन्तु न तथा पक्षपातः शास्त्रकृद्भिर्विलोक्यते । अतः सुकुमारमतीनां सहृदयानां जनानां कृते काव्यादेव चतुर्वर्गफलाधिगतिरिति 'काव्यम्' इति धिया तन्नोपेक्षणीयम् । 'काव्यालापाँश्च वर्जयेत्' इत्यादिवचः

'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि' इत्याद्युक्त्या यद्यपि विसंवदति तथापि 'न चापि काव्यं नवमित्यवद्यम्' इति कालिदासीया भणितिश्चिराच्चित्तस्थां विचिकित्सां चिकित्सति । कमनीयकाव्यालम्बनेन धर्मादिकामान्तपुरुषार्थप्राप्तौ न केषाञ्चिदपि विप्रतिपत्तिः, परं परमपुरुषार्थरूपे निरतिशयानन्दस्वरूपे कैवल्याख्ये मोक्षे काव्यानां हेतुत्वं कथं सम्बोभवीति सामान्यमतिमतामभिमतम् । 'ऋते ज्ञानान्न मुक्तिः', 'तमेव विदित्वातिमृत्युमेति' इत्यादिश्रुत्यनुरोधात् विना ब्रह्मावगतिं मोक्षमोहो खपुष्पायित इति वेदविदां वित्तिः । श्रुत्युक्तं ज्ञानं च मूलाविद्याध्वंसजन्यम् । अतस्तु 'अविद्यास्तमयो मोक्षः, सा च बन्धः उदाहृतः' इति मोक्षशास्त्रसेवतां शेमुषी सुस्पष्टा । काव्यतत्त्वविदामत्र धारणास्ति यत् - कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् । आह्लाद्यमृतवत्काव्यमविवेकगदापहम् ॥ इति । (व.जी. १/३) । वस्तुतः काव्यं शास्त्रं च पर्यन्तेऽविद्यामेव भिनत्ति, केवलं पद्धतिर्विभिद्यते । सुपथा लक्षिते लक्ष्ये कान्तारे कस्य प्रवृत्तिरिष्यते । अतस्तूक्तम् - 'कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यादिति ?'(सा.द. १/२ वृत्तिः) 'रुचीनां वैचित्र्यादृजुकुटिलनानां पथजुषाम्' इति पौष्पदन्तीमुक्तिमात्मीयां प्रकृतिं वा विभाव्य केषाञ्चिच्छास्त्रे केषाञ्चिच्च काव्ये प्रवृत्तिरभिजायते । तस्मात्काव्यानि सप्रयोजनानि परमपुरुषार्थसम्बद्धानि च निश्चीयन्ते । वस्तुतस्तु दर्शनशास्त्राणि यदपवर्गं द्योतयन्ति तदपवर्गं साहित्यशास्त्रमपि प्रापयति । परमतत्त्वरूपे मोक्षस्वरूपे विकल्पो न सम्भवति । पार्थक्यं एतावदेवास्ति यत्- दर्शनशास्त्राणि साक्षान्मोक्षमार्गमुपदिशन्ति चेद् साहित्यशास्त्रं परम्परया मोक्षमार्गं दर्शयति । धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षस्यैव परमपुरुषार्थत्वाद् तदधिगतिपर्यन्ता पुरुषाणां प्रवृत्तिर्निश्चिता । मोक्षस्य परमपुरुषार्थत्वे च वेदान्तादिशास्त्राणि सन्ति प्रमाणानि । यथा-इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः 'न स पुनरावर्तते' इति श्रुत्या तस्य नित्यत्वावगमात् । इतरेषां त्रयाणां प्रत्यक्षेण 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इत्यादिश्रुत्या चानित्यत्वावगमाद् (धर्मराजाध्वरिन्द्रः, २०११, पृ. ८) इति । मोक्षस्य स्वरूपं च दर्शनशास्त्रानुसारं प्रतिदर्शनं विभिद्यते । नैयायिकानां मोक्षस्वरूपं वेदान्तिनां मोक्षस्वरूपेण सह न सङ्गच्छते । तथैव सांख्यानां मोक्षस्वरूपं मीमांसकादीनां मोक्षस्वरूपेण सह नैवैक्यं भजते । अतः स्वरूपचिन्तने तत्त्वविचारणे सत्यामपि भिन्नतायां तत्त्वज्ञानानुभवे मोक्षसुखे च नास्ति कश्चन भेद इति साहित्यसम्बद्धस्य दर्शनसम्बद्धस्य च मोक्षस्य विचारः कर्तव्य इत्यादयो विषया अध्ययनेऽस्मिन् विविच्यन्ते ।

**अध्ययनस्य प्रमुखाः समस्याः**

बहुभिश्चिन्तकैः दार्शनिकसाहित्यिकमोक्षविषयेऽध्यनमनुसन्धानञ्च विहितमस्ति । यथा दार्शनिकैः मोक्षस्वरूपं पृथक् पृथक् प्रदर्शितं तथैव साहित्यिकैरपि काव्यशास्त्रगम्यं मोक्षस्वरूपं प्रतिपादितं विद्यते । परन्तु दार्शनिकैः प्रतिपादितेन मोक्षेण सह साहित्यिकैः प्रतिपादितस्य मोक्षस्य सम्बन्धः कीदृश इत्यादयो विषया विवेचनीयाः सन्ति । संक्षेपतो विचारितेऽध्ययनेस्मिन् अधो निर्दिष्टं समस्याद्वयं दृश्यते ।

क) दर्शनशास्त्रसम्बद्धं मोक्षस्वरूपं कीदृशम् ?

ख) साहित्यसम्मतं मोक्षस्वरूपं कीदृशम् ? इति ।

**अध्ययनस्योद्देश्यम्**

दार्शनिकैर्मोक्षस्वरूपमधिकृत्य नैजं चिन्तनं प्रकटितं प्राप्यते । दर्शनञ्च आस्तिकनास्तिकभेदेन द्वादशविधं प्रतिपादितम् । द्वादशदर्शनेषु पृथग्पृथग्रूपेण मोक्षस्य स्वरूपं चिन्तितं विद्यते । तेनैव प्रकारेण साहित्यिकैश्च मोक्षस्वरूपं काव्यशास्त्रानुरूपं प्रस्तुतमस्ति ।अध्ययनेऽस्मिन् संक्षपेण निम्नाङ्कितमुद्दश्यद्वयं विद्यते । यथा-

क) दार्शनिकमोक्षस्वरूपचिन्तनम् ।

ख) साहित्यिकमोक्षस्वरूपविश्लेषणम् ॥ इति ।

**अध्ययनविधिः**

अध्ययनस्यास्य सौविध्याय मुख्यसामग्रीसंकलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्रांगीकृतो विद्यते । यथावश्यकं व्याख्या- विश्लेषणादिविधयस्तथा क्वचित् तुलना-चिन्तनादिविधयश्चावलम्बिताः सन्ति । मोक्षतत्त्वबोधनक्रमे तुलनाप्रतितुलनादिविधिं स्वीकृत्य सञ्चितसामग्रीणामध्ययने यथायथं मनननिदिध्यासनादिविधयश्च स्वायत्तीक्रियन्ते । एवमेव लेखनिष्पादनसन्दर्भे प्रस्तुतसामग्रीणां सत्यापनाय लेखकमितिपृष्ट(APA)पद्धतिः स्वीक्रियते । क्वचित् गभीरविषयविचारसरणौ स्वोपज्ञपद्धतिश्चावलम्ब्यते ।

**अध्ययनस्य क्षेत्रं सीमांकनञ्च**

आलेखस्यास्य मुख्यं क्षेत्रं विविधदर्शनसम्बद्धा मोक्षप्रतिपादकसिद्धान्तास्तथा साहित्यसम्बद्धमोक्षप्रतिपादकाः ग्रन्थाश्च सन्ति । मोक्षविषये के के सिद्धान्ताः स्थापिताः प्रतिपादिताश्चेत्यादयो विषयाः प्रकृते क्षेत्रान्तर्गताः सन्ति चेत् तदतिरिक्ता विषयाः सीमारूपाः सन्ति । अध्ययनमिदं स्वक्षेत्रे प्रवर्तते तदतिरिक्तविषयेषु नैव प्रवर्तते ।

**दार्शनिकमोक्षस्वरूपम्**

धर्मादिपुरुषार्थचतुष्टयेषु मोक्षः परमपुरुषार्थ उच्यते तस्य नित्यत्वात् । जन्ममरणाद्यनादिप्रवाहविच्छेदरूपो मोक्षश्च तत्त्वज्ञानेनैव भवतीति दर्शनानामुद्घोषः श्रूयते । तत्त्वन्तु निखिलजगतोऽधिष्ठानभूतं ब्रह्मैवेति श्रुतिस्मृतिपुराणेषु प्रतिपादितम् । ब्रह्म च समुद्रे तरङ्गविन्दुवज्जीवरूपेण व्याकृतम् । जीवरूपेण परिवर्तितं ब्रह्म स्वस्य वास्तविकं स्वरूपं विस्मृत्य संसारे कृतकर्मानुसारेण अनेकानि शरीराणि धृत्वा जायते म्रियते च । इदमेव ब्रह्मरूपिणो जीवस्य संसरणम् । *अस्यामवस्थायां स्वस्वरूपावबोध एव जीवस्य मोक्षः इति श्रुतौ उक्तमेव— भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे । (गिरि, २०७३, पृ. २९६)*

मोक्षस्वरूपविषये दार्शनिकेषु मतभेदो दृश्यते । यथा मूलाज्ञाननिवृत्तौ स्वस्वरूपावस्थितिरेव मोक्ष इति अद्वैतवेदान्तिनः । आत्मनोऽशेषविशेषगुणोच्छेदो मोक्ष इति वैशेषिकाः, आत्यन्तिकी दुःखनिवृत्तिर्मोक्ष इनि नैयायिकाः । प्रकृतिपुरुषान्यत्वख्यातिर्मोक्ष इति सांख्याः । कृतकर्तव्यतया पुरुषार्थशून्यानां सत्त्वरजस्तमसां मूलप्रकृतावत्यन्तलयः प्रकृतेर्मोक्षः, चितिशक्तेस्तु निरूपाधिकस्वस्वरूपेणावस्थानं मोक्ष इति योगिनः । सर्वकर्तृत्वव्यतिरिक्तानां सर्वज्ञत्वादीनां परमात्मगुणानां प्राप्तिः, याथात्म्येन भगवत्स्वरूपानुभवो भगवद्दासत्वप्राप्तिश्च मोक्ष इति रामानुजीयाः वैष्णवाः ।

वैकुण्ठप्राप्तिद्वारा लभ्यं दुःखामिश्रितं पूर्णं सुखं मोक्ष इति माध्वाः। मोक्षस्वरूपे विवादे सत्यपि दुःखस्याभावः परमसुखस्य प्राप्तिश्च मोक्षे भवतीत्यत्र प्रायः सर्वेषां मतैक्यम्। मोक्षसाधनविषयेऽपि विवादः विद्यते एव। *यथा त्रयो धर्म स्कन्धा यज्ञोऽध्ययनं दानमिति* (शङ्कराचार्य, छान्दोग्योपनिषद्, वि.सं. २०३९, पृ. ७५) इति श्रुतिमनुसृत्य ज्ञानकर्मसमुच्चय एव मोक्षसाधनमिति केचन मन्यन्ते। ***एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति*** (शङ्कराचार्य, बृहदारण्यकोपनिषद्भाष्यम्, २०५८, पृ. १०९१) इति श्रुतिमनुसृत्य पारिव्राज्याद् मुक्तिरिति। तत्र शाङ्कराद्वैतवादे केवलं ज्ञानमेव मोक्षसाधनम्। कर्मयोगभक्त्युपास्तिकर्मादीनि तथा श्रवणमनननिदिध्यासनानि च मोक्षसाधनान्येवेति मन्तव्यम्। जीवन्मुक्तिविदेहमुक्तिभेदेन मुक्तिर्द्विधा। येषामविद्या तज्जन्यरागादिदोषाः समूलं विनष्टास्तेषामिहैव मुक्तिर्या सा जीवन्मुक्तिः। शरीरनाशानन्तरमविद्यादिदोषो विनश्यतीति तेषां विदेहमुक्तिः।

मोचनार्थकान्मुच्धातोः क्तिन्प्रत्ययेन निष्पन्नो मुक्तिशब्दो बन्धच्छेदनरूपं शोकसन्तरणरूपं चार्थं प्रकाशयति। वस्तुतः मुक्तिपदेनापि मोक्षार्थ एव द्योत्यते। यदात्मबोधेनाज्ञानजं प्रापञ्चिकमिथ्याबन्धनं सर्वतोभावेन विनष्टं भवति, तादृश्यात्मस्थितिरेव मुक्तिरिति। *'ब्रह्म वेद ब्रह्मैव भवति,* (गिरि, २०७३, पृ. ३१७) *तरति शोकमात्मवित्,* (शङ्कराचार्य, छान्दोग्योपनिषद्, वि.सं. २०३९, पृ. २८९) ब्रह्मविद् ब्रह्मणि स्थितः' (वेदव्यास, श्रीमद्भगवद्गीता, वि.सं. २०७५, पृ. ३९) इत्यादिश्रुतिस्मृतिवचनद्वारा ब्रह्मज्ञानेन जायमाना ब्रह्मस्थितिः आनन्दप्राप्तिः कर्तृत्वादिसांसारिकबन्धतरणञ्च मुक्तिरिति प्रतिपादिता भवति। वस्तुतस्त्वविक्रिये आत्मनि न बन्धमोक्षौ सम्भवतस्तथापि यदा जीवोऽविद्यावशेन जागतिकवस्तुष्वहंमेमतिभावनां भावयति तदा प्रापञ्चिकवस्तुषु व्यापृतो जीवः निजमात्मस्वरूपं विस्मृत्यात्मानं बद्धं मनुते। यदा तु बन्धस्य हेतुभूता अविद्या निवृत्ता जायते तदैव जीवो मुक्तो भवति। अत एव अविद्यानिवृत्तिरेव मोक्ष इति शङ्करमतम्। (शङ्कराचार्य, छान्दोग्योपनिषद्, वि.सं. २०३९, पृ. २१६) *'अविद्यास्तमयो मोक्षः'* इति कथयता लघुचन्द्रिकाकारेणापि अविद्योच्छेदस्यैव मोक्षत्वमङ्गीकृतम्। जीवब्रह्मैक्यप्रतिबन्धिका अविद्या हि संसृतेर्बन्धस्य वा बीजमस्ति। अतस्तस्याः नाश एव जीवस्य मुक्तिः–

ऐकात्म्याप्रतिपत्तिर्या स्वात्मानुभवसंश्रया।<br>
साऽविद्या संसृतेर्बीजं तन्नाशो मुक्तिरात्मनः॥ (सुरेश्वराचार्य, सन् १९८१, पृ. ९)

*आनन्दात्मकब्रह्मप्राप्तिश्च मोक्षः शोकनिवृत्तिश्चेति* (धर्मराजाध्वरीन्द्र, सन् २०००, पृ. ३८२) मोक्षस्वरूपं कथयता धर्मराजाध्वरीन्द्रेण *'ब्रह्म वेद ब्रह्मैव भवति'* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. १८) इति श्रुतिमनुसृत्य आनन्दात्मकब्रह्मस्वरूपोपलब्धिरेव मोक्ष इति कथितम्। यद्यपि स्वरूपतो ब्रह्मात्मको हि जीवस्तथापि स्वीयाविद्ययावृतः सन् स्वकीयं ब्रह्मात्मकं रूपं विस्मरति। यदा त्वस्य जीवस्य तत्त्वज्ञानोदयो भवति तदाऽज्ञाननिवृत्त्या स्वरूपस्य ब्रह्मात्मैक्यस्य प्रकाशो जायते। स एव प्रकाशो ब्रह्मावाप्तिरिति निगद्यते। ब्रह्मरूपत्वात् स एव मोक्षः। एवमेव अविद्याजनितकर्तृत्वभोक्तृत्वादिशोकस्य निवृत्तिरपि मोक्षः, *'तरति शोकमात्मवित्,* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. ७१) *तत्र को मोहः कः शोक एकत्वमनुपश्यतः'* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. १) इति श्रुतेः। नित्यत्वान्मोक्षः प्राप्तस्यैव ब्रह्मस्वरूपस्य प्राप्तिर्न नवीना प्राप्तिः। यथा कण्ठगतमणेः विनष्टविभ्रमे *'भवतः कण्ठे मणिः'* इत्याप्तोपदेशेनाऽप्राप्तमिव मणिं प्राप्नोति तदा च पूर्वत एव कण्ठस्थस्य मणेः प्राप्तिः प्राप्तस्यैव प्राप्तिर्भवति तद्वदात्मरूपत्वान्मोक्षः स्वतः प्राप्तोऽप्यप्राप्तविभ्रमेण जीवः तत्प्राप्तये प्रयतते। अतः *'अप्राप्तो मोक्षः'* इत्यज्ञानध्वंसाय प्रयासो

विधीयते न तु मोक्षप्राप्तये। एवं जीवस्य ब्रह्मरूपत्वात् परिहृतस्यैव शोकस्य परिहारो भवति यथा वलयितचरणायां स्रजि सर्पत्वभ्रमवतः पुंसः *'नायं सर्पः'* इति आप्तोपदेशात् परिहृतस्यैव सर्पस्य परिहारः प्रसिद्धः। अतः प्राप्तस्यैव आत्मस्वरूपस्य प्राप्तिः परिहृतस्यैव शोकाद्यनर्थस्य परिहारो मोक्ष इति मन्तव्यः।

मुक्तो जीवः सर्वसंसारधर्मातीतः परमानन्दात्मकमद्वितीयब्रह्मात्मैक्यभावमधिगच्छति। मोक्षतत्त्वं तु पारमार्थिकं कूटस्थनित्यं सर्वविक्रियारहितं स्वयंज्योतिःस्वरूपं विद्यते। कालत्रयेऽपि पुण्यपापे इदं न स्पृशतः (शङ्कराचार्य, ब्रह्मसूत्रशाङ्करभाष्यम्, सन् २०१३, पृ. ५८-५९)। कर्मणा सह मोक्षस्य न कश्चन सम्बन्धः विद्यते। (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. १७) मोक्षस्य कर्मजन्यत्वे तस्य नित्यत्वहानिः स्यात्। यतो हि कर्मजन्यत्वेनोत्पाद्यत्वम्, तेन च विनाशित्वम्, अनित्यत्वञ्चेति नायं मोक्षः कर्मजन्यः न च विकार्यः प्राप्यो वा। मोक्षस्य तु ब्रह्मरूपतया स्वतः सिद्धत्वम्, नित्यत्वञ्च। शङ्करमतेन अयं संस्कार्योऽपि न। संस्कारो नाम संस्कार्यस्य वस्तुनः गुणाधानम्, दोषापकरणं वा। मोक्षस्य ब्रह्मरूपत्वान्न तत्र गुणाधानं कर्तुं शक्यते न च वा तत्र दोषाः सन्ति येषामपनयनं स्यात्। अतो मोक्षः न संस्कार्यः। मुक्तावस्थायां जीवस्य सर्वे कामाः पूर्णतां गताः विनष्टिङ्गता वा भवन्ति। मुक्त आप्तकाम आत्मतृप्तश्च भवति। निरतिशयपरमानन्दमनुभवतः तस्य कृते न किमपि भोग्यं भवति न च भोगेच्छा। अतः स्वात्मारामं विषयमृगतृष्णा न क्षोभयितुं शक्नोति। (पुष्पदन्ताचार्य, २०७०, पृ. १२) मोक्षं लब्धवतः पूर्णकामस्य हृत्स्थाः कामनाः सर्वा अपि प्रभिद्यन्ते, सोऽमृतो भवति (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. १०)। एवमेव चिदहङ्कारयोः परस्परतादात्म्याध्यासरूपो हृदयग्रन्थिर्भिद्यते, ज्ञेयविषयाः विनश्यन्ति, सञ्चितादिकर्माणि कर्मवासनाश्च क्षीयन्ते (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. १८)। परिणामतो जीवस्य शरीरग्रहणप्रक्रिया एवावरूद्ध्यते। स च ब्रह्मीभूयाय गच्छति, न स पुनरावर्तते (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. २१५) इति श्रुतेः। पुनरावर्तनाय कर्मबीजमावश्यकं भवति। परन्तु पुण्यापुण्यकर्मशून्यः पुरुषः शुद्धज्ञानेन कर्माणि कर्मसंस्काराश्च नाशयित्वा बन्धमुक्तो भवतीति– *एवं ज्ञानेन शुद्धेन दग्धबीजो ह्यकल्मषः। विमुक्तबन्धः शान्तोऽसौ मुक्त इत्यभिधीयते।* (वेदव्यास, वायुपुराणम्, २०१६, पृ. ६७) मुक्तजीवस्य देहानन्तरमपि न क्वचिदुत्क्रमणं लोकान्तरगमनं पुनरागमनं वा भवति, *न तस्य प्राणा उत्क्रामन्ति* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. ११८) इति श्रुतेः।

मुक्तावस्थायां मुक्तो जीवः एकत्वेन स्वात्मानमनुभवन् क्वचिदपि किञ्चिदपि द्वितीयं वस्तु न पश्यति। *'द्वितीयाद्वै भयं भवति'* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. ८८) इति श्रुत्यनुसारं द्वितीयस्य भयहेतुत्वात् जातैकत्वबोधो मुक्तः पुरुषः भयशोकादिभ्यो न विचाल्यते। *'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'*, (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. २६) *'न ततो विजुगुप्सते' 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः'* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. १) इत्यादिश्रुतितात्पर्यं तदेव। आत्मज्ञानेन कृतकृत्यस्य निःस्पृहस्य च मुक्तस्य कृते ज्ञातव्यस्य ब्रह्मणः कृतज्ञानत्वादपरं ज्ञातव्यं च नावशिष्यते। (वेदव्यास, श्रीमद्भगवद्गीता, वि.सं. २०७५, पृ. ४७) शरीरं धारयतोऽपि तस्य कृते संसारोऽज्ञानकल्पितोऽसदेव भवति। यतो हि तत्त्वज्ञानेन संसारहेतुभूतायामविद्यायां नष्टायां संसारः कथं स्थातुं शक्नुयात्? अतः संसारस्यासत्त्वं ज्ञानिनां कृते स्वाभाविकम्। एतादृशस्तत्त्वदर्शी मुक्तो जीवो यावत्प्रारब्धक्षयं जगति विचरन् देहपातानन्तरं विदेहमुक्तो भवति। मुक्तिश्च स्वरूपदृष्ट्या साधनभेददृष्ट्या वा द्विधा– जीवन्मुक्तिः, विदेहमुक्तिश्च।

**जीवन्मुक्तिः**

ब्रह्मापरोक्षमोक्षद्वारा विनष्टाज्ञानः सन्नपि प्रारब्धकर्मवशात् सुखदुःखोपभोगाय देहं सन्धृत्य निःस्पृहो विचरन् पुरुषो जीवन्मुक्त इत्युच्यते । स्वस्वरूपाखण्डब्रह्मज्ञानेनाज्ञानस्य तत्कार्याणां सञ्चितकर्मसंशयविपर्ययादीनाञ्च बाधितत्वात् जीवन्मुक्तः पुरुषोऽखिलबन्धनरहितो भवति । (सदानन्द, सन् १९३४, पृ. ५३) जीवन्मुक्तः पुरुषः सुखदुःखादिचित्तधर्माननुभवन्नपि संसारी इव न तत्र व्यापृतो भवति । स तु द्वयं पश्यन्नप्यद्वयमनुभवति । कुर्वन्नपि कर्तृत्वाभावान्न करोति । अतः शङ्कराचार्यः कथयति–

*सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः ।*

*तथापि कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः ॥* (सदानन्द, सन् १९३४, पृ. ५४)

तत्त्वज्ञानेन सकार्यायामविद्यायां नष्टायामपि पूर्वसंस्काररूपकारणवशान्मुक्तपुरुषस्य शरीरावस्था यथावदवस्थिता चलति । यथा दण्डभ्रमनिवृत्तावपि कुलालचक्रं किञ्चित्कालं यावद् भ्रमति तद्वद् जीवन्मुक्तोऽपि प्रारब्धसमाप्तिपर्यन्तं स्वदेहं धारयति । अनारब्धकर्मफलानि तथान्यानि कर्माणि प्रारब्धकर्मेतराणि तत्त्वज्ञानाग्निर्भस्मसात्करोति । यानि तु कर्माणि फलभोगाय प्रवृत्तानि तानि तु फलभोगद्वारैव शाम्यन्ति । इत्थञ्च जीवन्मुक्तोऽपि आशरीरपातं प्रारब्धकर्मबलेन शरीरधारणं करोति । किन्तु स्वयमखण्डं ब्रह्मानन्दमनुभवति । यदा तु तस्य प्रारब्धक्षयः तदैव जीवन्मुक्तस्य विदेहमुक्तिर्भवति । तथा च श्रुतिः – *तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये ।* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. ७०)

**विदेहमुक्तिः**

फलोपभोगेन प्रारब्धकर्मक्षये सति यदा जीवन्मुक्तस्य शरीरपातो भवति तदा विदेहमुक्तिर्जायते । परमकैवल्यं परममुक्तिश्च विदेहमुक्तेरेव नामान्तरम् । तथा चोक्तम्–

*जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।*

*विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ।* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. ४२४)

इयं च जीवस्य निश्चला स्थितिः । अतो विदेहमुक्तो जीवो निष्कलब्रह्मरूपेण राजते । नात्र कश्चन शास्त्रीयो लौकिको वा व्यवहारो भवति, नापि हर्षशोकादयो भवन्ति । अस्यामवस्थायां मुक्तो जीवो ब्रह्मणि लीनः सम्भूय ब्रह्मानन्दमनुभवति । तथा च श्रुतिः– *ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी । स्वच्छरूपो महामौनी वैदेहो मुक्त एव सः ।* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. २७१) तदानीं न प्रपञ्चभानं न च ब्रह्माकारवृत्तिर्वा भवति । (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. २७२) विदेहमुक्तावस्थायां स्थूलादित्रिविधशरीरस्य नाशो भवतीति सर्वदेहाभावात् इयं विदेहमुक्तिः कथ्यते । विदेहमुक्तिश्च द्विधा– क्रममुक्तिः, सद्योमुक्तिश्च ।

**क्रममुक्तिः**

अद्वैतिनां मते ब्रह्म सगुणं निर्गुणं चेति द्विविधम् । ये निर्गुणब्रह्मज्ञानं कुर्वन्ति तेषां ब्रह्मनिर्वाणलाभो भवति परन्तु ये सगुणस्य ब्रह्मणः उपासनां विदधति शरीरपातात् प्रागेव ब्रह्मापरोक्षज्ञानं कर्तुं न प्रभवन्ति, ते देहपातानन्तरं सगुणोपासनाबलेन देवयानमार्गद्वारा ब्रह्मलोकं गच्छन्ति । तत्रैक कल्पान्ते ब्रह्मणा सह तेषां मुक्तिर्भवति–

*ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।*

*परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥* (शङ्कराचार्य, ब्रह्मसूत्रशाङ्करभाष्यम्, सन् २०१३, पृ. ८५५)

इति स्मृतेः । इयमेव क्रममुक्तिरभिधीयते । अतः क्रममुक्तिः सगुणब्रह्मज्ञानिनां कृतेऽस्ति । एतादृशाः सगुणोपासकाः अर्चिरादिमार्गेण ब्रह्मलोकं गच्छन्ति । ततश्च तत्रैव मुक्ताः जायन्ते । मार्गक्रमे सत्यपि मतभेदे एवं क्रमः प्रदर्शयितुं शक्यते – प्रथमतः अर्चिः, ततः दिनम्, ततः शुक्लपक्षः, तत उत्तरायणम्, ततः संवत्सरः, ततो देवलोकः, ततो वायुलोकः, तत आदित्यलोकः, ततश्चन्द्रलोकः, ततो विद्युल्लोकः, ततो वरूणलोकः, तत इन्द्रलोकः, ततः प्रजापतिलोकः अन्ते च ब्रह्मलोक इति । अर्चिरादिमार्गेण देवयानमार्गेण ब्रह्मलोकं प्राप्य मुक्तिं लब्धवतां पुरुषाणामपि पुनरागमनं न भवति । तत एव निर्गुणोपासनया पुनः कार्यब्रह्मविनाशनिमित्तकप्राकृतप्रलये सति हिरण्यगर्भेण सहैव तेषामपि विदेहमुक्तिर्जायते ।

**सद्योमुक्तिः**

ब्रह्मज्ञानिनां ब्रह्मज्ञानेनाप्रारब्धकर्मणां भोगेन च प्रारब्धकर्मणां नाशो भवति । प्रारब्धकर्मनाशानन्तरं ज्ञानिनः स्थूलदेहनाशो जायते । तत्समकालमेव सूक्ष्मकारणशरीरयोरपि नाशः सञ्जायते । ततो जीवन्मुक्तो जीवः सर्वात्मभावेन ब्रह्मणा सह एकीभवति । इयमेव सद्योमुक्तिरित्युच्यते । सद्योमुक्तस्य पुरुषस्य लोकलोकान्तरेषु गमनागमनं न भवति । तथा च श्रुतिः – *न तस्य प्राणाः उत्क्रामन्ति* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. ११८) *अत्रैव समवलीयन्ते* (शङ्कराचार्य, बृहदारण्यकोपनिषद्भाष्यम्, २०५८, पृ. ६५८) इति । ब्रह्मैव सन् ब्रह्माप्येति (शङ्कराचार्य, बृहदारण्यकोपनिषद्भाष्यम्, २०५८, पृ. १०४६) ब्रह्म वेद ब्रह्मैव भवति (गिरि, २०७३, पृ. ३१७) इति श्रुत्यनुसारं ब्रह्मसाक्षात्कारवतः पुरुषस्य ब्रह्मरूपत्वान्न तस्य प्राणोत्क्रान्तिः, गमनागमनं च भवति । यतः गन्तृगन्तव्यादिविभागाभावात् न लोकान्तरप्राप्तिरूपा मुक्तिरपि तु शरीरत्रयनाशानन्तरमिहैव सम्यग्दर्शननिष्ठानां ज्ञानिनां कृते प्राप्तव्या इति । वेदोपनिषदादिशास्त्राणि वेदान्तादिदर्शनानि चैतादृशं मोक्षस्वरूपं प्रतिपादयन्ति ।

**साहित्यिकमोक्षस्वरूपम्**

मोक्षो नाम बन्धनान्मुक्तिः । बन्धनान्मुक्तिं को न वाञ्छति । स्वभावतः सर्वेऽपि प्राणिनो बद्धाः सन्ति । सांसारिका विषयाः सर्वान् निबध्नन्ति । 'विषिन्वन्ति पुरुषपशुं बध्नन्ति इति विषयाः ' इति व्युत्पत्त्या विषयस्य धर्म एव बन्धनमस्ति । वाङ्मयजगति यानि यानि शास्त्राणि ये ये ग्रन्थाश्च विरचिताः प्रतिपादिता वा सन्ति तेषां मुख्यं प्रयोजनं दुःखसागरे मग्नानां जीवानां ततो मोचनमेव वर्तते । साहित्यमपि शास्त्रमस्ति । शास्त्रकारैः शास्त्रस्य परिभाषा चेत्थं प्रस्तुता- *प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमिति कथ्यते* (भिक्षुः, सन् १९६५, पृ. ५० ) इति । शास्त्रस्योपदेशमूलकत्वाद् साहित्यस्य च शास्त्रत्वाद् साहित्यशास्त्रेऽपि उपदेशमूलकत्वं घटत एव । अतः साहित्यशास्त्रं हितं सुखं चोपदिशति । "हितशासनात् शास्त्रम्" इति शास्त्रस्य लघुपरिभाषापि अत्र सङ्घटते । साहित्यस्य हितोपदेश शैली कोमला सहजा च विद्यते । काव्यप्रयोजनं प्रतिपादयता मम्मटेन तन्निर्दिष्टमेव- *काव्यं यशसेऽर्थकृते व्यवहारविदे, शिवेतरक्षतये, सद्यःपरनिर्वृतये, कान्तासंमिततयोपदेशयुजे* (मम्मटः, सन् २००७, पृ.०५) इति । मम्मटेन षड्विधं काव्यप्रयोजनं प्रस्तुतम् ।तत्रान्यानि प्रयोजनानि गौणानि । सद्यःपरनिर्वृतिरूपं प्रयोजनञ्च मुख्यं विद्यते । किंनाम सद्यः परनिर्वृतिरूपत्वमिति जिज्ञासायां मम्मटेनैव

प्रकाशितं यत्- सकलप्रयोजनमौलीभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दं प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत्कान्तेव सरसतापादनेन अभिमुखीकृत्य रामादिवत् वर्तितव्यं न रावणादिवदित्युपदेशञ्च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् (मम्मटः, सन् २००७, पृ.०५ ) इति । अत्र निर्वृतिपदं मोक्षपरम् । महाकविरश्वघोषोऽपि मोक्षपरतया निर्वृतिपदं प्रयुङ्क्ते - दीपो यथा निर्वृतिमभ्युपेतो नैवावनीं गच्छति नान्तरिक्षम् । दिशां न काञ्चिद् विदिशां न काञ्चिद् स्नेहक्षयाद् केवलमेति शान्तिम् ॥ तथा कृतिर्निर्वृतिमभ्युपेतो नैवावनीं गच्छति नान्तरिक्षम् । दिशं न काञ्चिद् विदिशं न काञ्चिद् रागक्षयाद् केवलमेति शान्तिम् ॥ (अश्वघोषः, १९५०, पृ. १५०) इति । यथा स्नेहक्षयाद्(तैलक्षयाद्) दीपो निर्वृतिं याति, न कुत्रापि गच्छति । तथैव जीवोऽपि वासनाक्षयाद् रागद्वेषादीनामन्यन्तनिरशनाद् निर्वृतिं(मोक्षम्) याति । नान्यत्र तस्य गतिः । स्वयं श्रुतिरपि मुक्तस्य गमनागमनं निषेधति । "न तस्य प्राणा उत्क्रामन्ति"(बृहदारण्यकोपनिषद्, ४/४/६) इति । वस्तुतः मोक्षपदेन आनन्दोऽपि सङ्गृह्यते । *"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन "*(तैत्तिरीयोपनिषद्, २/९ ) इति श्रुतिवाक्याद् तथा "सच्चिदानन्दरूपाय "(भागवतमाहात्म्यम्,१/१) इत्यादिस्मृतिपुराणादिवाक्याच्च आनन्दरूपत्त्वं ब्रह्मण एव सिद्ध्यति । अत्र ब्रह्मण आनन्दरूपत्वमिति कथने धर्मधर्मिभाववद् प्रतीयते परन्तु एतद्गौणः प्रयोगः । वस्तुत आनन्दस्वरूपमेव ब्रह्म । तत्प्राप्तिश्च मोक्षः । एतावता आनन्दप्राप्तिरेव मोक्षः । परनिर्वृतिरूपस्य आनन्दस्य प्राप्तिः काव्याज्जायत इति साहित्यिकस्य मोक्षस्य लाभः । ध्वन्यालोकलोचनकारेणापि एतदभिव्यक्तम्- कवेस्तावद् कीर्त्यापि कृतिरेव सम्पाद्या । श्रोतॄणाञ्च व्युत्पत्तिर्यद्यप्यस्ति तथापि कृतिरेव प्रधानम् । अन्यथा प्रभुसम्मितेभ्यो वेदादिभ्यो मित्रसम्मितेभ्यश्चेतिहासादिभ्यो व्युत्पत्तिहेतुभ्यः क्वास्य काव्यरूपस्य जायासम्मितत्वलक्षणो विशेष इति... चतुर्वर्गव्युत्पत्तेरपि चानन्द एव पार्यन्तिकं मुख्यं प्रयोजनम् (अभिनवगुप्तः, सन् १९९०, पृ. १२) इति । एतावता आनन्दप्राप्तिरेव साहित्यस्य मुख्यं प्रयोजनम् । आनन्दस्य मोक्षरूपत्वाद् साहित्यिकाः काव्यद्वारेण परमनिर्वृतिरूपमानन्दमधिगच्छन्ति । तच्चानन्दरूपत्त्वं न सर्वेषां सुकरम् । अत एव विश्वनाथेनोक्तम्- लोकोत्तरचमत्कारः प्राणः कैश्चिद्प्रमातृभिः (विश्वनाथः, २०६७, पृ.८५ ) इति ।साहित्यिकानां मोक्षरूपस्यानन्दस्य प्राप्तिश्च रसास्वादनद्वारेणैव जायते । मोक्षरूपस्यानन्दस्य प्राप्तेःसाधनभूता रसाभिव्यक्तिः कीदृशीति जिज्ञासायां"व्यक्तः स तैर्विभावाद्यैस्थायिभावो रसः स्मृतः" (मम्मटः, २००७, पृ. ६५) इति रसाभिव्यक्तिं मम्मटो न्यदर्शयत् । एवं विश्वनाथेनापि "विभावेनानुभावेन व्यक्तः०" (विश्वनाथः, २०५८, पृ. ८३) इत्यनया रीत्या रसः परिभाषितः । रसास्वादनसन्दर्भे विश्वनाथस्य मतं मतान्तराद्भिन्नं विचारणीयं च विद्यते । तन्मतानुसारं रसः सप्तविधविशेषणविशिष्टो विद्यते । तत्र प्रथममखण्डविशेषणं प्रयुक्तम् । अखण्डत्वं नाम सजातीयविजातीयस्वगतभेदरहितत्त्वम् । विभावादिसमूहालम्बनात्मकत्वादेक एव इत्यर्थः । अर्थात् भेदाभावाद् रसोऽखण्डरूपो विद्यते । एवमेव स्वप्रकाशत्वम्, आनन्दमयत्वम्, चिन्मयत्वम्, वेद्यान्तरस्पर्शशून्यत्वम्, ब्रह्मास्वादसहोदरत्वम्, लोकोत्तरचमत्कारप्राणत्वं च रसे स्वीकृतम् । घटप्रकाशाय यथा घटज्ञानस्यापेक्षा जायते, घटज्ञानं विना न कथञ्चिदपि घटः प्रकाशते परन्त्वत्र तथा नास्ति । रसप्रकाशाय ज्ञानान्तरं नैवापेक्ष्यते । रसः स्वयं प्रकाशते । अतः रसः स्वप्रकाशरूपः । तथैव रसः सुखस्वरूपः, ज्ञानस्वरूपः, ज्ञेयान्तरसम्पर्करहितश्च विद्यते । रसः ब्रह्मतत्त्वसाक्षात्कारसदृशोऽप्यस्ति । अत एव ब्रह्मास्वादसहोदर इत्युक्तम् । अत्र हि ब्रह्मसाक्षात्कारे ब्रह्ममात्रं प्रकाशते रसास्वादे तु विभावादिकमिति रसस्य सहोदरत्वं युज्यते । पुनश्चायं रसोऽलौकिकाश्चर्यजीवनरूपो व्याख्यातः । एतादृशो रसश्च

कैश्चिदेव प्रमातृभिः स्वाभिन्नत्वेनानुभूयते आस्वाद्यते वा। घटादिज्ञाने ज्ञातृज्ञानज्ञेयरूपं वर्गत्रयं भासते चेद् रसास्वादने रसज्ञाने वा अभिन्नरूपेण बोधात् पृथक्तया न किमपि भासते। अतः रससाक्षात्कारोऽपि ब्रह्मतत्त्वसाक्षात्कारसदृश इति प्रतिपादितः। एतेन आनन्दचमत्कारमयत्वे सति विभावादिसमूहावलम्बनज्ञानत्वं रसत्वमिति रसलक्षणं फलितम् (कृष्णमोहन, २०७०, पृ. ७१)। एतादृशो रसः काव्यनाटकादिसम्बद्धो विद्यते।तस्यास्वादेन य परमानन्दः अनुभूयते स मोक्षरूपः। अतस्तस्य ब्रह्मानन्दसहोदरत्वं व्याख्यातम्। तत्साक्षात्कारःन सर्वेषां सुकरः।अतः केचन प्रमातार एव तदानन्दरूपं तत्वमभिन्नत्वेन साक्षात्कृत्य सांसारिकबन्धनान्मुक्ता भवन्ति। अतः साहित्यिकोऽपि मोक्ष दुर्लभ एव।

**उपसंहारः**

मोक्षः परमपुरुषार्थत्वेन श्रुतिस्मृतिपुराणेषु स्वीकृतः। पुरुषैरर्थ्यत इति पुरुषार्थः। पुरुषाणां स्पृहाविषयत्वाद् धर्मादयः पुरुषार्था इति कथ्यन्ते। पुरुषार्थेषु चत्वारः पुरुषार्थाः परिगणिताः सन्ति। तेषु चतुर्षु पुरुषार्थेषु धर्म-अर्थ-काम-मोक्षा इति सर्वैः स्वीकृताः। दार्शनिकाः साहित्यिकाश्च विषयेऽस्मिन् नैव विरुध्यन्ते। कविराजविश्वनाथेन चतुर्वर्गपदेन धर्मार्थकाममोक्षा एव संसूचिताः - *चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते* (विश्वनाथ, २०६७, पृ.३ ) इति। धर्मादिमोक्षान्ताः पुरुषार्थाः काव्याधीना इति विश्वनाथस्याशयः। चतुर्वर्गफलप्राप्तिर्हि काव्यत रामादिवद् प्रवर्तितव्यं न रावणादिवद् इत्यादि कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतितैव इति तद्वचनं साहित्यस्य मोक्षद्वारत्वं प्रतिपादयति। अनेन एतदपि ध्वन्यते यद् दार्शनिकशास्त्रमिव साहित्यशास्त्रं साक्षान्मोक्षं नैवोपदिशति। पूर्वं सद्व्यवहारशिक्षणादिना चित्तशुद्धिं विधाय ततः क्रमान्मुक्तिं भावयति। अपरेणालङ्कारिकेण भामहेन तु स्पष्टमेवोक्तम् - *"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति प्रीतिं कीर्तिं च साधुकाव्यनिषेवणम्॥"* (भामहः, २०४२, पृ. १०) इति। साहित्यिकाः सत्काव्यचिन्तनेनैव मोक्षं लभन्ते। काव्यात्कथं धर्मप्राप्तिरिति चेत् भगवन्नारायणचरणारविन्दस्तवादिना काव्यात् धर्मप्राप्तिः। *"एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति" इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव।* (विश्वनाथः, २०६७, पृ.४) इति। किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने इत्युक्त्या भगवत्प्रसन्नतायां सर्वपुरुषार्थाधिगतिः सिद्ध्यति। दार्शनिकाश्च बह्वायासेनैव मोक्षमधिगच्छन्ति। *"क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति।"* (कठोपनिषद्, २०७३, पृ. १००) इति। *"श्रवणायापि बहुभिर्यो न लभ्यः।"* (कठोपनिषद्, २०७३, पृ. ७५) इति। "ऋते ज्ञानान्न मुक्तिः" इत्यादिश्रुतिस्मृतियुक्तिभिः श्रवणमनननिदिध्यासनादिव्यापारैश्च दार्शनिकानां मोक्षः श्रूयते। अतः उक्तम् - *"चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो निरसतया दुःखादेव परिणतबुद्धीनामेव जायते परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव।"* (विश्वनाथः, २०६७, पृ. ५) इति। इत्थं सोहापोहं मोक्षविषये विचारिते साहित्यिको मोक्षः सुगमः। दार्शनिकश्च मोक्षः दुरधिगम इति करामलकवदनुभूयत इति।

**सन्दर्भग्रन्थसूची**

अश्वघोषः, (सन् १९५०). सौन्दरनन्दः. वाराणसीः चौखम्बा संस्कृत संस्थान।

ईशादि दश उपनिषद्. (२०७३). (रामानन्द गिरि, अनु.) देवघाट: महेश संस्कृत गुरुकुल.

ईशादिविंशोत्तरशतोपनिषद्. (सन् १९४८). मुम्बई: निर्णयसागर मुद्रणालय.

धर्मराजाध्वरिन्द्रः. (सन् २०११). वेदान्तपरिभाषा. वाराणसीः चौखम्बा अमरभारती प्रकाशन।

धर्मराजाध्वरीन्द्र. (सन् २०००). वेदान्तपरिभाषा. (गजानन शास्त्री मुसलगाँवकर, अनु.) वाराणसी: चौखम्बा विद्या भवन.

पुष्पदन्ताचार्य. (२०७०). शिवमहिम्नःस्तोत्रम्. गोरखपुर: गीताप्रेस.

बृहदारण्यकोपनिषद्. (२०३६). वाराणसीः महेश अनुसन्धान संस्थान।

भामह. (२०४२). काव्यालङ्कार. (देवेन्द्रनाथ शर्मा, अनु.) पटना: बिहार राष्ट्रभाषा परिषद्।

भिक्षुः, गौरीशङ्करः. (सन् १९६५). सर्वलक्षणसंग्रहः. वाराणसीः चौखम्बा विद्याभवन।

मम्मटः. (२००७). काव्यप्रकाशः (सत्यव्रतसिंहः सं.). वाराणसीः चौखम्बा विद्याभवन।

विश्वनाथः. (२०५८). साहित्यदर्पणः. वाराणसीः चौखम्बा संस्कृत संस्थान।

वेदव्यास. (२०१६). वायुपुराणम्. कलकत्ता: गुरुमण्डलग्रन्थमाला.

वेदव्यास. (वि.सं. २०७५). श्रीमद्भगवद्गीता. गोरखपुर: गीताप्रेस.

वेदव्यासः. (२०७५). श्रीमद्भागवतमहापुराणम्. गोरखपुरः गीताप्रेस।

शङ्कराचार्य. (२०५८). बृहदारण्यकोपनिषद्भाष्यम्. गोरखपुर: गीताप्रेस.

शङ्कराचार्य. (वि.सं. २०३९). छान्दोग्योपनिषद्. (एस्.सुब्रह्मण्यम् शास्त्री, सं.) वाराणसी: महेश अनुसन्धान संस्थान.

शङ्कराचार्य. (सन् २०१३). ब्रह्मसूत्रशाङ्करभाष्यम्. (स्वामी सत्यानन्द सरस्वती, अनु.) दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान.

सदानन्द. (सन् १९३४). वेदान्तसार. बम्बई: निर्णयसागर प्रेस.

सुरेश्वराचार्य. (सन् १९८१). नैष्कर्म्यसिद्धि. बम्बई: बम्बई संस्कृत सिरीज.

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**रीतेः काव्यात्मत्वविवेकः**

शिवराज लामिछाने
उपप्राध्यापकः
शारदाविद्यापीठम्, महेन्द्रनगरम्
Gmail: shivarajlamichhane01@gmail.com
DOI:

**सारः**

नाट्यशास्त्रस्य प्रवृत्तिशब्दतो विकसिता रीतिरलङ्कारशास्त्रे मार्गः, पन्थाः, प्रस्थानमित्यादिभिः शब्दैर्व्याहताऽस्ति । प्रारम्भे भूगोलमाधृत्य व्यवहृतेयं रीतिः पश्चात् भूगोलसीमानमतिरिच्य कविस्वभावेनाभिव्यक्तविषयानुकूलवर्णनशैलीत्वं प्रापत् । दण्डि-भामह-कुन्तकादिभिर्मार्गशब्देनाभिहितस्य तत्त्वस्य रीतिशब्देनाभिव्यञ्जनं विधाय तस्य काव्यात्मत्वेन स्थापनं वामनेन विहितम् । आनन्दवर्धनस्य ध्वनेः काव्यात्मत्वेन स्थापनानन्तरं रीतेः काव्यात्मत्वं प्रायेणास्वीकृतं बभूव । अमृतानन्दादिभिः कैश्चित् पुना रीतेः काव्यात्मत्वस्थापनस्यायासो विहितः, परं ध्वनिवादिभिस्तेषामायासो नितरां विफलीकृतः । ध्वनेः प्राक्काले रीतेर्यन्महत्त्वमासीत्, तद् ध्वनेरुत्तरकाले निरस्तमभवत् । शब्दसौन्दर्येणार्थसौन्दर्येण च समन्विताया विशिष्टपदरचनाया रीतित्वेन परिभाषणं विहितवता वामनेन रीतित्वं काव्यशरीरस्य विशिष्टे सङ्गठने न्यस्तं दृश्यते । अतो रीतेः काव्यात्मत्वसाधनं वस्तुतः काव्यस्य शब्दार्थशरीरस्यैवात्मत्वनिरूपणमस्ति । अनेनैव कारणेन रीतेः काव्यात्मत्वं पश्चवर्तिभिर्नाङ्गीकृतम्, समकालिकैश्च तस्य सर्वथा स्वीकारो न विहितः, यतो हि काव्यस्य वास्तविकानामाह्लादतत्त्वानां ध्वनिरसादीनां तत्र प्रविष्टिर्नासीत् । दण्डिवामनाभ्यां रीतेराधारत्वेन गृहीता गुणा रुद्रटेनास्वीकृताः सन्ति । स समासमाधृत्य रीतिनिरूपणं विहितवान् विद्यते । रीतिं शब्दसम्बद्धां कृत्वा रीतेः काव्यात्मत्वस्य विषये न किमपि ब्रुवाणो रुद्रटस्तस्याः काव्यात्मत्वं न स्वीकृतवान् प्रतिभाति । वामनस्य पदरचनारूपा रीतिः पदपदार्थगतसौन्दर्यविशिष्टा शब्दार्थगुणाश्रिता च वर्तते । आनन्दवर्धनेन तस्या एव पदरचनायाः पदसङ्घटनात्वेनोदीरणं विधाय तत्र रसानुकूलत्वमपेक्षितं वर्तते । आनन्दवर्धनेन माधुर्यादिगुणव्यञ्जकवर्णानां रीतेराधारत्वं स्वीकृत्य समासस्य रीतेर्बाह्यरूपत्वं गुणानां चान्तरिकरूपत्वं प्रतिपादितमस्ति । तदनुसारेण पदसङ्घटना माधुर्यादिगुणाश्रयेण रसाभिव्यक्तिं करोति । काव्यगताह्लादरूपस्य परमतत्त्वस्य रसस्यानुभूतौ पदसङ्घटनायाः साधनत्वं भवतीति विचार आनन्दवर्धनस्यास्ति । विश्वनाथेन रसादीनामुपकर्तृत्वं रीतौ निहितमस्ति । एतेनापि रसस्य काव्यात्मत्वं रीतेस्तत्साधनत्वं सिद्ध्यति । वामनानुसारेण रीतेर्नियामकानि तत्त्वानि न भवन्ति, यतो हि काव्यात्मरूपा रीतिः स्वायत्ता विद्यते । आनन्दवर्धनेन तु काव्यात्मत्वेन रसादिध्वनेर्निर्धारणं विधाय प्रथमं रसस्य तन्नियामकत्वं स्वीकृतम्, तदनु च वक्त्रौचित्यस्य, वाच्यौचित्यस्य, विषयौचित्यस्य च रीतेर्नियामकत्वं तेनाङ्गीकृतम् । एवमानन्दवर्धनेन रीते रसपरतन्त्रता निरूपिता । पश्चवर्तिभिश्च रीतेः पारतन्त्र्यं सर्वथा स्वीकृतम्, यतो हि ध्वनिरसादीन् विहाय रीतेरात्मत्वग्रहणं तत्त्वतोऽपि समुचितं नानुभूयते । वचनविन्यासक्रमरूपाया रीतेरेव कारणेन कथनविशेषः काव्यत्वं भजते, अन्यथा स इतिहासादिवद् विषयप्रतापदक एव सञ्जायते । अतः काव्यात्मत्वाभावेऽपि रीतिर्महिमशालिनी सति काव्यशास्त्रिणां समाजे नितरामुपस्थिता सञ्जाता । भौतपुस्तकालयतः साञ्जालिकपुस्तकालयतश्च सामग्रीसङ्कलनं विधाय विषयविश्लेषणं

कृत्वाऽऽलेखोऽयं सज्जीकृतो विद्यते। अत्र विदुषां विचारं तत्सन्दर्भेऽन्येषां विदुषां खण्डनं मण्डनं च प्रस्तुत्य निष्कर्षणायासो विहितोऽस्ति। अत आलेखोऽयं विशेषेण तुलनात्मकविधिप्रधानोऽनुभूयते। अत्र नूतनः सिद्धान्तः प्रतिपादितो नास्ति, अपि तु विदुषां पूर्वस्थापिताः सिद्धान्ताः परस्परं तुलिताः सन्तीति आलेखोऽयं निगमनात्मक एवास्ति, न तु आगमनात्मकः। वस्तुतो 'रीतेः काव्यात्मत्वं भवति न वा ?' इति विषयोऽत्र विश्लेषितो वर्तते। रीतेः स्वरूपविभागादिविषये तत्काव्यात्मत्त्वस्य विषये च बहुभिर्विद्वद्भिः समीक्षणं विहितमस्ति। तत्र कांश्चिद् द्वित्राननतिरिच्य बहुभिस्तु रीतेः काव्यात्मता नाङ्गीकृतैव प्राप्यते। अतो रीतिः काव्यात्मा तु न भवति, परं कथनविशेषस्य काव्यतासाधनायेयं प्रमुखां भूमिकां निर्वहतीति निष्कर्षोऽत्रोपस्थापयितुं शक्यते।

**शब्दबीजानि-** मार्गः, प्रस्थानम्, सम्प्रदायः, वैदर्भी, गौडी, पाञ्चाली, लाटी।

**विषयप्रवेशः**

संस्कृतसाहित्यं विश्वसाहित्ये महत्त्वपूर्णं स्थानं बिभर्ति, यतो हि गुणात्मकदृशा परिमाणात्मकदृशा च संस्कृतसाहित्यस्य कोषो विपुलो वर्तते। काव्यदृशैव न काव्यशास्त्रदृशा च संस्कृतसाहित्यं महिमशालि वर्तते। संस्कृतस्य काव्यशास्त्रपरम्पराया आरम्भविन्दुं निश्चेतुं नाद्यावधि विद्वांसः समर्थाः सन्ति। प्राप्तानां सामग्रीणामाधारेण नाट्यशास्त्रकारो भरत आद्यः संस्कृतकाव्यशास्त्री मन्यते। भरतादारभ्याद्यपर्यन्तं ये काव्यशास्त्रिणः संस्कृतसाहित्ये समुद्भूताः, तेषां षट्त्सु सम्प्रदायेषु विभागो विद्वद्भिर्विधीयते। तेषु षट्त्सु सम्प्रदायेषु रीतिसम्प्रदायोऽन्यतमः, यस्य प्रवर्तकः काव्यालङ्कारसूत्रकारो वामनोऽस्ति। तेन गुणाधारे रीतेः स्वरूपादिनिर्धारणं विधाय रीतेरेव काव्यात्मत्वसाधनायासो नितरां विहितः। ध्वनिसम्प्रदायस्य स्थापनानन्तरं यद्यपि विद्वांसो रीतेः काव्यात्मत्वाद् विरता अभवन्, तथापि कथनविशेषस्य काव्यत्वसम्पादनाय तन्महत्त्वं सर्वैर्विमृष्टम्। अतः प्रायेण समैरपि विद्वद्भिः स्वेषु काव्यशास्त्रेषु रीतिर्विषयीकृता। 'विद्वद्विचारे सा रीतिः कीदृशी ? किञ्च तत्स्वरूपम् ? तत्काव्यात्मत्वसाधने कीदृशोऽस्ति वामनायासः ? का च तत्काव्यात्मत्वनिषेधे चानन्दवर्धनादीनां युक्तिः ?' इत्याद्याः प्रश्नाः समीक्षकाणां समाजे नितरामुद्भवन्ति। अस्मिन्नालेखे एषामेव प्रश्नानां समाधानायासो विहितोऽस्ति।

**समस्याकथनम्**

संस्कृतसाहित्यस्य काव्यशास्त्रपरम्परायां विशेषेण षट् सम्प्रदाया दृश्यन्ते। तेषु पदरचनारूपाया रीतेर्निरूपणेन तत्काव्यात्मत्वसाधने यतमानो वामनप्रवर्तितो रीतिसम्प्रदायोऽपि नितरां महिमशाली अस्ति। स सम्प्रदायो रीतेः काव्यात्मत्वसाधनमुद्दिश्य रीतिसिद्धान्तान् प्रतिपादितवान् विद्यते चेदन्ये च तत्काव्यात्मत्वनिषेधे यतमाना विद्यन्ते। 'रीतेः काव्यात्मत्वमुचितं न वा ?' इति विद्वत्संसदि विमृश्या समस्याऽस्ति। एतामेव मुख्यां समस्यामाधृत्य प्रस्तुतेऽस्मिन्नालेखे विशेषेण प्रदत्तानां तिसृणां समस्यानां समाधानार्थं सोहापोहं यत्नो विहितो विद्यते-

क) विदुषां विचारे रीतिः का ?

ख) रीतिवादिनः किमर्थं रीतेः काव्यात्मत्वसाधने यतमाना दृश्यन्ते ?

ग) रसध्वनिवादिनो रीतेः काव्यात्मत्वनिरासं कथं कुर्वन्ति ?

**उद्देश्यम्**

दर्शनस्य महत्त्वाख्यापनाय खण्डनमण्डनयोर्महत्त्वपूर्णा भूमिका भवति । पौरस्त्ये काव्यशास्त्रीया विषया अपित दर्शनवत् खण्डनमण्डनाभ्यामुत्कर्षं नीयन्ते । काव्यशास्त्रीयसम्प्रदायानामुत्कर्षस्यापि हेतुरयमेव । अन्यमतखण्डनेन स्वमतमण्डनेन च रीतेः काव्यात्मत्वसाधने रीतिवादिनो नितरां समुद्यताः सन्ति । रसध्वनिवादिनस्तु पुना रीतेः काव्यात्मत्वनिरासाय सर्वथा यतमानाः सन्ति । आलेखोऽयं रीतिसम्बद्धैस्तैरेव खण्डनमण्डनैः सम्बद्धो वर्तते । अत्र रीतेः काव्यात्मत्वविमर्श एव प्रामुख्येणोद्दिष्टमस्ति । तदेव प्रमुखमुद्देश्यमाधृत्य समाधेयोद्देश्यत्वेनास्यालेखस्योद्देश्यनिर्धारणमित्थं विहितमस्ति -

क) रीतेः स्वरूपविषये विद्वन्मतसमीक्षणम्,

ख) रीतिवादिनां मते रीतेः काव्यात्मत्वे हेतुनिरूपणम्,

ग) रसध्वनिवादिनां रीतेः काव्यात्मत्वनिरासविधिनिदर्शनम् ।

**सीमा**

संस्कृतकाव्यशास्त्रपरम्परायां विकसितेषु षट्त्सु सम्प्रदायेषु रीतिसम्प्रदायोऽन्यतमः । वामनप्रवर्तितः स सम्प्रदायः पदरचनारूपाया रीतेः काव्यात्मत्वं स्वीकरोति । तस्या रीतेः स्वरूपनिर्धारणपूर्वकमस्मिन्नालेखे रीतेः काव्यात्मत्वविमर्शो विधीयते । तदर्थमत्र भरतादारभ्य जगन्नाथान्तानां काव्यशास्त्रिणां प्रायेण समेषामपि विदुषां काव्यशास्त्रेषु वर्तमाना रीतिसम्बद्धा विषयाः समीक्षिताः सन्ति । अत्र रीतेः स्वरूपसम्बद्धास्तस्याः काव्यात्मत्वसम्बद्धाश्च प्रसङ्गा अध्ययनविषयीकृताः सन्ति । रीतेरन्यैस्तत्त्वैः सह साम्यवैषम्ययोर्विमर्शोऽत्र विहितो नास्ति, पुनरत्र काव्येषु प्रयुक्तानां रीतीनां समीक्षणं च विहितं नास्ति, एवं चात्र रीतिप्रयोगस्योदाहरणानि च प्रस्तुतानि न सन्ति । अयमेवास्यालेखस्य सीमा विद्यते ।

**अध्ययनविधिः**

रीतेः सस्वरूपं काव्यात्मत्वस्य समीक्षणमूलेऽस्मिन्नध्ययने सामग्रीसङ्कलनाय पुस्तकालयविधिः प्रयुक्तो विद्यते । पुस्तकालयविधिप्रयोगे च भौतपुस्तकालयेन साकं साञ्जालिकपुस्तकालयस्याप्युपयोगोऽत्र विहितोऽस्ति । तथा सङ्कलितानां सामग्रीणां विश्लेषणेनात्रोक्तानां समस्यानां समाधानार्थं यत्नो विहितो वर्तते । नाट्यशास्त्रम्, काव्यालङ्कारः, काव्यादर्शः, रुद्रटालङ्कारः, ध्वन्यालोकः, काव्यमीमांसा, काव्यप्रकाशः, साहित्यदर्पणः, रसगङ्गाधर इत्यादयो ग्रन्थाः, काव्यतत्त्वविश्लेषका काव्यात्ममीमांसा, काव्यविच्छित्तिमीमांसा इत्यादयो ग्रन्थाः, रीतिनिरूपकाः केचनालेखाश्चास्यालेखस्य निर्माणे सामग्रीत्वेन कृतोपयोगा विद्यन्ते । वामनभरतादीनां रीतिस्वरूपप्रस्तुतौ विश्लेषणविधेरुपयोगे विहितेऽपि प्रायेणात्र विविधविदुषां सोहापोहं मतसमीक्षणे तुलनात्मकविधिरेव बहुधा प्रयुक्तोऽस्ति उक्तैर्विधिभिरुक्तानां सामग्रीणां सत्यापनेनात्र निष्कर्षणं विहितमस्ति ।

**व्युत्पत्तिदृशा रीतिस्वरूपम्**

'रीयते' इति विग्रहे प्रस्रवणार्थकाद् रीङ्धातोः 'क्तिच्क्तौ संज्ञायाम् (अष्टाध्यायी ३/३/१७४)' इति सूत्रेण क्तिच्प्रत्ययविधानेनोत 'स्त्रियां क्तिन्' इति सूत्रेण क्तिन्प्रत्ययविधानेन च रीतिशब्दो निष्पद्यते। 'रीणन्ति गच्छन्त्यस्यां गुणा इति, रीयते क्षरत्यस्यां वाङ्मधुरधारा वा रीतिः' इति रीत्यर्थं प्रतिपादयता काव्यालङ्कारकामधेनुटीकाकारेण श्रीगोपेन्द्रत्रिपुरहरभूपालेनाधिकरणार्थे क्तिन्प्रत्ययविधानेन रीतिशब्दस्य निष्पत्तिर्निर्दिष्टा वर्तते (वामन ई. १९४१, पृ. १५)। रीतिशब्देनारकूटः, प्रचारः, स्यन्दः, लोहकिट्टम्, दग्धस्वर्णादिमलम्, सीमा, स्रवणम्, गतिः, स्वभावः, रूपम्, लक्षणम्, भावः, आत्मा, प्रकृतिः, सहजः, रूपतत्त्वम्, धर्मः, सर्गः, निसर्गः, शीलम्, सत्त्वम्, संसिद्धिः, स्तुतिरित्याद्या अर्था अवबोध्यन्ते (राधाकान्तदेवबहादुर वि.सं. २०८१, पृ. १६२)। काव्यशास्त्रे रीतिर्वामनाचार्येण काव्यात्मत्वेन प्रतिपादितं काव्यतत्त्वमस्ति, यत् पूर्ववर्तिनां काव्यशास्त्रिणां प्रवृत्ति-मार्ग-वृत्त्यादीनामाधारे स्थापितं विद्यते पश्चवर्तिभिश्च प्रायेण सर्वैरपि यस्य विषये सुव्याख्यातं विद्यते।

**वामनपूर्वकालिकी रीतिः**

रीतिशब्दप्रयोगस्येतिहासज्ञानस्येच्छा यदि मनसि जायते तर्हि वैदिकवाङ्मयमवश्यमेवालोडनीयम्। ऋग्वेदे बहुत्र रीतिशब्दस्य प्रयोगः प्राप्यते। 'यो गा उदाजत्स दिवे वि चाभजन्महीवरीतिः शवसासरत् पृथक् (ऋग्वेदः २/२४/१४)' इत्यत्र स्रवणार्थकाद् रीङ्धातोर्निष्पन्नो रीतिशब्दो धारार्थे प्रयुक्तो विद्यते। एवं 'वातेवाजुर्यानद्येवरीतिरक्षी इव चक्षुषा यातमर्वाक् (ऋग्वेदः २/३९/५)' इत्यत्र गत्यर्थकाद् रीङ्धातोर्निष्पन्नस्य रीतिशब्दस्य प्रयोगो मार्गार्थे विहितोऽस्ति। एवं च 'तामस्य रीतिपरशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः (ऋग्वेदः ५/४८/४)' इत्यत्र अभिमत्यर्थे रीतिशब्दः प्रयुक्तो विद्यते चेत् 'श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् (ऋग्वेदः ६/१३/१)' इत्यत्र सृष्टिकर्त्रर्थे रीतिशब्दस्य प्रयुक्तिः प्राप्यते। 'वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः (ऋग्वेदः ९/१०८/१०)' इत्यत्रापि रीतिशब्दो गत्यर्थे प्रयुक्तोऽस्ति। न केवलं रीतिशब्द एव, अपि तु रीत्यर्थे काव्यशास्त्रिभिः प्रयुक्तानां प्रवृत्ति-वृत्ति-पथिन्-मार्ग-प्रस्थानादिशब्दानामितिहासोऽपि वेदेनैव सम्बद्धः प्राप्यते (जयमन्तमिश्र ई. २००५, पृ. १५०)।

'रीतिनिर्णयं सुवर्णनाभः (राजशेखरः वि.सं. २०२१, पृ. २) इति राजशेखरस्य वचनानुसारेण सुवर्णनाभनाम्ना विदुषा रीतनिर्णयाख्यो रीतिनिरूपणपरो ग्रन्थो विरचित आसीत्। यद्यपि काव्यमीमांसायां तस्य ग्रन्थस्य नामोल्लेखः प्राप्यते, तथापि क्वचिदपि तस्य ग्रन्थस्य प्राप्तेरसम्भवात् काव्यशास्त्रेतिहासे नाट्यशास्त्रमेव रीतितत्त्वस्य सर्वप्राचीन आधारो मन्यते। आचार्यो भरतो नाट्यप्रवृत्तित्वेन मार्गाणां व्यवस्थापनं विहितवानस्ति। दण्डिभामहयोर्मार्गस्य वामनस्य रीतेश्चाधारः सैव भरतस्य प्रवृत्तिः। भरतानुसारेण प्रवृत्तेश्चातुर्विध्यं वर्तते। उक्तं च भरतेन-

चतुर्विधा प्रवृत्तिश्च प्रोक्ता नाट्यप्रयोगतः।
आवन्ती दाक्षिणात्या च पाञ्चाली चौड्रमागधी॥ (नाट्यशास्त्रम् १४/३६)

संसारस्य विविधदेशे प्रचलितानां परिवेश-भाषाऽऽचारादीनां वार्ताया यथायथं प्रकटनाद् भरतस्तन्नाट्यतत्त्वं प्रवृत्तिनाम्नाऽऽख्यातवानस्ति। प्रवृत्तिं परिभाषयता तेन पुनरुक्तमस्ति- 'पृथिव्यां नाना देशवेशभाषाचारवार्ताः प्रख्यापयतीति प्रवृत्तिः (भरतः ई. १९८४, पृ. १५७)' इति। भरतानुसारेण नाट्यप्रवृत्तेः सम्बन्धो न केवलं भाषया, अपि तु वेशेनाचारेण च

भवति । एतेन प्रवृत्तेः क्षेत्रं रीतिक्षेत्राद् विस्तृता वर्तते । यथा भरतोक्तप्रवृत्तेः सम्बन्धो नानादेशैः सह दृश्यते, तथैव वामनोक्तरीतेः सम्बन्धोऽपि विविधैर्भूभागैः सह दृश्यते । अतो वामनोक्तरीतेर्विकासे भरतोक्तप्रवृत्तिर्नितरां साहाय्यकारिणी विद्यते।

काव्यभेदप्रदर्शनक्रमे वैदर्भ-गौडमार्गयोः सङ्केतं विधाय तथा वैदर्भगौडादिक्रमेण काव्यमार्गपृथक्करणं बुद्धिहीनानां कार्यं मतवानस्ति भामह एवम्-

वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
तदेव च किल ज्यायः सदर्थमपि नापरम्॥
गौडीयमिदमेतत्तु वैदर्भमति किं पृथक्।
गतानुगतिकन्यायान्नानाख्येममेधसाम्॥ (काव्यालङ्कारः १/३१-३२)

भामहानुसारेण वैदर्भादिमार्गाणामश्मकादिदेशविशेषेण सम्बन्धप्रदर्शनमुचितं नास्ति, यतो हि तन्मते मार्गाणां वैदर्भादिसंज्ञा तु यादृच्छिकी वर्तते (जयमन्तमिश्र ई. २००५, पृ. १५१) । 'विदर्भादिषु दृष्टत्वात् सा समाख्या (काव्यालङ्कारसूत्रम् १/२/१०)' इति सूत्रस्य वृत्तिं कुर्वता वामनेन 'न पुनर्देशैः किञ्चिदुपक्रियते काव्यानाम् (वामन ई. १९४१, पृ. १६)' इति वाक्येन भामहस्य तन्मतं समर्थितं विद्यते। गौडदेशस्य कविरपि वैदर्भ्यां रीत्यां लेखनीं चालयति। विदर्भस्य कवयः पाञ्चाल्यां काव्यरचनसामर्थ्यं भजन्ते। पुनः पाञ्चालस्य च कवयो गौड्यां काव्यं रचयितुं पारयन्ते। अतो वामनभामहयोः सोक्तिर्युक्तिमती दृश्यते। एतेन वामनस्य रीतिसिद्धान्तप्रतिपादने भामहनिरूपितस्य मार्गतत्त्वस्य साहाय्यकृत्त्वं नितरामनुभूयते।

दण्डिना काव्यमार्गस्य नैकविधत्वं संसूच्य वैदर्भगौडयोः प्रामुख्यं सङ्केतितमस्ति। उक्तं च तेन-

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदं परस्परम्।
तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ॥ (काव्यादर्शः १/४०)

वैदर्भमार्गं निरूपयितुमिच्छुर्दण्डी श्लेषादीनां दशगुणानामुद्देशं विधाय तेषां वैदर्भमार्गस्य प्राणत्वमुपपादितवान् वर्तते चेद् गौडमार्गे प्रायेण तद्विपरीतत्वं सूचितवानस्ति। तत्कथनमेवं विद्यते-

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः।
एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि॥ (काव्यादर्शः १/४१-४२)

एवं वैदर्भगौडमार्गयोर्भेदनिरूपणानन्तरं काव्यादर्शकारो दण्डी वैदर्भमार्गे श्लेषादीनां स्वरूपं निर्दिश्य 'गौडमार्गे तद्विरीतत्वं कथं सम्पद्यते ?' इति चोपपादितवानस्ति। दण्डिना यथा मार्गाणां स्वरूपं गुणानाधृत्य निर्दिष्टमस्ति, तथैव वामनेन च रीतीनां स्वरूपं गुणानाधृत्यैव निरूपितमस्ति। एवं विचारे वामनो रीतिप्रतिपादनेऽवश्यं दण्डिमतेभ्योऽपि साहाय्यं जग्राहेति ज्ञायते।

विष्णुधर्मोत्तरपुराणानुसारेणापि प्रवृत्तिर्देशभाषानुकरणेन काव्यादिषु प्रवर्तते । सा प्रवृत्तिर्वृत्तीनामाश्रयत्वं वहति । आवन्ती दाक्षिणात्या मागधी पाञ्चाली चेति सा चतुर्विधाऽस्ति (जयमन्तमिश्र ई. २००५, १४८) । इमाश्चतस्रः प्रवृत्तयो बाणभट्टस्य

समये उदीच्य-प्रतीच्य-दाक्षिणात्य-गौडनाम्ना व्यवह्रियन्ते स्म । बाणभट्टानुसारेण उदीच्या प्रवृत्तिः श्लेषभरिता भवति, प्रतीच्याऽर्थगौरवगर्विता भवति, दाक्षिणात्या उत्प्रेक्षयोत्प्रेक्षिता भवति, गौडीया चाक्षराणामाडम्बरेण विलसिता भवति । प्रवृत्तीनां स्वरूपमुपस्थापयता बाणभट्टेन निगदितमस्ति-

श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थगौरवम् ।
उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरः ॥ (हर्षचरितम् १/७)

काव्ये नवीनार्थता, अग्राम्यजातिता, श्लिष्टत्वेऽक्लिष्टत्वम्, स्फुटरसत्वम्, अक्षराडम्बरश्चेत्येषां समेषामेकत्रोपस्थितेर्दुर्लभत्वं संसूच्य प्रवृत्तिनिर्वचनपरेण बाणभट्टेनैवं व्यञ्जनया तदर्थं सत्कवित्वमपेक्षितं वर्तते-

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ॥ (हर्षचरितम् १/८)

बाणेन रीतिशब्दस्तु प्रयुक्तो नास्ति परं रीतेराधारभूतानां गुणालङ्कारादीनामुल्लेखस्तु विहित एव वर्तते । वृत्तिशब्दद्वारा तेन यत् प्रतिपादितं तत् तु रीतेः स्वरूपादिनिर्देशाय साहाय्यमवश्यं करोत्येव । विष्णुधर्मोत्तरपुराणस्यैतत्सम्बद्धविषयास्तु प्रायेण भरतोक्ताभिः प्रवृत्तिभिः साम्यं भजन्त एव । अत एवं विमर्शे वामनेन पूर्वजानां पृष्ठभूमावेव रीतितत्त्वस्य निरूपणं विहितं दृश्यते ।

**वामनस्य रीतिः**

दण्डिभामहाभ्यां साङ्गोपाङ्गं प्रतिपादितस्य मार्गतत्त्वस्य भरतेन प्रतिपादितस्य प्रवृत्तितत्त्वस्य च स्वरूपभेदादिषु स्वानुकूलं किमपि परिवर्तनं विधायाचार्येण वामनेन रीतिस्वरूपस्य तत्प्रभेदमहत्त्वादीनां सौस्थिर्याय महान् यत्नो विहितो दृश्यते (काव्यात्ममीमांसा, पृ. १४५) । काव्यस्य मूलतत्त्वस्यात्मशब्देन निर्देशः सर्वप्रथमं वामनेनैव विहितः प्राप्यते । तेन रीतितत्त्वस्य काव्यात्मत्वं प्रतिपादयितुं 'रीतिरात्मा काव्यस्य (काव्यालङ्कारसूत्रम् १/२/६)' इति सूत्रं निर्दिष्टमस्ति । वामनानुसारेण यथा प्राणिनां शरीरस्य सञ्चालकमात्मतत्त्वं भवति, तथैव शब्दार्थशरीरस्य काव्यस्याप्यात्मतत्त्वं रीतिरेवास्ति । कथयत्यत्र वृत्तिकारः- 'रीतिर्नामेयमात्मा काव्यस्य शरीरस्येवेति वाक्यशेषः (वामन ई. १९४१, पृ. १४) । कथं रीतेः काव्यत्वमिति प्रतिपादयता टीकाकृता भूपालेन पुनर्निगदितमस्ति- 'करङ्कगात्रकल्पककर्कशतर्कवाक्यवैलक्षण्यप्रकटनप्रगल्भः कश्चन स्फुरत्ताहेतुस्वभावोऽत्रात्मेत्युच्यते (वामन ई. १९४१, पृ. १५) । 'रीतिरात्मास्ति चेत् किं तच्छरीरस्वरूपम् ?' इति जिज्ञासां समादधानो भूपालः पुनः स्पष्टीकृतवान् वर्तते- 'अशरीरभूतस्यात्मावच्छेदकत्वासम्भवादित्याशङ्क्य शब्दार्थयुगलं शरीरम्, तस्याधिष्ठाता रीतिर्नामात्मेत्युपपत्तिमुन्मीलयितुमाकाङ्क्षितपदमापूरयति (वामन ई. १९४१, पृ. १५) । 'का च रीतिरिति शङ्कां समादधानो वामनो निगदितवानस्ति- 'विशिष्टपदरचना रीतिः (काव्यालङ्कारसूत्रम् १/२/७) । विशिष्टत्वं विशेषवत्त्वम् । कश्चासौ विशेषः ? कथितवानस्त्यत्र वामनः- 'विशेषो गुणात्मा (काव्यालङ्कारसूत्रम् १/२/८)' इति अर्थात् वक्ष्यमाणगुणरूपो विशेषः (वामन ई. १९४१, पृ. १५) । स च गुणः काव्यशोभाकृद् धर्मः (काव्यालङ्कारसूत्रम् ३/१/१) । तेन काव्यशोभाकृता धर्मेण विना शब्दार्थयोः न कथञ्चन काव्यत्वापत्तिर्भवति, यतो हि गुणालङ्कारसंस्कृतयोः शब्दार्थयोरेव काव्यता सम्पद्यते (वामन ई. १९४१, पृ. ३) । एतेन ज्ञायते काव्यशोभायाः कर्तृत्वरूपगुणविशिष्टा पदरचनैव रीतिरस्ति, या वामनद्वारा काव्यात्मत्वेन स्वीकृता विद्यते । अस्यामेव रीत्यां रेखासु चित्रमिव काव्यं समाहितं भवति (वामन ई.

१९४१, पृ. २१)। चित्रं केवलं रेखामयं भवति, चित्रे रेखामतिरिच्य कोऽपि तात्त्विकः पदार्थो न भवति। रेखाया अपाकरणे चित्रस्याप्यस्तित्वं समाप्यते। एवमेव काव्ये रीतिमतिरिच्य न किमपि तत्त्वं भवति। रीत्यभावे काव्यत्वमपि न सम्भवति। यथा चित्रे रेखाया आत्मत्वं भवति, तथैव सर्वप्रधानत्वात् काव्ये रीतिरेव काव्यात्मा सम्पद्यते।

रीतेर्वैदर्भी-गौडी-पाञ्चालीभेदात् त्रिविधत्वं वामनेन स्वीकृतमस्ति (काव्यालङ्कारसूत्रम् १/२/९)। तत्र वैदर्भी समग्रगुणा भवति (काव्यालङ्कारसूत्रम् १/२/११)। अतो वैदर्भी सर्वग्राह्या रीतिरस्ति। कथयति च वामनोऽत्र- 'तासां पूर्वा ग्राह्या गुणसाकल्यात् (काव्यालङ्कारसूत्रम् २/१/१४)' इति। विशेषतोऽर्थगुणानां समेषामपि सौन्दर्यं वैदर्भ्यामेव रीत्यामास्वाद्यं भवति (काव्यालङ्कारसूत्रम् १/२/२०)। वैदर्भ्या रीत्याः संसर्गेणैव तुच्छोऽप्यर्थ आस्वाद्यो भवति (काव्यालङ्कारसूत्रम् १/२/२१)। अनेनापि प्रसङ्गेन रीतेः काव्यात्मत्वं सिद्ध्यति। काव्येऽर्थप्रौढिरोजोगुणेन (काव्यालङ्कारसूत्रम् ३/२/२), उक्तिवैचित्र्यं माधुर्यगुणेन (काव्यालङ्कारसूत्रम् ३/२/११), नूतनार्थकल्पना समाधिगुणेन (काव्यालङ्कारसूत्रम् ३/२/७), रसप्रकर्षः कान्तिगुणेन (काव्यालङ्कारसूत्रम् ३/२१५), अर्थस्य विमलता च प्रसादगुणेन (काव्यालङ्कारसूत्रम् ३/२/३) चान्तर्गच्छन्ति। एते सर्वेऽपि गुणा वैदर्भ्या रीत्यैव परिष्कारं यान्ति, यतो ह्यर्थगुणस्य लेशोऽपि वैदर्भ्या एवास्वाद्यतां याति। तेनार्थगुणस्यास्वाद्यतां सम्पादयमाना रीतिरेव काव्यस्यात्मत्वं बिभर्ति (जयमन्तमिश्र ई. २००५, पृ. १४६)। वामनेन काव्ये रीत्यतिरिक्तस्य वस्तुनोऽस्तित्वं तु स्वीकृतं वर्तते, परं वामनानुसारेण तस्यापि वस्तुनश्चमत्कृती रीतिमतिरिच्य न केनापि सम्भवति। अतो वामनमते रीतिरात्मा काव्यस्य सम्पद्यते।

काव्यालङ्कारसूत्रस्य 'तदुपारोहादर्थगुणलेशोऽपि (काव्यालङ्कारसूत्रम् १/२/२१)' इति सूत्रस्य वृत्तिं कुर्वता वामनेन निगदितमस्ति-

किन्त्वस्ति काचिदपरैव पदानुपूर्वी यस्यां न किञ्चिदपि किञ्चिदिवावभाति।
आदन्दयत्यथ च कर्णपथं प्रयाता चेतः सताममृतवृष्टिरिव प्रविष्टा॥ (वामन ई. १९४१, पृ. २५)

एतदनुसारेण वैदर्भ्यां रीत्यां तादृश्यलौकिकी पदरचनाशक्तिरस्ति, यत्र निबद्धं सत् तुच्छमपि वस्तु चमत्कामरमयं भवति, असदपि वस्तु सदिव प्रतिभाति, सामान्यमपि वस्तु अलौकिकमनुभूयते। तादृशं वस्तु सहृदयानां कर्णगोचरं भूत्वा तद्धृदयं पीयूषवृष्ट्येवाह्लादयति। शब्दसौन्दर्यं काव्ये वैदर्भीं रीतिं प्राप्य चमत्कारातिरेकं प्राप्नोति। नीरसोऽपि विषयो वैदर्भ्या रीत्या सरसो विधीयते। वैदर्भ्या रीत्या माध्यमेन काव्ये सहृदयहृदयानामाह्लादनक्षमा काचिदनिर्वचनीया शब्दचमत्कृतिरुपतिष्ठति, यत्र शब्दशोभा नितरां नरीनृत्यति। कथयति चास्मिन् सन्दर्भे पुनर्वृत्तिकारो वामनः-

वचसि यमभधिगम्य स्पन्दते वाचकश्रीर्वितथमवितथत्वं यत्र वस्तु प्रयाति।
उदयति हि स तादृक् क्वापि वैदर्भरीतौ सहृदयहृदयानां रञ्जकः कोऽपि पाकः॥ (वामन ई. १९४१, पृ. २५)

एवं वैदर्भीप्रमुखाणां रीतीनां महिमानं बहुत्र सम्पादयता वामनेन काव्यतत्त्वेषु रीतेः सर्वोत्कर्षः सूचितो विद्यते।

**वामनोत्तरकालिकी रीतिः**

अनुप्रासस्य स्वरूपप्रभेदादीनां वर्णनक्रमे उद्भटेन परुषा, उपनागरिका, कोमला (ग्राम्या) चेति तिस्रो वृत्तय उल्लिखिता विद्यन्ते (जयमन्तमिश्र ई. २००५, पृ. १५१)। सा वृत्तिः प्रायेण वामनाभिमतरीत्या साम्यं भजते।
रीतेर्विषये रुद्रटेन नवीन आयाम उपस्थापितो विद्यते। उद्भटो वृत्तिशब्देनैव रीतिविचारं कृतवानस्ति। 'नाम्ना वृत्तिर्द्वेधा भवति

समासासमासभेदेन' इति कथयता तेन पदानां समासावस्थां विचार्य वैदर्भ्यादीनां रीतीनां निरूपणं विहितं वर्तते । प्रथमं समासाऽसमासा चेति वृत्तेर्द्वैविध्यं प्रदर्श्य स समासायां वैदर्भ्याः, असमासायां च पाञ्चाली-लाटी-गौडीनां स्थापनं विहितवानस्ति (रुद्रटालङ्कारः २/३) । तन्मते स समासस्य सर्वथाऽभावे वैदर्भी रीतिर्भवति (रुद्रटालङ्कारः २/६), द्वित्राणां पदानामेव समासे पाञ्चाली वृत्तिर्भवति, पञ्चषाणां पदानां समासे लाटी रीतिर्भवति, यथाशक्ति दीर्घसमासप्रयोगे च गौडी रीतिर्भवति (रुद्रटालङ्कारः २/४) । रुद्रटेन रीतिविचारे रसविशेषेण रीतिविशेषस्य सम्बन्धश्चोपस्थापितो विद्यते । तदनुसारेण श्रृङ्गाररसाभिव्यक्तये माधुर्य-लालित्यगुणाभ्यां समन्विताया वैदर्भ्याः पाञ्चाल्या रीतेः प्रयोगः कार्यः (रुद्रटालङ्कारः १४/३७) । एवं प्रेयःकरुणभयानकाद्भुतानां रसानामभिव्यक्तयेऽपि वैदर्भी पाञ्चाली वा रीतिः प्रयोज्या, रौद्राभिव्यक्तये तु लाटीया गौडीया वा रीतिः प्रयोज्या (रुद्रटालङ्कारः १५/२०) । एवं रीतिविचारे रुद्रटो वामनादिभिः प्रेरितोऽपि स्वीयां नवीनामुद्भावनां प्रस्तुतवान् विद्यते ।

अग्निपुराणस्य रीतिविचारोऽपि रुद्रटेन साम्यं भजते, यतो हि सोऽपि समासमाधृत्य रीतिविचारं प्रस्तुतवानस्ति । स रीतिगुणयोर्मिथो न किमपि तारतम्यं प्रदर्शितवानस्ति । तदनुसारेण वाग्विद्यायाः सम्प्रतिज्ञाने रीतिरुत्पद्यते, सा पाञ्चाली, गौडी, वैदर्भी, लाटी चेति त्रिविधा वर्तते (अग्निपुराणम् ३४०/१) । अग्निपुराणं विश्वकोशत्वेन विराजमानं विविधविषयाणां सङ्ग्रहरूपं पुराणमस्ति । केचिद् विद्वांसोऽस्य सङ्ग्रहः काले काले जात इति मन्वते । तेनास्य पुराणस्य काव्यशास्त्रसम्बद्धो भागोऽपि कालदृशा सुनिश्चितो नास्ति । अतो लाट्या रीतेरुद्भवकर्तृत्वं विद्वांसो रुद्रटे निदधति (जयमन्तमिश्र ई. २००५, पृ. १५२) ।

आनन्दवर्धनस्य रीतिविचारोऽपि समासाधृत एवास्ति । स सङ्घटनाशब्देन रीतेः स्वरूपादिकं प्रदर्शितवान् विद्यते । वामनोऽसमासा, मध्यमसमासा, दीर्घसमासा चेति सङ्घटनायास्त्रैविध्यं प्रदर्शितवानस्ति (आनन्दवर्धनः ई. २०१३, ३/५) । सङ्घटनास्वरूपं प्रदर्शयताऽऽनन्दवर्धनेन समुदीरितमस्ति-

गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा ।
रसांस्तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः ॥ (ध्वन्यालोकः ३/६) इति ।

आनन्दवर्धनानुसारेण तादृशी गुणाधृता रसानुकूला च पदरचना सङ्घटना वर्तते, यस्याश्च हेतुत्वं वक्तृवाच्ययोरौचित्ये विद्यमानं भवति । कारिकामिमां विवृण्वानेनानन्दवर्धनेन गुणसङ्घटनयोः सम्बन्धस्य विषयेऽनेके विकल्पा एवमुपस्थापिताः सन्ति- "अत्र च विकल्प्यं गुणानां सङ्घटनायाश्चैक्यं व्यतिरेको वा ? व्यतिरेकेऽपि द्वयी गतिर्गुणाश्रया सङ्घटना सङ्घटनाश्रया वा गुणाः (आनन्दवर्धनः ई. २०१३, पृ. १४५)" इति । आनन्दवर्धनानुसारेण गुणसङ्घटनयोरैक्यपक्षे आत्मभूतान् गुणानाश्रित्य तिष्ठन्ती सङ्घटना रसादीन् व्यनक्ति चेत् सङ्घनाश्रयगुणपक्षे चाधेयभूतान् गुणानाश्रित्य तिष्ठन्ती सङ्घटना रसादीनामभिव्यञ्जनं करोति (आनन्दवर्धनः ई. २०१३, पृ. १४५) । गुणसङ्घटनयोर्भिन्नत्वरूपे गुणाश्रयसङ्घटनापक्षे गुणपरतन्त्रस्वभावा सङ्घटना गुणानाश्रित्य तिष्ठन्ती रसादीन् प्रकटयति (आनन्दवर्धनः ई. २०१३, पृ. १४५) । अस्या विकल्पकल्पनाया औचित्यं प्रकटयता ध्वनिकारेण पुनरुक्तमस्ति- "यदि गुणाः सङ्घटना चेत्येकं तत्त्वं संघटनाश्रया वा गुणाः, तदा संघटनाया इव गुणानामनियतविषयत्वप्रसङ्गः । गुणानां हि माधुर्यप्रसादप्रकर्षः करुणविप्रलम्भश्रृङ्गारविषय एव । रौद्राद्भुतादिविषयमोजः । माधुर्यप्रसादौ रसभावतदाभासविषयावेवेति विषयनियमो व्यवस्थितः, संघटनायास्तु स विघटते । तथाहि श्रृङ्गारेऽपि दीर्घसमासा दृश्यते रौद्रादिष्वसमासा चेति

(आनन्दवर्धनः ई. २०१३, पृ. १४६)" । एवमानन्दवर्धनेन रुद्रटेनेव सङ्घटनाविशेषस्य रसादिविशेषेण सम्बन्धश्चोपस्थापितो विद्यते।

आनन्दवर्धनेन वामनादिवद् रीतिगुणयोरभेदोऽपि स्वीकृतो नास्ति, उद्भटादिवद् रीतेर्गुणाधारत्वं चाङ्गीकृतं नास्ति। तदनुसारेण रीतिर्गुणाश्रिता भवति, सा च समस्तैरसमस्तैर्वा पदैर्गुणानाश्रित्य निर्मिता रीती रसाभिव्यक्तेः माध्यमत्वं भजते। आनन्दवर्धनस्य रीती रसाभिव्यक्तेः साधनत्वं भजमाना सती गुणाश्रितत्वादात्मन्येव सिद्धा न जायते चेद् वामनस्य रीतिरात्मस्थानीयत्वात् स्वस्मिन्नेव सिद्धा वर्तते। रसोपकारिण्या आनन्दवर्धनोपपादिताया रीतेर्नियामकत्वं वक्त्रौचित्ये, वाच्यौचित्ये, विषयौचित्ये रसौचित्ये वा भवति (जयमन्तमिश्र ई. २००५, पृ. १५३)। रीतेरात्मत्वस्यासङ्गतत्वं प्रदर्शयताऽऽनन्दवर्धनेन रीतेरात्मत्वसाधनं काव्येऽस्फुटरूपेण वर्तमानस्य ध्वनितत्त्वस्य व्याख्यानेऽसमर्थानां विदुषां कार्यमिति निर्देश एवं विहितो वर्तते-

अस्फुटस्फुरितं काव्यतत्त्वमेतद् यथोदितम्।
अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः॥ (ध्वन्यालोकः ३/४६)

राजशेखरः प्रवृत्ति-वृत्ति-रीतिषु पार्थक्यं प्रतिपादितवानस्ति। तेनोक्तं वर्तते- 'वेषविन्यासक्रमः प्रवृत्तिः, विलासविन्यासक्रमो वृत्तिः, वचनविन्यासक्रमो रीतिः (राजशेखरः वि.सं. २०२१, पृ. २५)' इति। एवं वचनविन्यासक्रमस्य रीतित्वेन परिभाषणं विहितवतो राजशेखरस्यापि रीत्याधारः समास एव। तदनुसारेण साहित्यविद्यावध्वा अवशंवदत्वे काव्यपुरुषेणोच्चरितानि समासयुक्तानि सानुप्रासानि योगवृत्तिपरम्परागर्भाणि च पदानि गौडीयरीतिनाम्ना प्रचलितान्यभवन् (राजशेखरः वि.सं. २०२१, पृ. २२)। एवं तस्याः साहित्यविद्यावध्वाः किञ्चिद्वशंवदत्वे काव्यपुरुषेणोच्चरितानि स्वल्पसमासयुक्तानि स्वल्पानुप्रासमयानि सोपचारगर्भाणि च पदानि पाञ्चालीरीतिनाम्ना ख्यातानि (राजशेखरः वि.सं. २०२१, पृ. २३)। पुनः साहित्यविद्यावध्वा अत्यन्तं वशंवदत्वे काव्यपुरुषेणोच्चरितानि समासरहितानि स्थानानुप्रासयुक्तानि योगवृत्तिगर्भाणि च वचनानि वैदर्भीरीतित्वेन व्यवहृतान्यभवन् (राजशेखरः वि.सं. २०२१, पृ. २५)। एवं गौड्यां दीर्घसमासानि, पाञ्चाल्यां स्वल्पसमासानि, वैदर्भ्यां चासमासानि पदानि प्रयुज्यन्त इति ज्ञायते। समासाधारेणैव रीतिभेदं प्रतिपादयतोऽपि राजशेखरस्य तत्प्रतिपादनशैली पूर्वेभ्यो भिन्ना दृश्यते।

कुन्तको रीतित्वं मार्गे एव दृष्टवानस्ति। सुकुमार-विचित्र-मध्यमभेदात् कविप्रस्थानहेतोर्मार्गस्य त्रैविध्यं प्रदर्शयता तेनोक्तमस्ति-

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥ (वक्रोक्तिजीवितम् १/२४)

तेन वक्रोक्तिजीविते सुकुमारादिमार्गाणां स्वरूपप्रदर्शनपूर्वकं प्रतिमार्गं माधुर्य-प्रसाद-लावण्य-आभिजात्यादिगुणानां स्वरूपं च निर्धारितमस्ति। कोमलैरसमस्तैः पदैर्विन्यस्तः सुकुमारमार्गो माधुर्यप्रसादलावण्याभिजात्यरूपैश्चतुर्भिरसाधारणैर्गुणैरौचित्यसौभाग्यरूपाभ्यां द्वाभ्यां साधारणगुणाभ्यां च सहितो भवति। विचित्रमार्गेऽलङ्काराधिक्यादाभ्यन्तरगुणापेक्षया बाह्यं चाकचिक्यमाधिक्येन भवति, तेन वक्रोक्तिवैचित्र्यमस्य मार्गस्य जीवनं मन्यते। मध्यममार्गे उक्तयोरुभयोर्मार्गयोर्वैशिष्ट्यानि सौकुमार्यद्वारा वैचित्र्यद्वारा सृष्टाः कृत्रिमा सहजा चोभयात्मिका शोभा लभ्यते (जयमन्तमिश्र ई. २००५, पृ. १५५)। मार्गाणामुत्तममध्यमाधमत्वेन विभजनं कुन्तको नाङ्गीकरोति। उपर्युक्तां

कारिकां विवृण्वानेन कुन्तकेनोदीरितमस्ति- "न च रीतीनामुत्तमाधममध्यमत्वभेदेन त्रैविध्यं व्यवस्थापयितुं न्याय्यम् । यस्मात् सहृदयाह्लादकारिकाव्यलक्षणप्रस्तावे वैदर्भीसदृशसौन्दर्यासम्भवान्मध्यमाधमयोरुपदेश-वैयर्थ्यमायाति (कुन्तक वि.सं. २०३७, पृ. ९८)" । देशाधारेण रीतीनां नामकरणं च नानुचितं मन्वानः कुन्तकः पुनर्निगदितवानस्ति- "तदेवं निर्वचनसमाख्याकरणकारणत्वे देशविशेषाश्रयणस्य वयं न विवदामहे (कुन्तक वि.सं. २०३७, पृ. ९८)" इति । यद्यपि कुन्तकस्य मार्गादिनिरूपणं रीतेरितिहासे नवीनायामस्यायासो विद्यते तथापि विदुषामनुसारेण वामनविहितरीतीनां कुन्तकविहितमार्गाणां च मध्ये न किमपि पार्थक्यं विलोक्यते, अपि तु तेषां मते वामनस्य वैदर्भ्यादिरीतीनां स्थाने कुन्तकेन सुकुमारादिमार्गाणां स्थापनं केवलं शब्देनैव विहितं विद्यते । तस्य तथाकरणस्य बीजं तूद्भटस्य कोमलादिवृत्तिष्वेव वर्तते (जयमन्तमिश्र ई. २००५, पृ. १५१) ।

'उत्कर्षापकर्षाभ्यां विना पदार्था रससमुत्पादका न भवन्ति । तेन कविभिः पदार्थानामुत्कर्षापकर्षाभ्यामेवालङ्कारविधानं क्रियते' इति विचारं प्रस्तुवता महिमभट्टेन प्रधानभावविवक्षाया एव पदार्थानामुत्कर्षापकर्षयोर्मुख्यकारणत्वं सम्भावितमस्ति । समासस्य पदार्थसम्बन्धाख्यापकत्वात् पदार्थोत्कर्षापकर्षयोरख्यापकत्वाच्च समस्तेषु पदेषु भावस्य विवक्षा न भवतीति महिमभट्टस्य विचारो वर्तते (जयमन्तमिश्र ई. २००५, पृ. १५६) । महिमभट्टस्यानुसारेण तादृशस्य समासस्य सर्वथाऽभावात् रीतिषु वैदर्भी एव प्रशस्ता रीतिरस्ति । उक्तं च-

अत एव च वैदर्भी रीतिरेकैव शस्यते ।

यतः समाससंस्पर्शस्तत्र नैवोपपद्यते ॥ (व्यक्तिविवेकः २/१६)

यद्यपि महिमभट्टेन स्वग्रन्थे रीतिर्विषयीकृता नास्ति, तथापि काव्ये समासस्य स्थानं निर्धारयता तेन प्रसङ्गवशात् समासरहिताया वैदर्भीरीतेः प्रशंसा विहिता वर्तते । तेन महिमभट्टस्य रीतिविचारोऽपि समासाधृत एवास्तीत्यनुमातुं शक्यते । पन्थाः, मार्गः, रीतिः इत्येतत्पदत्रयं काव्यशास्त्रे समानार्थं मतवान् भोजराजो निगदितवानस्ति-

वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः ।

रीङ्-गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते ॥ (सरस्वतीकण्ठाभरणम् २/२७)

भोजराजानुसारेण विदर्भादिदेशेषु यः पथिञ्छब्देन बोध्यते, स एव काव्ये मार्गपदेनाभिधीयते । रीङ्धातोर्गत्यर्थकत्वाद् 'रीयन्ते अनया' इति विग्रहे तस्माद् धातोः करणार्थकक्तिन्प्रत्ययेन निष्पन्नो रीतिशब्दोऽपि काव्यशास्त्रे मार्गपर्यायत्वेन गृह्यते (जयमन्तमिश्र ई. २००५, पृ. १५६) । वैदर्भी, पाञ्चाली, गौडीया, अवन्तिका, लाटीया, मागधी चेति रीतेः षड्विधत्वं भोजराजाभिमतमस्ति । उक्तं च-

वैदर्भी साथ पाञ्चाली गौडीयाऽवन्तिका तथा ।

लाटीया मागधी चेति षोढा रीतिर्निगद्यते ॥ (सरस्वतीकण्ठाभरणम् २/२८)

भोजराजो वामनरुद्रटयोर्मतसमन्वयेन गुणसमासयोरुभयोरेवाधारेण रीतिनिर्णयं विहितवानस्ति । स वामनाभितानां गुणानां रुद्रटाभिमतानां समस्तत्वादीनां च युगपत्सन्निवेशं वैदर्भ्यादीनां स्वरूपनिर्णये कृतवान् विद्यते । तदनुसारेण वैदर्भी समग्रगुणा समासरहिता च भवति (सरस्वतीकण्ठाभरणम् २/२९), पाञ्चाली ओजःकान्तिविरहिता पञ्चषाणां पदानां समासयुता च भवति (सरस्वतीकण्ठाभरणम् २/३०), गौडीया यथाशक्त्यधिकपदानां समासयुता ओजःकान्तगुणान्विता च भवति (सरस्वतीकण्ठाभरणम् २/३१), अवन्तिका पाञ्चालीवैदर्भ्योर्मध्यवर्तिनी भवति (सरस्वतीकण्ठाभरणम् १/३२),

लाटीया विविधरीतिमिश्रिता भवति चेत् पूर्वोक्तासु कस्याश्चिदारम्भे परमनिर्वाहे मागधी रीतिर्भवति (सरस्वतीकण्ठाभरणम् २/३३)। एवं भोजराजो रीतिनीर्णये समन्वयवादी दरीदृश्यते।

मम्मटस्य रीतिविचारे वामनोद्भटयोः समन्वयो दृश्यते । वृत्त्यनुप्राससन्दर्भे वृत्तिविचारं कुर्वता मम्मटेनोद्भटमतस्वीकारेण उपनागरिका, परुषा, कोमला चेत तिस्रो वृत्तयः स्वीकृताः सन्ति। तदनुसारेण माधुर्यव्यञ्जकानां वर्णानां प्रयोगे उपनागरिका वृत्तिर्भवति, ओजःप्रकाशकानां वर्णानां प्रयोगे परुषा वृत्तिर्भवति, अन्येषां वर्णानां प्रयोगे तु कोमला वृत्तिर्भवति। उक्तं च-

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते।
ओजःप्रकाशकैस्तैस्तु परुषा कोमला परैः। (काव्यप्रकाशः ९/८०)

उद्भटानुसारेण वृत्तिस्वरूपादिप्रतिपादनानन्तरं मम्मटो वामनस्य रीतिविचारं विचार्य उपनागरिकाया वैदर्भीत्वम्, परुषाया गौडीत्वम्, कोमलायाश्च पाञ्चालीत्वं प्रमाणितवानस्ति। उक्तमस्ति तेन- 'केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः (काव्यप्रकाशः ९/८१)'। एवं रीतिविचारे मम्मटो वामनोद्भटयोः समन्वयं विहितवान् वर्तते।

सङ्घटनाशब्देन रीतिविचारं कुर्वन्नलङ्कारसर्वस्वकारो रुय्यको गुणानां सङ्घटनाया धर्मत्वेन ग्रहणं विहितवान् वर्तते। स साहित्यमीमांसायां वैदर्भी-आवन्ती-पाञ्चाली-गौडीरूपाणां चतसृणां सङ्घटनानां स्वरूपं प्रवर्ण्य तेषां रसविशेषेण सम्बन्धं च प्रदर्शितवान् विद्यते (जयमन्तमिश्र ई. २००५, पृ. १५७)।

वाग्भटो रुद्रटमनुसृत्य समासाधारेण रीतिविचारं विहितवानस्ति। तदनुसारेण गौडीया बहुपदसमासा भवति चेद् वैदर्भी समासरहिता भवति (जयमन्तमिश्र ई. २००५, पृ. १५७) । हेमचन्द्रेण मम्मटमनुसृत्योक्तं वर्तते- 'माधुर्यौजःप्रसादव्यञ्जकाश्च वर्णा उपनागरिका परुषा कोमला च वृत्तिराचक्षते, वैदर्भी गौडीया पाञ्चाली चेति रीतय इत्यन्ये (हेमचन्द्र ई. १९२८, पृ. २९२) । अत्र हेमचन्द्रेण मम्मटोक्तो वृत्तिविचारोऽपि समुद्धृतो विद्यते । नरेन्द्रप्रभसूरिणा वृत्त्यनुप्रासप्रसङ्गे उपनागरिकादीनां वृत्तीनामाधारेण त्रिविधस्यानुप्रासस्य वर्णनं विहितमस्ति । पुनस्तेन कार्णाट्यादीनामेकादशवृत्तीनां स्वाभिमतानां स्वरूपं च प्रतिपादितं विद्यते (जयमन्तमिश्र ई. २००५, पृ. १५८) । राजशेखरमनुसृत्य वचनविन्यासक्रममेव रीतित्वेन स्वीकृतवान् शारदातनयो रीतेश्चातुर्विध्यमेवं प्रतिपादितवान् विद्यते-

रीतिर्वचनविन्यासक्रमः सापि चतुर्विधा।
तत्र वैदर्भपाञ्चाललाटगौडविभागतः॥ (भावप्रकाशनम् १/८४)

रीतेश्चातुर्विध्यं पूर्ववर्तिनां सम्माने उक्तवानपि स पुनः सौराष्ट्री द्राविडी चेति रीतिद्वयस्य पुनर्नामोल्लेखनं विधाय (भावप्रकाशनम् १/८४) देशानुसारेण रीतेर्बहुविधतां सङ्केतितवान् विद्यते । तेनोक्तमस्ति- 'तत्तद्देशीयरचननारीतिस्तद्देशनामभाक् (भावप्रकाशनम् १/८५)। शारदातनयः पूर्ववर्तिनां काव्यशास्त्रिणां विचारविमर्शं कृत्वा पञ्चोत्तरशतसङ्ख्यकानां रीतीनां सङ्केतं विहितवानस्ति, परं ग्रन्थविस्तरभयेन स तेषां स्वरूपादिकं प्रतिपादितवान् न विद्यते। प्रत्येकं पुरुषाणां प्रतिवचनं रीतिभेदाद् यथार्थतो वर्णने रीतीनामानन्त्यं भवतीति विस्तरभयात् पूर्ववर्तिभी रीतेश्चातुर्विध्यं सङ्केतितमिति रीतिविचारे शारदातनयस्य निष्कर्ष एवंविधो वर्तते-

पुंसि पुंसि विशेषेण कापि कापि सरस्वती।
तस्माच्चतुर्धा बोद्धव्या रीतिभेदप्रकल्पना॥ (भावप्रकाशनम् १/८५)

वामनस्य श्लेषादिगुणानां रुद्रटस्य समस्तादिशब्दानां मम्मटस्य माधुर्यादिगुणानां चाधारेण रीतेः स्वरूपं तद्भेदादिकं च प्रस्तुतवान् योगी अमृतानन्दोऽपि वामनवद् रीतेः काव्यात्मत्वं स्वीकृतवान् विद्यते । स रीतेश्चातुर्विध्ये दृढो दृश्यते । तेनोक्तमस्ति-

रीतिरात्मात्र काव्यस्य कथ्यते सा चतुर्विधा ।

वैदर्भी च तथा गौडी पाञ्चाली लाटिकेति च ॥ (अलङ्कारसङ्ग्रहः ५/१)

योगी त्रयाणामेव पूर्ववर्तिनां विदुषां वामन-रुद्रट-वामनानां मतसमन्वयेन वैदर्भ्यादीनां स्वरूपं यथायथं प्रतिपादितवान् वर्तते । रीतिविमर्शे चन्द्रालोककारो जयदेवो रुद्रटमनुसृतवान् विद्यते चेदेकावलीकारो विद्याधरश्च वामनमनुसृतवानस्ति । जयदेवेन यथायथं रुद्रटमतोऽङ्गीकृतो विद्यते, परं विद्याधरेण वामनस्य तिसृषु रीतिषु स्वाभिमता तिस्रो रीतयः संयोजिता विद्यन्ते (जयमन्तमिश्र ई. २००५, पृ. १५९-१६०) । तदनुसारेण वैदर्भी-पाञ्चाली-गौडीनां स्वरूपं वामनाभिमतमेवास्ति चेत् तासां साङ्कर्येण लाटी, आवन्ती, मागधी चेति तिस्रो रीतयो जायन्ते (जयमन्तमिश्र ई. २००५, पृ. १६०) ।

अग्निपुराणकारस्य राजशेखरस्य च विचारविलोडनं कृतवता शिङ्गभूपालेन ताभ्यामिव रीतिं बुद्ध्यारम्भं मत्वा सा पदविन्यासभङ्गिरूपा स्वीकृता विद्यते । तन्मते कोमला, कठिना, मिश्रा चेत रीतिस्त्रिविधा वर्तते । तेनोक्तमस्ति-

बुद्ध्यारम्भास्तथा प्रोक्ता रीतिवृत्तिप्रवृत्तयः ।

रीतिः स्यात् पदविन्यासङ्गी सा तु त्रिधा मता ॥ (रसार्णवसुधाकरः १/२२७)

एतेन विदुषा गुणाधारेण, समासाधारेण, माधुर्यादिव्यञ्जकानां वर्णानामाधारेण च कोमलादीनां तिसृणामेव रीतीनां स्वरूपादिकं प्रतिपादितमस्ति । तासां कोमलादीनां रीतीनां वैदर्भ्यादिनामकरणे हेतुत्वं च तेन यथायथं निरूपितमस्ति (जयमन्तमिश्र ई. २००५, पृ. १६१) । तेन देशाधृतानां सौराष्ट्र्यादीनामन्यासां रीतीनां च नाम्ना सङ्केतं विधाय ग्रन्थविस्तरभयात् तेषां स्वरूपादिकं निर्णीतं नास्ति (रसार्णवसुधाकरः १/२४१) । शिङ्गभूपालानुसारेण प्रतिकाव्यं तान्येव पदानि ते एव चार्था भवन्ति, परं तत्र नव्यतां रीतिरेवानयति । उक्तं च-

त एव पदसङ्घातास्ता एवार्थविभूतयः ।

तथापि नव्यं भवति काव्यं ग्रथनकौशलात् ॥ (रसार्णवसुधाकरः १/२४२)

शिङ्गभूपालस्य रीतिविचारे यद्यपि मौलिकता नास्ति, तथापि स्पष्टता तत्प्रतिपादितेषु रीतिसम्बद्धेषु सर्वेषु विषयेषु वर्तते (जयमन्तमिश्र ई. २००५, पृ. १६१) । वामनभिमता एव वैदर्भ्याद्यास्तिस्रो रीतीः स्वीकृतवान् विद्यानाथो गुणयुक्तायाः पदसङ्घटनाया रीतित्वेन परिभाषणमेवं विहितवानस्ति-

रीतिर्नाम गुणाश्लिष्टपदसङ्घटना मता । (प्रतापरुद्रीयम् २/२७)

विद्यानाथानुसारेण रीतय आत्मनः स्वभावा इव भवन्ति । यथा स्वभावा आत्मन उत्कर्षं वर्धयन्ति, तथैव रीतयोपित रसस्योत्कर्षं वर्धयन्ति । यथा स्वभावा शौर्यादिभिर्गुणैरुपकृता भवन्ति, तथैव रीतयोऽपि माधुर्यादिगुणैरुपक्रियन्ते । उक्तं च-

श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः ।

आत्मोत्कर्षावहास्तत्र स्वभावा इव रीतयः ॥ (प्रतापरुद्रीयम् २/३)

विद्यानाथेन वैदर्भ्यादीनां रीतीनां स्वरूपाणि च प्रायेण वामनमनुसृत्यैव प्रतिपादितानि सन्ति । अतो विद्यानाथो

रीतिविमर्शे वामनमनुसरन् प्रतीयते।

यथा विशिष्टाऽवयसवसङ्घटना शरीरान्तर्वर्तिन आत्मतत्त्वस्योपकर्त्री भवति, तथैव पदसङ्घटनारूपा रीतिरपि काव्यात्मभूतस्य रसस्योपकारिका भवतीति विचारो विश्वनाथस्य वर्तते । सोऽपि वैदर्भी, गौडी, पाञ्चाली, लाटी चेति रीतेश्चातुर्विध्यं स्वीकृतवानस्ति। तेनोक्तं वर्तते-

पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्।

उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा॥ (साहित्यदर्पणः ९/१)

विश्वनाथानुसारेण यथा सुसङ्घटितः शरीरावयवविन्यासविशेषः सौन्दर्याधायकत्वेन आत्मन उत्कर्षं ख्यापयति, तथैव समुचितपदसङ्घटनाविशेषोऽपि काव्यसौन्दर्यं जनयन्ती काव्यात्मभूतस्य रसस्योत्कर्षमुत्कर्षयति। सैव रसोत्कर्षवर्धिनी समुचितपदसङ्घटना रीतिरुच्यते (जयमन्तमिश्र ई. २००५, पृ. १६२)। वैदर्भ्यादीनां रीतीनां स्वरूपप्रतिपादने त्वनेन प्रायो मम्मटमता अभिमताः सन्ति । एतेनापि माधुर्यादिव्यञ्जकवर्णानां समासस्य चाधारेण रीतीनां स्वरूपं निर्धारितं विद्यते (जयमन्तमिश्र ई. २००५, पृ. १६२)।

'रीतिरुक्तिस्तथा मुद्रा वृत्तिः काव्यस्य जीवितम् (अलङ्कारशेखरः १/२/१)' इति कथयताऽलङ्कारशेखरकारेण केशवमिश्रेण च रीतेः काव्यजीवितत्वं स्वीकृतं विद्यते। रीतेर्देशसम्बद्धता तस्या रसोपकारिता च तेन स्वीकृता वर्तते। तदनुसारेण गौडी, वैदर्भी, मागधी चेति रीतित्रयं विद्यते। उक्तं च-

तत्तद्रसोपकारिण्यस्तत्तद्देशसमुद्भवाः।

पद्येषु रीतयो गौडी वैदर्भी मागधी तथा॥ (अलङ्कारशेखरः १/२/२)

केशवमिश्रानुसारेण समासाधिक्ये गौडी, समासनैयून्ये वैदर्भी, गौडीवैदर्भ्योः साङ्कर्ये मागधी रीतिर्भवति । तदनुसारेण केचिन्मागध्या मैथिलीत्वेनापि सम्बोधनं कुर्वन्ति (जयमन्तमिश्र ई. २००५, पृ. १६२)। पण्डिराजो जगन्नाथो रीतिषु केवलं वैदर्भ्याः स्वरूपमेव प्रदर्शितवान् विद्यते। तदनुसारेण दोषरहिता माधुर्यव्यञ्जकवर्णभरिता रसपरिपाककारिणी प्रसादयुता च निर्मातुर्व्युत्पत्तिं प्रदर्शयन्ती रचना वैदर्भी रीतिर्वर्तते। उक्तं च तेन-

एभिर्विशेषविषयैः सामान्यैरपि दूषणै रहिता।

माधुर्यभारभङ्गुरसुन्दरपदवर्णविन्यासा।

व्युत्पत्तिमुद्गिरन्ती निर्मातुर्या प्रसादयुता।

तां विबुधा वैदर्भीं वदन्ति वृत्तिं गृहीतपरिपाकाम्॥ (जगन्नाथः वि.सं. २०६२, पृ. २६३)

पण्डितराजानुसारेण रीतिनिर्माणे कविभिरत्यन्तं सावधानैर्भाव्यम्, कवीनामनवधानतायां काव्ये रसभङ्गो भवति (जगन्नाथः वि.सं. २०६२, पृ. २६४) । केवलं वैदर्भीमेव प्रतिपादयता तेन तत्रैकस्मिन्नेवार्थे रीतिशब्दो वृत्तिशब्दश्च प्रयुक्तोऽस्ति। अतो वैदर्भ्यादिरीतीनामुपनागरिकादिवृत्तीनां चाभेदोऽस्तीति जगन्नाथाभिमतिरनुमातुं शक्या (जयमन्तमिश्र ई. २००५, पृ. १६२) । पण्डितराजस्य केवलं वैदर्भीप्रतिपादनं वीक्ष्य विद्वांसो रीतिविचारे उत्तरोत्तरं ह्रासं चानुमान्ति (जयमन्तमिश्र ई. २००५, पृ. १६२) । एवं रीतिविचारे जगन्नाथो मम्मटमनुसरन् प्रतीयते । अच्युतरायः साहित्यसारे रसोपकारिण्याः पदसङ्घटनाया रीतित्वं प्रतिपादयन् पूर्वाचार्याणां मतानुसरणं विहितवान् विद्यते, वामनादिवत् सोऽपि वैदर्भी, गौडी, पाञ्चाली चेति रीतेस्त्रैविध्यं स्वीकृतवानस्ति। तेनोदीरितं वर्तते-

तत्तद्रसार्हपदसङ्घटना रीतिरीरिता।

वैदर्भी च तथा गौडी पाञ्चाली चेति तत्क्रमात्॥ (साहित्यसारः ७/१३६)

असमासा वैदर्भी, चतुःपदसमासा पाञ्चाली, चतुरधिकपदसमासा गौडीति समासाधृतरीतिनिर्णयं विहितवताऽच्युतरायेण रीतिवृत्त्योर्भेदः प्रतिपादितोऽस्ति (जयमन्तमिश्र ई. २००५, पृ. १६३)।

कवयोऽपि प्रसङ्गेन काव्यशास्त्रसम्बद्धविषयेषु स्वाभिमतं प्रस्तुवन्तो दृश्यन्ते। काव्यस्वरूप-प्रयोजनादिविषये कालिदासभारविमाघादीनां विचाराः काव्यशास्त्रेष्वपि समुदाहृताः सन्ति। रीतेः सन्दर्भेऽपि कवय एवमेव स्वाभिप्रायं प्रकटितवन्तो विद्यन्ते। महाकवेर्माघस्य रीतविचार एवंविधो वर्तते-

म्रदीयसीमपि घनामनल्पगुणकल्पिताम्।

प्रसारयन्ति चतुराश्चित्रां वाचं पटीमिव॥ (शिशुपालवधम् २/७४)

अभिधया तु कविरत्र चतुराणां वाक्पटुतां प्रदर्शयन् वर्तते, परं व्यञ्जनयाऽस्य पद्यस्य कविपरोऽप्यर्थः प्रतीयते। अत्र माघानुसारेण कवयस्तन्तुवाया इव भवन्ति। यथैकप्रकारैरेव तन्तुभिर्विभिन्नास्तन्तुवाया विभिन्नान्येव वस्त्राणि निर्मान्ति, तथैवैकप्रकारकैरेव शब्दैर्विभिन्नाः कवयो विविधानि काव्यानि रचयन्ति (जयमन्तमिश्र ई. २००५, पृ. १६४)। ‘गङ्गावतरणम्’ इति महाकाव्यस्य रचयिता नीलकण्ठदीक्षितोऽपि महाकाव्यस्य प्रथमसर्गे एव रीतिविचारमेवं प्रस्तुतवान् विद्यते-

सत्यर्थे सत्सु शब्देषु सति चाक्षरडम्बरे।

शोभते यं विना नोक्तिः स पन्था इति घुष्यते॥ (गङ्गावतरणम् १/१०)

तस्यानुसारेण शब्दानां सत्त्वेऽपि, अक्षराणां सम्यग्विन्यासे विहितेऽपि च येन विना कथनं शोभायुक्तं न भवति, स एव पन्थाः कथ्यते। पन्था इत्यस्यार्थः काव्यशास्त्रे रीतिर्भवतीति तु भोजराजेनैव व्युत्पादितं विद्यते। ‘वैदर्भी रीतिरास्वाद्येषु प्रथमा विद्यते, यत्रारोहणं कविकौशलस्य परा काष्ठास्ति। एषा रीतिः सरस्वत्या एव निःश्वसितं विद्यते। श्रृङ्गारादयो नवैव रसा अस्यां रीत्यां स्वादुत्वं भजन्ते। वैदर्भीयुक्ता कविवाणी स्वर्गापवर्गयोरानन्दमप्यतिशेते (जयमन्तमिश्र ई. २००५, पृ. १६५)’ इति नीलकण्ठस्याभिप्रायो विद्यते। ‘नवसाहसाङ्कचरितम्’ इति काव्यस्य रचयित्रा पद्मगुप्तपरिमलाख्येन कविना वैदर्भमार्गस्यौपम्यमसिधारया विहितं विद्यते। तेन कालिदासादीनां पथा प्रयाणं तन्मते दुष्करं विद्यते (जयमन्तमिश्र ई. २००५, पृ. १६४)। विक्रमदेवचरितस्य रचयितुर्विल्हणस्यानुसारेण वैदर्भी रीतिः सरस्वत्या विलासभूमिरस्ति, यत्र पदानि सौभाग्यं प्राप्नुवन्ति। एषा रीतिः सहृदयानां श्रोत्रान्तः सुधाया अनभ्रवृष्टिं कुर्वन्ती कस्यचित् सौभाग्यशालिनः कवेरेव रचनायामुदेति (जयमन्तमिश्र ई. २००५, पृ. १६४)। नैषधीयचरिते महाकविना श्रीहर्षेण वैदर्भ्या दमयन्त्या वर्णनव्याजेन वैदर्भ्या रीतेर्वर्णनमेवं विहितं विद्यते-

धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।

इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति॥ (नैषधीयचरितम् ३/११६)

स वैदर्भीं धन्यां मनुते, यतो हि सा स्वस्या उदारैर्गुणैर्नैषधीयचरितमहाकाव्यमप्याकृष्टवती विद्यते (जयमन्तमिश्र ई. २००५, पृ. १६५)। बालरामायणे राजशेखरेण वैदर्भी रीतिः कर्णलेह्यां माधुर्यगुणं निष्यन्दत इत्युट्टङ्कितं विद्यते। तदनुसारेण वैदर्भ्यामेव रीत्यां वाग्देव्या निवासो भवति, कामदेवश्च लीलां विदधाति (जयमन्तमिश्र ई. २००५, पृ. १६५)।

**उपसंहारः**

भरतकृतस्य नाट्यशास्त्रस्य प्रवृत्तितो विकासक्रममारब्धवती रीतिर्भामहस्य, दण्डिनः, विष्णुधर्मोत्तरपुराणस्य, बाणभट्टस्य च मार्गादीनामाधारे विकसिता बभूव । रीतेः परिभाषणं विभाजनादिकं च विधाय काव्यशास्त्रपरम्परायां रीतिसम्प्रदायस्य प्रवर्तनपुरःसरं रीतेः काव्यत्मत्वेन स्थापनं वामनाचार्येण व्यधायि । पश्चवर्तिभिः कैश्चिद् वामनमतस्याङ्गीकारेण कैश्चिच्च तन्मतस्येषत्परिवर्तनेन रीतेः स्वीकारो विहितः । रीतिपरम्पराया अध्ययने न केवलं रीतिवाचकाः शब्दा एव, अपि तु रीतेराधारोऽपि परिवर्तनशीलोऽनुभूयते । वामनात् पूर्ववर्तिभी रीतिः काव्यमार्गत्वेनैव स्वीकृत आसीत्, वामनेन तस्य काव्यात्मत्वकल्पना विहिता, पश्चवर्तिभिश्च पुनरवयवसंस्थानविशेषस्यात्मोपकर्तृत्वमिव रीतेश्च काव्यात्मभूतस्य रसस्योपकारिता स्वीकृता, यतो हि रीतेः काव्यात्मत्वं स्वीकृतवतां काव्यशास्त्रिणां सङ्ख्याऽङ्गुलीगण्यैव वर्तते । वामनानन्तरं योगिनाऽमृतानन्देन केशवमिश्रेण च रीतेः काव्यजीवितत्वमङ्गीकृतं दृश्यते । प्रयोगदृशा ऋग्वेदात् काव्यतत्त्वदृशा च नाट्यशास्त्रादारब्धायां रीतिपरम्परायां प्रायेण समेऽपि काव्यशास्त्रिण उपस्थिता दृश्यन्ते, यतो हि शब्दानां भिन्नत्वेऽपि तत्त्वतो रीतिः प्रायेण सर्वैरपि विद्वद्भिर्विषयीकृताऽस्ति । यद्यपि ध्वनिप्रवर्तनानन्तरं रीतेः शरीरपक्षत्वेन व्यवस्थापनं विधाय काव्यशास्त्रिभी रीतितत्त्वं तावता महत्त्वेन नोपस्थापितमस्ति, तथापि रीतिं पूर्णतोऽतिरिच्य न कोऽपि काव्यशास्त्री काव्यशास्त्रं विरचितवानस्ति । अतो वामनमतमङ्गीकृत्य रीतेरेव काव्यात्मत्वं स्वीकर्तुं यद्यपि न पार्यते तथापि काव्यशास्त्रिणां रीतितत्त्वविमर्शानुशीलनानन्तरं 'रीतिः काव्यसृष्टौ महत्त्वपूर्णाऽस्ति, यस्या अविचारेण काव्यसृष्टिर्न सम्भवति' इति निश्चित्य निष्कृष्य च वक्तुं शक्यते ।

**सन्दर्भग्रन्थसूची**

अच्युतरायः. ई. १९०६. साहित्यसारम्. सम्पा. पणशिखर वासुदेव लक्ष्मण शास्त्री. मुम्बई : तुकाराम जावजी.

अमृतानन्दयोगी. ई. १९४९. अलङ्कारसङ्ग्रहः. सम्पा. के. रामचन्द्र शर्मा भी. कृष्णमाचार्य. मद्रास : अडयर लाइब्रेरी.

आनन्दवर्धनः. ई. २०१३. ध्वन्यालोकः. सम्पा. रेवाप्रसाद द्विवेदी. अनु. रेवाप्रसाद द्विवेदी. वाराणसी : कालिदाससंस्थानम्.

कुन्तकः. वि.सं. २०३७. वक्रोक्तिजीवितम्. अनु. श्री राधेश्याम मिश्र. वाराणसी: चौखम्बा संस्कृत संस्थान.

केशवमिश्रः. ई. १९८४. अलङ्कारशेखरः.सम्पा. अनन्तरामशास्त्री. वाराणसी: चौखम्बा संस्कृत सीरीज अफिस.

जगन्नाथः. वि.सं. २०६२. रसगङ्गाधरः. अनु. डा. शशिनाथ झा विद्यावाचस्पतिः प्रो. डा. श्रीनारायणमिश्रः. प्रथमो भागः. ३ भागाः. वि.सं. २०६२, वाराणसी : चौखम्बा कृष्णदास अकादमी.

जयमन्तमिश्र, डा. ई. २००५. काव्यात्ममीमांसा. वाराणसी : चौखम्बा विद्याभवन.

दण्डी. वि.सं. २०६१. काव्यादर्शः. सम्पा. डा. जमुना पाठक. अनु. डा. जमुना पाठक. वाराणसी : चौखम्बा कृष्णदास अकादमी.

नीलकण्ठदीक्षितः. ई. १९१६. गङ्गावतरणम्. सम्पा. वासुदेव शर्मा केदारनाथशास्त्री. मुम्बई : तुकाराम जावजी.

पाणिनिः. ई. १९९८. अष्टाध्यायी. सम्पा. राजकिशोर मणि त्रिपाठी. गोरखपुर : संस्कृत सेवा संस्थान.

बाणभट्टः. वि.सं. २०२९. हर्षचरितम्. अनु. पं. जगन्नाथपाठकः. वाराणसी : चौखम्बा विद्याभवन.

भरतः. ई. १९८४. नाट्यशास्त्रम्. सम्पा. डा. रविशङ्कर नागर. दिल्ली : परिमल पब्लिकेसन्स.

भामहः. वि.सं. २०४२. काव्यालङ्कारः. अनु. देवेन्द्रनाथ शर्मा. पटना : विहार राष्ट्रभाषा परिषद्.

भोजराजः. ई. १९३४. सरस्वतीकण्ठाभरणम्. सम्पा. वासुदेवशर्मा केदारनाथशर्मा. मुम्बई : पाण्डुरङ्ग जावजी.

मम्मटः. ई. १९५५. काव्यप्रकाशः. अनु. डा. सत्यव्रत सिंह. वाराणसी : चौखम्बा विद्याभवन.

महिमभट्टः. वि.सं. २०४९. व्यक्तिविवेक. अनु. रेवाप्रसाद द्विवेदी. वाराणसी : चौखम्भा संस्कृत संस्थान.

माघः. ई. १९९९. शिशुपालवधम्. सम्पा. आचार्य कृष्णमोहन शास्त्री. अनु. श्रीधर्मदत्तोपाध्यायः. वाराणसी : चौखम्बा अमरभारती प्रकाशन.

राजशेखरः. वि.सं. २०२१. काव्यमीमांसा. सम्पा. डा. रमाशङ्कर त्रिपाठी. अनु. डा. गङ्गासागर राय. वाराणसी : चौखम्बा विद्याभवन.

राधाकान्तदेवबहादुर. वि.सं. २०८१. शब्दकल्पद्रुमः. चतुर्थो भागः. वाराणसी : चौखम्बा संस्कृत सीरीज अफिस.

रुद्रटः. वि.सं. २०२३. काव्यालङ्कार. अनु. श्री रामदेव शुक्ल. वाराणसी : चौखम्बा विद्याभवन.

वामनः. ई. १९४१. काव्यालङ्कारसूत्राणि. सम्पा. डा. बेचन झा. वाराणसी : चौखम्बा संस्कृत संस्थान.

विद्यानाथः. वि.सं. २०३८. प्रतापरुद्रीयम्. अनु. मधुसूदन शास्त्री. वाराणसी : कृष्णदास अकादमी.

विश्वनाथः. ई. २०१६. साहित्यदर्पणः. अनु. शालिग्राम शास्त्री. दिल्ली : मोतीलाल बनारसीदास.

व्यासः. वि.सं. २०७३. अग्निपुराण. गोरखपुर : गीताप्रेस.

शर्मा, डा. गङ्गा सहाय, अनुवादकः. ई. २०१६. ऋग्वेदः. दिल्ली : संस्कृत साहित्य प्रकाशन.

शारदातनयः. ई. १९८३. भावप्रकाशनम्. अनु. डा. मदनमोहन अग्रवाल. वाराणसी : चौखम्बा सुरभारती प्रकाशन.

शिङ्गभूपालः. ई. १९७९. रसार्णवसुधाकरः. सम्पा. टी. वेङ्कटाचार्य. मद्रास : अडयर लाइब्रेरी.

श्रीहर्षः. ई. २०२१. नैषधीयचरितम्. अनु. श्रीशेषराजशर्मा रेग्मी. वाराणसी : चौखम्बा सुरभारती प्रकाशन.

हेमचन्द्र. ई. १९२८. काव्यानुशासनम्. सम्पा. रसिकलाल परीक्षक. मुम्बई : श्री महावीरजैनविद्यालयः.

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**संस्कृतव्याकरणे स्फोटविवेकः**

नारायण जोशी
उपप्राध्यापकः
शारदाविद्यापीठम्, महेन्द्रनगरम्
Gmail: narayanbabujoshi2050@gmail.com
DOI:

**लेखसारः**

संस्कृतव्याकरणशास्त्राजिरे दार्शनिकविषयत्वेन बहुचर्चितविषयस्य स्फोटस्य चर्चा अत्र कृतमस्ति। स्फोटविचारे स्फोटस्वरूपं प्रदर्श्य स्फोटप्रकाराणां व्याख्यानञ्चापि विहितमस्ति। नागेशानुसारेण व्यवहारत आन्तरबाह्यरूपेण द्वावेव स्फोटौ स्वीकृतौ। बाह्यस्फोटस्य जातिव्यक्तिभेदेन द्वावेव भेदौ प्रादर्शयत्। व्यक्तिः पदार्थ इति व्याडिमते व्यक्तिस्फोटः। जातिपदार्थवादिनो वाजप्यायनस्य मते जातिस्फोटः स्वीकृतः। यदि चावान्तरस्फोटप्रतिपादने आग्रहस्तर्हि कल्पितानि पदानि कल्पितपदेषु कल्पितौ प्रकृतिप्रत्ययावादाय वक्ष्यमाणपद्धत्या स्फोटस्वीकारे तु प्रकृतिस्फोटः, प्रत्ययस्फोटः, प्रकृतिजातिस्फोटः, प्रत्ययजातिस्फोटः, पदस्फोटः, पदजातिस्फोटः, वाक्यस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डपदजातिस्फोटः, अखण्डवाक्यस्फोटः, अखण्डवाक्यजातिस्फोटाश्च भविष्यन्ति। तत्तदवयवविवक्षाविवक्षाभेदेन प्रकृतिप्रत्ययादिकल्पनाकल्पनाभ्यां सर्वेषां कृत एते द्वादश स्फोटा युक्तियुक्ता भवेयुः। तथाहि – अस्यां स्थितौ वाक्यार्थज्ञानमस्माकं कृते वाक्यस्फोटस्य विलयसम्भावनापि दृश्यते। तेन स्फोटविषयेऽपि मतैक्यं न दृश्यते। स्फोटोऽखण्डरूपो नित्यः। तथा आकाशे घटाकाशमठाकाशपटाकाशवद् औपाधिकत्वेन भेदोपभेदाः व्याकृताः सन्ति। पदस्य वाचकत्वेऽपि पदवाक्यप्रमाणज्ञानां समदृष्टिः न विद्यते। वस्तुतः स्फोटोऽर्थप्रकाशको वर्तते। लेखेऽस्मिन् ध्वनिविचारः, वृत्याश्रयबोधः वाग्विषयश्च सम्यङ्निरूपितः। मतभेदेऽपि वर्णपदवाक्यास्फोटादीनां पृथक् पृथक् कृत्वा आधुनिकजगति आधुनिकसङ्गणकयन्त्रादिष्वपि स्फोटस्वरूपलाभविषयेऽपि सतर्कं विलिखितमत्र। स्फोटस्य स्वरूपं निरूप्य नानाविचारभेदप्रदर्शनपूर्वकं स्फोटौपाधिकभेदान् व्याख्याय स्फोटविवेचनं विमर्शनञ्चात्रास्ति।

**शब्दबीजानि :** अन्योन्याश्रयः, घटाकाशः, निगमनः, वर्णावगाहिनी, शब्दनिष्ठा।

**विषयनिवेशः**

स्फुट्यतेऽनेनार्थः स्फोटः वान्यत् स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटः। आदौ कृतस्यास्य विग्रहस्यार्थो येन अर्थः ज्ञायते तत्स्फोटोऽवगम्यत इति। चान्तस्यापि अर्थप्रकाशक एव स्फोटेति अवबुध्यते। तृतीयापञ्चम्योः विग्रहात् अर्थप्रकाशकः विकाशको वा स्फोटेति ज्ञायते। 'स्फुट विकसने' इत्यस्माद्धातोः घञ्प्रत्ययकृते स्फोटशब्दो निष्पद्यते। पदवाक्यप्रमाणविदः स्फोटशब्दं काचन शक्तिप्रकाशिकेति सङ्केतश्च वा इत्यङ्गीकुर्वन्ति। परन्तु तेषां समेषां विवेचना, तर्करीतिः व्याख्यारीतिश्च नैव समाना। शब्दादर्थो गम्यते अनयोर्मध्ये अर्थगमकस्तत्वमस्ति तदेव स्फोट इति। वस्तुतः स्फोट अर्थप्रकाशिका शक्तिरिति

। इममेव शाब्दशास्त्रानुयायिनः अन्ये च दर्शनं मत्वा पठन्ति ।

बहुचर्चितस्य स्फोटस्य विषये बहुग्रन्थगुम्फनकारैः बहुत्र चर्चा कृताऽस्ति । शब्दनयवाक्यवेदान्तप्रभृतिशास्त्रेषु विश्लेषितोऽयं विषयः नूनम् । तत्रापि बहुशाब्दिकैः बहुनैयायिकैः बहुवाक्यज्ञैः बहुवेदान्तविद्भिश्चास्य सतर्कं व्याख्या सम्पादिता । भाष्यवाक्यपदीयपरिभाषेन्दुशेखरपरमलघुमञ्जूषादिग्रन्थेषु स्फोटस्य चर्चा स्वल्परीत्या दरीदृश्यते परन्तु मण्डनमिश्रस्य स्फोटसिद्धिनामकग्रन्थे भरतमिश्रस्यापि स्फोटसिद्धिनामकग्रन्थे केशवकविकृतः स्फोटप्रतिष्ठानामकग्रन्थे शेषश्रीकृष्णकविकृतः स्फोटतत्वनामकग्रन्थे नागेशभट्टस्य स्फोटवादनामकग्रन्थे विस्तृता गभीरा च परिचर्चा विद्यते । अनुसन्धानपत्रेऽस्मिन् स्फोटपरिचयप्रकारविश्लेषणपूर्वकं स्फोटाध्ययनं कृतमस्ति । अत्रैव नानाशास्त्रनिष्पीडनप्रवीणानां मतप्रदर्शनपूर्वकं विमर्शनञ्चात्र विहितम् ।

**समस्योद्देश्ये**

स्फोटः कः ? किमर्थं स्फोटः ? एताभ्यामेव द्वाभ्यां प्रश्नाभ्यां प्रकाशेते समस्योद्देश्ये । स्फोटस्य ऋते किं नभवति ? स्फोटस्यावश्यकता किमर्थं वरीवर्ति ? इत्यादयः जिज्ञासाः समुद्भवन्ति ताषां जिज्ञासानां शमनीकरणमेव उद्देश्यं वर्तते । अतः स्फोट एव गवेषणायाः समस्या तस्य सविवेचनं प्रस्तुतिप्रदानम् उद्देश्यं अस्ति । अनुसन्धानात्मकपत्रेऽस्मिन् स्फोटस्य परिचयादारभ्य मतमतान्तरपुरःसरं विपुलविवेचनमुल्लिखितं वर्तते ।

**अध्ययनविधिः**

शोधसामग्रीसङ्कलने प्रचलितनिगमनागमनपद्धतीनां समुचितः प्रयोगः कृतो वर्तते । प्रधानतया स्फोटविषयकविमर्शक्रमे नानाविदुषामावश्यकमतानामनुशीलनेन निगमनविधिः स्वीकृतेति । तत्रैव ग्रन्थसङ्कलकत्वेन पुस्तकालय एव मन्यते । अतः पुस्तकालयविधिरपि अवलम्बितः ।

**विमर्शनस्य सैद्धान्तिकाधारः**

विषयोऽयं शाब्दशास्त्रस्यैव भवनात् पाणिनिकात्यायनपतञ्जलीन् केन्द्रीकृत्य सूत्रवार्त्तिकभाष्यविचारमाधारीकृत्य सिद्धान्तविचारः कृतो वर्तते । तत्रैव वाक्यपदीयपरिभाषेन्दुशेखरपरमलघुमञ्जूषाप्रभृतीनां टीकाग्रन्थाः भाष्यग्रन्थाञ्चाधारीकृत्य सिद्धान्तभूमिः स्थापिताः वर्तन्ते । उल्लिखितान् ग्रन्थान् विदूषाञ्च मतानुसारं विमर्शनं कृतं वर्तते ।

**सीमाङ्कनम्**

सकलव्याकरणशास्त्रस्य सकलनयशास्त्रस्य सकलवाक्यशास्त्रस्य सकलवेदान्तशास्त्रस्य स्फोटविषयमाधारीकृत्य विवेचनमत्र न सम्भवति । तेनात्र समासेन शाब्दशास्त्रं विशेषीकृत्य विमर्शकरणमेव अस्य अनुसन्धात्मकलेखस्य सीमा विद्यते । वाक्यपदीयवैयाकरणभूषणसारपरमलघुमञ्जूषाग्रन्थानां साहाय्येन शोधनिर्मितिः भविष्यति ।

**स्फोटाध्ययनं विमर्शनञ्च**

नैयायिकनये परमाणोरिव, वेदान्तिमते ब्रह्मण इव च शाब्दिकसिद्धान्ते स्फोटस्य महती चर्चा विद्यते तत्र तत्राकारग्रन्थेषु। शाब्दिकानां दार्शनिकत्वप्रसादः स्फोटभित्तिमेवावलम्बते, परन्तु स्फोटवादस्य कुतः प्रारम्भो जातः? इत्यस्य समाधाने इतिवृत्तस्य पृष्ठानि मौनमेवावलम्बन्ते : परन्तु सूक्ष्मेक्षिकया पर्यालोच्यमाने 'वाचो ह वाक्' इत्यादिश्रुतिरूपाणि स्फोटस्रोतांसि वेदब्राह्मणादिवारिधिषु समुपलभ्यन्ते। शाब्दिका अमुमेव सूत्रात्मकमर्थं सगमतां सरलताञ्च नयन्ति। वेदब्राह्मणादिषु ग्रन्थेषु गोवागादिशब्दाः शब्दरूपेऽर्थे प्रयुज्यन्ते, न तु स्फोटशब्दरूपेऽर्थे। अतो वादत्वेन स्फोटवादस्य कदा प्रारम्भ इति प्रश्नोऽद्यापि न समाहितोऽभूत्। अर्थप्रकाशकत्वं स्फोटत्वमिति। येन अर्थप्रकाशनं भवति सः स्फोटः। अर्थः ब्रह्मेति मन्यते। वाचकः स्फोटः वाच्यार्थः ब्रह्मेति स्वीकृयते। यथा किरणैः सूर्यः प्रकाशते तथैव स्फोटेन वाचकेन वा वाच्यार्थो ब्रह्म वा ज्ञायते। रविकिरणयोः यथा सम्बन्ध जायते तथैव शब्दार्थयोः सम्बन्धो भवति। अत्रापि शब्दार्थयोर्मध्येऽपि कश्चित् सम्बन्धः भवति, सः सम्बन्धः शक्तिः वर्तते। शक्तिं सङ्केतेनापि ज्ञायते। वस्तुतः वर्णोच्चारणपश्चात् नाशं प्रप्नुवन्ति तथा कथं शब्दज्ञानं भवति ? इत्यत्र प्रश्नं जागर्ति नूनम्। उत्तीर्यते यत्, संस्कारवशात् ज्ञानं भवति। अर्थबोधकं इमां शक्तिमेव वैयाकरणाः अखण्डस्फोटत्वेनाङ्गीकुर्वन्ति। एवञ्च नु व्याकरणन्यायमीमांशासाहित्येतिहासपुराणादिषु स्फोटस्य चर्चांशः लभ्यते। "अवङ्स्फोटायनस्य" १९।२३।२३३ (पाण्डेयः, सन् २०१३, पृ.६८) इति सूत्रे स्फोटशब्दो दृष्टिगोचरीभवति। अस्य स्फोटायनशब्दस्य हरदत्तः पदमञ्जर्यां विवरणं करोति– 'स्फोटोऽयनं पारायणं यस्य, स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः'। नागेशेनापि स्फोटवादे अन्ते स्फोटायनऋषेरेव सिद्धान्तः स्फोटवादः इति प्रतिपादितम्।

अत्र मीमांशकाः 'अथ गौरित्यत्र कः शब्दः' गकारौकारविसर्जनीयाः इति भगवान् उपवर्षः' इति कण्ठताल्याद्यभिघातानां श्रवणेन्द्रियविषयणां वर्णानामेव शब्दत्वं वाचकत्वं चास्ति। अन्यस्मिन् दिनेऽनुभूतेऽद्यानुभूयमानस्य 'सोऽयम्' इति प्रत्यभिज्ञया तावत्कालं स्थिरत्वे सिद्धे तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति' इति न्यायात् पराभिमताशुविनाशित्वव्यतिरेके सिद्धे नित्यत्वपर्यवशानम्। सर्ववेदेषु तदुपलम्भात् विभुत्वम्, लाघवाच्चैकत्वम्। आनुपूर्वीघटम्– अव्यवहितोत्तरत्वं चैतत्पक्षे उत्पत्त्यनवच्छिन्नस्वज्ञानाकालोत्पत्तिकज्ञानविषयत्वम्। यथाऽत्यन्तरागवतः कामिनीसाक्षात्कारस्थले ज्ञानधाराकल्पने गौरवादेकत्वं तद्वद् ज्ञानानामप्येतद्विषये स्थिरत्वम्। ननु न तावद् वर्णानां प्रत्येकमर्थबोधकत्वम्, एकैकस्मादर्थाप्रतीतेः। नापि समुदितानाम्, क्षणविनाशिनां समुदायानुपपत्तेः। प्रतिवर्णं च संस्कारकल्पने गौरवापत्तिः। अतो वर्णोच्चारणानन्तरं यतोऽर्थप्रत्ययो भवति, सोऽयं स्फोटत्वेन प्रकाशकत्वेन स्फोट इत्युच्यते। स एव पदात्मा शब्दः। एवं वाक्यस्फोटोऽपि अप्रत्यक्षोऽप्ययमर्थः प्रतीतिलक्षणकार्यानुपपत्यावगम्यते। न च वर्णा एवानुभूयन्ते, न तदतिरिच्यमानस्वरूपं वस्तुतत्त्वमिति वाच्यम्, पदमेकं वाक्यमेकमिति चैकस्वरूपस्यानुभवात्। न चेयं वर्णावगाहिनी, तेषां परस्परभिन्नत्वात्। न चैकत्र नानात्वैकत्वे सम्भवतः, विरुद्धत्वात्। एकार्थविषयत्वे नैकत्वमिति चेत्, न, परस्पराश्रयात्। एकपदत्वेन एव एकार्थविषयत्वात्। तस्मान्न वर्णात्मकः शब्दः, किन्तु स्फोटरूप एवेति चेत्, न, वर्णातिरिक्तवाचकत्वकल्पनायामर्थापत्तिः प्रमाणं, प्रत्यक्षं वा ? नाद्यः, अर्थप्रतिपत्ते अन्यथा अपि उपलब्धत्वात्। नेतरः, तदभावात्। न चैकं पदमित्येकवस्त्ववगाहिनी नाना वर्णेष्वनुपपद्यमाना बुद्धिरेव प्रमाणमिति वाच्यम्, वर्णेष्वप्येकार्थविषयत्वेन तदुपपत्तेः।

वेदान्तिनस्तु वर्णानामेव वाचकत्वं स्वीकुर्वन्ति, तेषां मते स्फोटाभावात्। इदं तेषामभिप्रेत यदि वर्णानां वाचकत्वं न सम्भवेत्, स्फोटस्यानुभवपद्धतिमध्यासीत्, तदैव वर्णातिरिक्तः स्फोटोऽभ्युपेयेत। वर्णानामवाचकत्वं क्षणिकत्वेनाशक्यसंगतिग्रहत्वाद्

व्यस्तसमस्तप्रकारद्वयाभावाद्वा, वर्णानां क्षणिकत्वे मानाभावेन प्रथमः कल्पस्तावन्निरस्तः । ननु वर्णानां प्रत्युच्चारणमन्यत्वं सर्वजनप्रसिद्धमिति चेत्, न, प्रत्यभिज्ञायमानत्वम् । न चासत्यप्येकत्वे ज्वालादिवत् सादृश्यनिबन्धनमेतत् प्रत्यभिज्ञानमिति साम्प्रतम्, सादृश्यनिबन्धनत्वमस्य बलवद्बाधकोपनिपाताद्वा स्थीयते, क्वचिज्ज्वालादौ व्यभिचारदर्शनाद्वा । न चेदं प्रत्यभिज्ञानं गत्वादिजातिविषयम्, न गादिव्यक्तिविषयम्, तासां प्रतिनरं भेदोपलम्भात् । अत एव शब्दभेदोपलम्भात् वक्तृभेद उन्नीयते, सोमशर्माधीते न विष्णुशर्मेति युक्तम्, यतो बहुषु गकारमुच्चारयत्सु निपुणमनुभवः परीक्ष्यताम् । यथाकालाक्षीं च स्वस्तिमतीं चेक्षमाणस्य व्यक्तिभेदप्रथायां सत्यामेव तदनुगतमेकं सामान्यं प्रथते, तथा किं गकारादिषु भेदेन प्रथमानेष्वेव गत्वमेकं तदनुगतं चकास्ति । किं वा यथा गोत्वमाजानत एकं भिन्नदेशपरिणामसंस्थानव्यक्त्युपादानभेदाद् भिन्नदेशमिवाल्पमिव महदिव दीर्घमिव वामनमिव तथा गव्यक्तिरजानत एवापि व्यञ्जकभेदा तद्धर्मानुपातीनीव प्रथत इति विदाङ्कुर्वन्तु । तत्र गव्यक्तिभेदमङ्गीकृत्यापि योगत्वस्यैकस्य परोपधानभेदकल्पनाप्रयासः, स वरं गव्यक्तावेवास्तु, किमन्तर्गडुना गत्वेनाभ्युपेतेन । सत्यपि समस्तवर्णप्रत्यवमर्शे यथाक्रमानुरोधिन्यः पिपीलिकाः पङ्क्तिबुद्धिमारोहन्ति, एवं क्रमानुरोधेनैव वर्णाः पदबुद्धिमारोहन्ति । अतो 'जारा' 'राजा' 'कपि' 'पिक' इत्यादौ पदविशेषप्रतिपत्तौ नास्ति, काचनापि विप्रतिपत्तिः । वर्णाश्चेमे क्रमेण गृह्यमाणः स्फोटं व्यञ्जयन्ति । स स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात् । अतो वर्णा एव वाचका नित्या विभवाश्चेति । अत्रेदं विचारणीयम् – स्वसिद्धान्तभङ्गभिया वर्णानां नित्यत्वं सापेक्षमेव स्वीकार्यमिति । वस्तुतो वर्णानामनित्यत्वमेव सृष्टिप्रलयमध्ये विनाशित्वाभावरूपमेव तत् । एवञ्च सृष्टीनामानन्त्येनानन्तवर्णतद्ध्वंसप्राग्भावादिकल्पनाया गले पतित्वाल्लाघवं शशशृङ्गायमाणमेव । किञ्च गकारादिषु गत्वादिजातेरभावेन गकारादिज्ञानस्य निर्विकल्पकात्मकत्वेन प्रत्यक्षत्वानापत्तिः । ध्वनिगतगत्वादिभानस्वीकारे तु तदभाववति तत्प्रकारकज्ञानवत्वेन भ्रमत्वापत्तिर्दुर्वारा ।

साङ्ख्यास्तु प्रत्येकवर्णेभ्योऽतिरक्तं 'कलश' इत्यादिरूपमखण्डमेकं पदं स्फोट इति योगैरभ्युपगम्यते । कम्बुग्रीवाद्यवयवेभ्योऽतिरिक्तो घटाद्यवयवीव । स च शब्दविशेषः पदाख्योऽर्थस्फुटीकरणादित्युच्यते । स शब्दोऽप्रामाणिकः, कुतः ? प्रतीत्यप्रतीतिभ्याम् । स स्फोटाख्यः शब्दः किं प्रतीयते, न वा । आद्ये येन वर्णसमुदायेनानुपूर्वीविशिष्टेन सोऽभिव्यज्यते, तस्यैवार्थप्रत्यायकत्वमस्तु, किमन्तर्गडुना तेन । अन्त्ये, त्वज्ञातस्य स्फोटस्य नार्थप्रत्यायनशक्तिरिति व्यर्था स्फोटकल्पना । 'स एवायं गकारः' इति प्रत्यभिज्ञाबलात् वर्णानित्यत्वं न युक्तम्, उत्पन्नो गकार इत्यादिप्रत्ययेनानित्यत्वसिद्धेः । प्रत्यभिज्ञा च तज्जातीयता विषयिणी ।

नैयायिकास्तु पदानामेव वाचकत्वं । वर्णानां समूहः पदम्, पदानां समूहो वाक्यम् । वर्णाश्चानित्याः ननु वर्णानामनित्यत्वे 'सोऽयं ककारः' इति प्रत्यभिज्ञया उपपत्तिर्न स्यादिति चेत्, न, सोऽयं धान्यराशिसरितिवत् जातिनिबन्धना सादृश्यनिबन्धना वा प्रत्यभिज्ञेति वक्तुं शक्यत्वेनादोषात् । ननु तथापि क्रमोत्पन्नविनष्टानां वर्णानां सहभावाभावात् तत्समूहस्य पदस्य, पदसमूहवाक्यस्य च विलयापत्तिरिति चेत्, न, संस्कारद्वारा तदुपपादयितुं शक्यत्वात् । यथा क्रमोत्पन्ना अपि प्रत्येकग्रासाः समुदितास्तृप्तिमुत्पादयन्ति, तथा क्रमवर्तिनोऽपि वर्णाः समुदिता एवार्थाभिधायिनो भवन्ति । न तावदनुमानमहिम्ना स्फोटस्वरूपमुपपादयितुं पार्यते, परिदृश्यमानविशिष्टानुपूर्वीकवर्णकलापकरणे नार्थप्रतीतेर्घटमानत्वात् । नापि प्रत्यक्षतो वर्णानामेव प्रत्यक्षत्वादित्याहुः । अधिं जयन्तभट्टकृतायां न्यायमञ्जर्यां द्रष्टव्यम् ।

वैयाकरणनये तु स्फोटस्य ब्रह्मरूपतया तत्रैव ध्वनिगतधर्माणामध्यस्तत्वातद् ब्रह्मणि प्रपञ्चाध्यासे भिन्नभिन्नरूपेण

तत्प्रतीतिरिव वर्णभेदप्रतीतिर्नानुपपन्ना। न च त्वन्मतेऽपि स्फोटस्य ब्रह्मत्वेन निधर्मकतया तत्र गत्वादिप्रकारकप्रतीतेर्भ्रमत्वं दुर्वारमेवेति वाच्यम् ? तुरीयदशायां भ्रमत्वेऽपि तव ब्रह्मण एव प्रपञ्चरूपेण प्रतीतिवद् व्यावहारिकदशायां बाधाभावेन भ्रमत्वस्य वक्तुमशक्यत्वात्।

वैयाकरणास्तु स्फोट एव वाचको न तु वर्णाः स्फोटानुभवानन्तरं विदितसंगतेरर्थधीसमुत्पादात्। न च वर्णातिरिक्तस्य तस्यानुभवो नास्ति, गौरित्येकं पदम्, गामानाय शुक्लामित्येकं वाक्यमिति नानावर्णपदातिरिक्तैकपदवाक्यावगतेः सर्वजनीनत्वात्। न चायमसति बाधके एकपदवाक्यानुभवः शक्यो मिथ्येति वक्तुम्। नाप्यौपाधिकः, उपाधिः खल्वेकधीग्राह्यता वा स्यात्, एकार्थधीहेतुता वा ? न तावदेकधीगोचराणां धवखदिरपलाशानामेकनिर्भासः प्रत्ययः समस्ति। तथा सति धवखदिरपलाशा न जातु स्यात्। नाप्यैकार्थधीहेतुता, तद्धेतुत्वस्य वर्णेषु व्यासेधात्। तद्धेतुत्वेन तु साहित्यकल्पनेऽनुपाधिश्च पदवाक्यगोचर एकनिर्भासो वर्णातिरिक्तं वाचकमेकमवलम्बते, स स्फोट इति। तच्च ध्वनयः प्रत्येकं व्यञ्जयन्तोऽपि न द्रागित्येव विशदयन्ति, येन द्रागर्थधीः स्यात्, अपि तु रत्नतत्त्वज्ञानवद् यथास्वं द्वित्रिचतुष्पञ्चषड्दर्शनजनितसंस्कारपरिपाकसचिवचेतो लब्धजन्मनि चरमे चेतसि चकास्ति विशदं पदवाक्यत्वमिति प्रागुत्पन्नायास्तदनन्तरमर्थधिय उदय इति नेतरेषामानर्थक्यं ध्वनीनाम्। नापि प्राचाम्, तदभावे तज्जनितसंस्कारतत्परिपाकाभावेनानुग्रहाभावात्। अन्त्यस्य चेतसः केवलस्याजनकत्वात्। न च पदप्रत्ययवत् प्रत्येकमव्यक्तामर्थधियमाधास्यन्ति प्राञ्चो वर्णाः, चरमस्तु तत्सचिवः स्फुटतरामिति युक्तम्, व्यक्ताव्यक्तावभासितायाः प्रत्यक्षज्ञाननियमात्, स्फोटज्ञानस्य च प्रत्यक्षत्वाद् अधिकस्तत्र प्रत्यक्षाया मानान्तरजन्मनो व्यक्त एवोपजनो न वा स्यात्, न पुनरस्फुट इति न समः समाधि, तस्मान्नित्यः स्फोट एव वाचकः न वर्णाः। अस्य च स्फोटस्योपाधिभेदादष्टौ भेदाः वर्णपदवाक्यरूपरूपितस्य भावाद् वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटश्चेति त्रयः। अत्रैव जातिव्यक्तिभेदेन वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोट इति त्रयः। पदवाक्ययोः सखण्डाखण्डत्वभेदात् सखण्डस्फोटः, सखण्डवाक्यस्फोटश्चेति द्वौ। एवं सङ्कलनयाऽष्टौ स्फोटा इति नागेशादयः। श्रीरामाज्ञापाण्डेयास्तु व्याकरणदर्शनभूमिकायां षोडशस्फोटानीत्याहुः। तथाहि – अस्यां स्थितौ वाक्यार्थज्ञानमस्माकं कृते वाक्यस्फोटस्य विलय एव स्यात्। नापि 'पचति' इति पदस्फोटव्यवहारः। तथा चायं विभागो नहि युक्तयुक्तः। अत एव नागेशभट्टो नहि अष्टौ स्फोटान् मञ्जुषायां निरदिक्षत्, किन्तु केवलमान्तरबाह्यभेदेन द्वौ स्फोटौ प्रदर्श्य बाह्यस्फोटस्य जातिव्यक्तिभेदेन द्वावेव भेदौ प्रादर्शयत्। तथा च व्यवहारदृष्ट्या बाह्यस्फोटदर्शने प्राप्तेवक्ष्यमाणरीतिरेवास्माभिरवलम्बनीया। तथाहि– व्यक्तिः पदार्थ इति व्याडिमते व्यक्तिस्फोटः। जातिपदार्थवादिनो वाजप्यायनस्य मते जातिस्फोटः इत्येवंरूपेण द्वौ स्फोटावभ्युपगन्तव्यौ। यदि चावान्तरस्फोटप्रतिपादने आग्रहस्तर्हि कल्पितानि पदानि कल्पितपदेषु कल्पितौ प्रकृतिप्रत्ययावादाय वक्ष्यमाणपद्धत्या स्फोटः स्वीकार्यः। एवं सति – १) प्रकृतिस्फोटः २) प्रत्ययस्फोटः ३) प्रकृतिजातिस्फोटः ४) प्रत्ययजातिस्फोटः ५) पदस्फोटः ६) पदजातिस्फोटः ७) वाक्यस्फोटः ८) वाक्यजातिस्फोटः ९) अखण्डपदस्फोटः १०) अखण्डपदजातिस्फोटः ११) अखण्डवाक्यस्फोटः १२) अखण्डवाक्यजातिस्फोटा भविष्यन्ति। तत्तदवयवविवक्षाविक्षाभेदेन प्रकृतिप्रत्ययादिकल्पनाकल्पनाभ्यां सर्वेषां कृत एते द्वादश स्फोटा युक्तियुक्ता भवेयुः। एतदेव विचार्य मञ्जुषायां नागेशभट्टो द्वावेव स्फोटौ प्रप्यपादयदिति।

"शाब्दब्रह्मेति वैयाकरणाः" वैयाकरणानां मते शब्दैव मुख्यं तत्त्वम्। मन्ये सर्वेषां मते शब्दैव एतादृशं तत्त्वं योऽर्थावबोधकः, प्रवृत्तिप्रवर्तकः, कार्यसाधकः, जगत्सञ्चालकः, तत्त्वानां प्राणस्वरूपञ्च प्रतिभाति। तस्मिन् शब्दे एतादृशी शक्तिः तिष्ठति,

यया शक्त्या मानवाः अर्थात् अपारमरपर्यन्ताः जनाः प्रसन्नाः रुष्टाश्च भवन्ति । सा शब्दनिष्ठा शक्तिः कुत्र तिष्ठति, इति विचारचर्यायां नैयायिकानां वैयाकरणानां च भिन्नं भिन्नं मतं विद्यते । नैयायिकानां मते शक्ति पदे तिष्ठति, तथा चोक्तम्, शक्तं पदमिति । अर्थात् शक्तिमत् पदमित्यर्थः ।

परन्तु वैयाकरणाः वदन्ति यत् उच्चरितप्रध्वंसित्वेन वर्णस्य, पदस्य, वाक्यस्य चासम्भवात् शक्तिस्तत्र न तिष्ठति । यतो हि अभिव्यक्तेरुत्पत्तेर्वा क्षणस्थायित्वात्, क्षणात्मककालस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्याप्रत्यक्षत्वात् । उच्चरितप्रध्वसित्वं नाम, उच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसोपयोगित्वम्, यथा "इको यणचि" इत्यत्र तस्मिन्निति परिभाषोपस्कृतवाक्यार्थेऽयं पूर्वोऽयं पर इति नष्टस्य प्रत्यक्षविषये शब्देन पौर्वापर्यव्यवहारयोगात् । नैयायिकाः स्वकीयमपरमपि मतं ददति यत् संस्कारवशात् शब्दजशब्दन्यायात् अनुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभवाच्च । अतो वर्णेन पदेन वा अर्थावबोधो भवतीति । अयं च उपयुक्त पक्षः ।, नष्टविद्यमानयोरव्यवहितोतरत्वसम्बन्धायोगात् । पदस्याविद्यमानत्वेन तत्र शक्त्याश्रयत्वस्य ज्ञानाभावात् । संस्कारस्य विपरीताच्च रसो सरः, नदी दीन इति विपरीतसंस्कारबोधेन प्रत्येकपन्यार्थप्रत्ययापत्तेः । अतो वैयाकरणा भणन्ति यद् वृत्त्याश्रयः शब्दस्फोट इति स्वीकरोतु । यद्यप्ययं स्फोट एकोऽखण्डश्च तथा पदे, वाक्ये जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागपशात् लोहितः पीतः स्फटिक इति भानवद् वर्णादिव्यङ्ग्यो वर्णरूपः, पदरूपो वाक्यरूपश्च । यथा – पणिकृपाणदर्पणव्यञ्जकोपाधिवशात् मुखे अन्यस्मिन् वस्तुनि वा दैर्घ्यवर्तुलत्वादिभानं तद्वत् । अस्मिन् अखण्डस्फोटे भिन्नं स्वरूपं प्रतिभाति उक्तञ्च –

> पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
> वाक्यात् पदानामन्यत्वं प्रविवेको न कश्चन (त्रिपाठी, वि.सं.२०७९, पृ.७५) ॥

अर्थात् पदेषु वर्णा न प्रतीयन्ते, वर्णेषु अवयवा न भवन्ति, वाक्यात् पदानां कश्चन प्रभेदो न इति ।

एवं विवरणेन प्रतिभाति यत् स्फोटे ये भेदोपभेदा वा प्रतीयन्ते, सर्वे ते औपाधिकाः । यथा आकाशे घटाकाशः, पटाकाशः, मठाकाशश्च । यथा चैतन्यस्य अल्पज्ञत्वविशिष्टः सर्वज्ञत्वविशिष्टः तथा जीवानाञ्च परस्परौपाधिको भेदश्च । मीमांशकानां मते पदे वाक्ये सखण्डपक्षे अन्तिमवर्णव्यङ्ग्यः स्फोट एक एव । पूर्वपूर्ववर्णस्तु तात्पर्यग्राहक इति । स्फोटस्य प्रकाशको नादः, अर्थाद् ध्वनिः । ध्वनिस्तु द्विविधः – प्राकृतो वैकृतश्च । प्रकृत्या अर्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकश्च प्रथमः, अर्थाद् विवक्षितार्थविबोधविषया आत्माभिव्यक्तीच्छया स्वभावेनोत्पन्नः स्फोटप्रकाशको मध्यमानादविषय इत्यर्थः । प्रकृताज्जातो विकृतविशिष्टश्चिरस्थायी निवर्तको वैकृतिकः । अर्थात् प्रकृताद् उत्पन्नो विकारैर्युक्तो ध्वनिरिति । स्फोटस्य ज्ञाने प्राकृतध्वनिरेव हेतुः । स्फोटस्याभिव्यक्तेरनन्तरमेव वैकृतध्वनिरुत्पद्यते । वृत्तिभेदेऽपि इदमेव कारणम् । उक्तञ्च भर्तृहरिणा–

> अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने तथा ।
> शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता (त्रिपाठी, वि.सं.२०७९, पृ.७८) ॥

अभ्यासो नाम प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनः पुन्येन प्रतिपादनमभ्यासः । पुनः पुनरावृत्त्या बुद्धिस्थिरीकरणमभ्यासः, शीघ्रपाठ्यव्यापारः । तत्त्वविचारणे तु मध्यावृत्तितात्पर्यं नातिदुरता नातिविलम्बिता इति । शिष्याणामुपदेश्यानामुपदेशः शिक्षणं मन्दगतिका वृत्तिरिष्टा इति । तिसृषु वृत्तिषु वैकृतध्वनिरेव कारणम् । स्फोटस्तु तैर्न भिद्यते । स्फोटप्रक्रियाधुनिकदृष्ट्यापि लोके यथा संगणके कार्यं भवति, तर्हि आदौ टङ्कणं भवति, पुनः 'सी.पि.यू.' मध्ये कार्यं भवति, पुनः मुद्रितं भवति । तदा प्रतिभाति यन्मध्ये यत् कार्यं जातं सैव स्फोटः । तथैव प्रतिपलोपलब्धद्रव्यगृहेऽपि (एटीएम) कार्डनिवेशानन्तरं या प्रक्रिया

भवति साऽपि स्फोटस्यैव स्वरूपा भवति। यान्त्रिकयुगेऽअन्वेषणे सति तु बहुत्र स्फोटनियमः घटते। एवञ्च स्फोटः शब्दः। ध्वनिः शब्दगुणः (शास्त्री, सन् २०१७, पृ.७०८)। भाष्यकारः स्फोटं शब्दं मत्वा ध्वनिं शब्दगुणत्वेन स्वीचकार। शब्दो व्यञ्जकः यतोहि भेर्याघातवत्। यथा : भेदीवादने कदाचिदुच्चैः कदाचिन्निचैः ध्वनिर्जायते। भेरीवादने सति ध्वनिरुत्पद्यते एव। तत्र तस्याः भेर्याः विस्फोटः समानः परं ध्वनिरेव कदाचिदल्पः कदाचित् महाँश्च जायते। अतः ध्वनिः व्यञ्जकः, स्फोटः व्यञ्जको भवति। ध्वनिः केवलं श्रवणेन्द्रियद्वारा अल्पं महच्च श्रूयते। ततः स्फोटः स्फोटः सर्वध्वनिष्वभिन्न एव दृश्यते ज्ञायते वा। व्यङ्ग्यव्यञ्जकयोः स्वभावतः अवस्थितौ वर्तेते। व्यक्तशब्देषु एव स्फोटध्वनी विद्येते। यतोहि अर्थबोधो भवति। अव्यक्तशब्देषु अर्थवाचकत्वशक्त्याभावात् स्फोटाभावः इति निश्चीयते। अर्थप्रत्यायकः व्यञ्जकवाचको वा पदरूपं या वाक्यरूपं सः स्फोटः सः नित्य इति। स्फोटप्रकटने नागोजिभट्टेन – केनचिद् "घटमानय" इति वैखरीनादः प्रयुक्तः। स केनचिच्छ्रोत्रेन्द्रियेण गृहीतः। स नादो हृदयद्वारा बुद्धिहृद्गतः सन् अर्थबोधकं शब्दं व्यञ्जयति तस्मादर्थावबोधः। स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोटः। मध्यमानादः स्फोटं व्यञ्जयति। वैखरी तस्योत्साहकः। भाष्यमपि प्रमाणम्– श्रोत्रोपलब्धिर्बुद्धिनिग्राह्यः प्रयोगेणाभिज्ज्वलितः आकाशदेशः शब्द इत्याकरग्रन्थः सङ्गच्छते। अत्रैका शङ्का उदेति यद् अष्टौ स्फोटाः, तर्हि तेषु वाचकः कः ? तदा उच्यते– यथा अर्थगतजातेः शक्यत्वं तथैव शक्ततानिरूपिकाया वर्णपदवाक्यादिजातेः – वर्णजातेः पदजातेः वाक्यजातेः अर्थावबोधकत्वम्, उक्तमपि शिष्टैः–

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता (दाहाल, सन् २०११, पृ.१०३)।

अनेकाभिर्विविधाभिर्या व्यक्तयो घटपटरूपास्ताभिरभिव्यङ्ग्या अभिव्यक्ता, पदार्थप्राणप्रदधर्मो घटत्वपटत्वरूपः स्फोट इति। वस्तुतस्तु वाक्यस्फोटो वाक्यजातिस्फोट एव वा वृत्याश्रय इति।

एकस्मिन्नेव वर्णे, द्वयोर्वा वर्णयोः पूर्णस्य गौरिति शब्दस्य प्रतीतौ स्वीकृतायां तु अवशिष्टवर्णवैयर्थ्यं प्रसज्येत, त्रयाणाञ्च वर्णानामेकान्वितं रूपमपि न सम्भवं सुलभं च स्यात्। न हि कोऽपि ध्वनिर्न क्षणद्वयादुर्ध्वं समवष्ठिते नाम, तथा च औकारध्वनिप्राप्तिः पूर्वमेव गकारध्वनिस्तिरोधास्यते, विसर्जनीयध्वनिप्राप्तिं यावद् गकारौकारध्वनी विलुप्तौ भविष्यतः। स्फोटपरम्परानुसारेण च गौरिति पदस्यार्थबोधः स्फोटेन भविष्यति। पूर्वपूर्ववर्णानां संस्कारा अन्तिमवर्णसमुच्चारणेन सह सम्पृक्ताः शब्दपूर्णतां रचयन्तोऽस्मात् प्रतीतिं विदधते। इयमेव शब्दपूर्णताप्रतीतिर्नाम स्फोटः (स्फुटत्यर्थोऽस्मादिति स्फोटः, स्फोटनं स्फोट वा)। स्फोटश्च वर्णपदादिरूपेण अष्टधा विभक्तः। स्फोटस्य च विशदं विवेचनं वाक्यपदीये, कौण्डभट्टकृते वैयाकरणभूषणसारे, नागेशभट्टकृतायां वैयाकरणसिद्धान्तलघुमञ्जूषायाञ्च साधु दर्शनीयम्।

वाक्यपदीकारो भर्तृहरिमहाभाष्यकारः पतञ्जलिश्च शब्दार्थयोस्तादात्म्यस्य पूर्णतायाश्च समकालिकीमेव अनुभूतिमङ्गीकुरुतः वाक्यपूर्णतायाश्च प्रतीतिरेव वाक्यस्फोटेन निरुक्ता। वाक्यपूर्णतया साकमेव वाक्यार्थप्रतीतिरपि जायमानाऽनुभूयते तत्त्वज्ञैः। अत एव वर्णपदवाक्याखण्डपदाखण्डवाक्यवर्णजातिपदजातिवाक्यजातिस्फोटेषु वाक्यस्फोटस्यैव पारमार्थिकत्वं सर्वस्फोटसाररत्नाकरत्वञ्चेति महाभाष्यकारादीनां सम्मतिः। "वाक्यस्फोटोऽति निष्कर्षे तिष्ठतीति मनस्थितिः" इत्थं मञ्जुषायां नागेशोक्तिदर्शनेन वाक्यस्फोटस्य मुख्यत्वं दृश्यते। व्याकरणाचार्येण पाणिनिना अष्टाध्याय्यां सर्वप्रथमं "अवङ् स्फोटायनस्य" ६।१।१२३ (पाण्डेय, सन् २०१३, पृ.६८) इत्यत्र कृतस्य सूचनेन स्फोटायनस्य मतं स्वीकृतं वर्तते। तथैवान्यत्र हेमचन्द्रेण कक्षीवान् इति स्फोटायनस्य नामान्तरमस्तीति ज्ञापितम्। एवञ्च गुरूपदहालदरेण 'व्याकरणदर्शनेर इतिहास' इति बंगलभाषारचितग्रन्थे कक्षीवत्नामकमहीद्रे ओशिजनामकः कश्चित् विद्वान् योगी वैयाकरणः स्वकीयव्याकरणे

अर्थप्रकाशकस्य प्रपञ्चतया व्याकृत्य स्फोट इति नाम दत्तवान् । काशिकावृत्तेः टीकायां हरदत्तेनापि 'स्फोटोऽयं परायणं यस्य सः स्फोटायनः स्फोटप्रतिपादनपरो वैयाकरणाचार्यः' इत्युल्लिखितम् । हरिवंशपुराणे श्रीमद्भागवतपुराणे गर्गसंहितायाञ्चास्य स्फोटशब्दस्य प्रयोगो दृश्यते । हरिवंशपुराणेऽपि 'अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः ।।' इत्युल्लिखितं दृश्यत एव । 'दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः ।' (शर्मा,१०।८५।९, वि.सं.२०३८, पृ.९) 'श्रृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् ।' (शर्मा,१२।६।४०,वि.सं.२०३८, पृ.४०) गर्गसंहितायाश्च गोलोकखण्डे तृतीयाध्याये उक्तम् यत् – 'व्यङ्ग्येन वा न नहि लक्षणया कदापि, स्फोटेन यच्च कवयो न विशन्ति मुख्याः । निर्देशभावरहितं प्रकृतेः परञ्च त्वां ब्रह्म निर्गुणमलं शरणं व्रजामः ।।' इतिवृत्तज्ञानेन प्रयोगस्थलज्ञानानुसारेण च स्फोटायनशब्दः प्रचलितः स्फोटशब्दश्च चर्चितो वर्तत इति स्पष्टीभवति । सन्दर्भेऽस्मिन् शाब्दनययोः मतान्तरण दृश्यते । प्रथमन्तु वृत्याश्रयो कुत्र भवतीति विषये चर्चा कृता वर्तते । वस्तुतः उच्चरितवर्णस्यध्वंसनेन वर्णसङ्घाताभावः जायते । अतस्तत्र अर्थज्ञानं न सम्भवति । तथैव 'इको यणचि' इति सूत्रस्य 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषायां अयं पूर्वः अयं परः इति व्यवहारोऽपि दृश्यते परन्तु तत्रापि पूर्वस्योच्चारिते सद्यः ध्वंशनात् कथं व्यवहारो सम्भवतीति शेषः । अस्मिन्नेव विषये नैयायिकाः वदन्ति यत् – 'वर्णानामनित्यत्वेऽपि उत्तरोत्तरवर्णे पूर्वपूर्ववर्णवत्त्वमव्यवहितोत्तरत्वसम्बन्धेन संस्कारवशाद. गृह्यत इति पदप्रत्यक्षत्वाच्छाब्दबोधः'(दाहाल, सन् २०११, पृ.३६) । ध्वंसितेऽपि पूर्ववर्णस्य संस्कारेण शाब्दज्ञानं भवतीति नैयायिकाः वदन्ति परन्तु शाब्दिकाः नैव आमनन्ति । तथैव नैयायिकाः शब्दज शब्दनयेन भवतीति वदन्ति तदपि वैयाकरणाः अव्यवहितोत्तरसम्बन्धस्याभावात् नैव स्वीकुर्वन्ति । स्वीकृते तु 'नष्ट घटो जलवान्' इति व्यवहारस्यापत्तिः सञ्जायते । संस्कारस्वीकारेऽपि विपरीतोद्बोधनत्वात् रसः– सरः, नदी–दीन इत्यादौ आपत्तिर्जायते । तथैव एकइन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत्सर्वयागेष्वङ्गं भवतीति भाष्यविरोधापत्तिश्च जायते । ततः निष्कर्षः समायाति यत् – स्फोटः वृत्याश्रयः इति । स्फोटज्ञानाय वाचः चतुविधत्वं दर्शयति परमलघुमञ्जुषाकारः– परा पश्यन्ति मध्यमा वैखरी च चतुर्विधा हि वागस्ति । तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरुपिणी परा वागुच्यते । नाभिपर्यन्मागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ति वागुच्यते । हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मजपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते । आस्यपर्यन्मागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्तापरश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते तदाह–

परा वाङ्मूलचक्रस्था पश्यन्ति नाभिसंस्थिता,
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।
वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ।। (त्रिपाठी, २०७९, पृ.७२)

चतसृषु वाणीषु मध्यमा वाणी स्फोटात्मक शब्दस्य व्यञ्जकः वर्तते । भेर्यादीनां नादश्रवणं निरर्थकं परन्तु मध्यमायाः सूक्ष्मनादः जपादिकाले सूक्ष्मवायुव्यक्तशब्दब्रह्म स्फोटस्य व्यञ्जकः । सः स्फोटब्रह्मैव नित्यः । तत्ब्रह्मविषये भर्तृहरिणोक्तम् –

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। (अवस्थी, सन् २०१६, पृ.१)

अर्थात् आद्यन्तध्वंशरहितब्रह्मैव शब्दतत्वमस्ति । स्वाविकृतेनापि संसारस्य विकृतिं सम्पादयति । अत्र शब्दस्य नित्यता भासते । स्फोटस्यौपाधिकत्वमपि दृश्यते यथाः जपाकुसुमादिलेपनात् स्फटिके लौहित्यपीतत्वरक्तं दृश्यते तथैव स्फोटस्यापि वर्णपदवाक्यादिभेदेन प्रार्थक्यं दृश्यते । वस्तुतस्तु वाक्यस्फोट एव समर्थम् । तथापि सरलतायै प्रकृतिपत्ययान् परिकल्प्य वर्णस्फोटस्यापि स्थापनं विधत्तम् । तथैव पदस्यापि । व्यक्तिजातिभेदेन स्फोटस्य षड्भेदाः सन्ति यथा : वर्णस्फोटः, पदस्फोटः वाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटश्च । तथा च अखण्डस्फोटपक्षे अखण्डवाक्यस्फोट अखण्डपदस्फोटश्च । अमीषां अष्टानां विवेचनं कृयते यत् –

**वर्णस्फोटः**

शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः (दाहाल, सन् २०११, पृ.१०) । ऋषिभिः कण्ठरवेणैव उपसर्गनिपातप्रकृतिप्रत्यादीनां कल्पनां कृत्वा शास्त्रप्रक्रियायां सारल्यं संस्थापितम् । स्थानिनः आदेशाश्च कल्पिता एव । यथा उदाहर्तुं शक्यते यत् – घटं नय, पटं नय इति वाक्योच्चारणे बोधितुं जाटल्यं दृश्यते तत्रापि घट अम्, पट अम् इति कृत्वा कर्मबोधने सुकरं भवति । अतः प्रकृतिप्रत्यययोः विभागं कृतवन्तः । घट इति प्रकृतिः, अम् इति प्रत्ययः । एतौ कल्पितौ स्तः । कल्पितौ वर्णस्फोटौ स्तः । तत्र वर्णस्य ज्ञानमपि भवति । कर्मत्वज्ञानमपि भवति । अत्र स्थान्यादेशयोः वाचकवाच्ययोः विषये काठिन्यं जायते । अतः वर्णस्फोटस्य कल्पनेन सार्थकत्वं न दृश्यते इति चिन्तयित्वा चान्ते वाक्यस्यैव प्राधिकमपि स्वीकृतवन्त विदः ।

**पदस्फोटः**

पद एव स्फोटः पदस्फोटः इति भवति । वर्णस्फोटस्य पूर्वप्रसङ्गे पूर्वपूर्ववर्णसंस्कारेण अन्त्यवर्णस्य बोधो भवतीति स्वीकृतमासीत् । परन्तु तत्र वाचकत्वाभावे अन्त्यवर्णस्य संस्कारवशाद् न सम्भवतीति वर्णस्फोटवादीनां मतान्तरमासीत् । पदसमुदायप्रसङ्गे 'रामोऽस्ति' इति वाक्ये कथं ज्ञानं भवतीति जिज्ञासा जागर्ति । अत्र रामकर्तकसत्तेति ज्ञानं भवत्येव । अत्र राम् इति शब्दोच्चारणस्य एकघटिकानन्तरं ओ इति उच्चारणे ज्ञानं भवेत् किन्तु अत्र जन्यसंस्कारन्तु अस्त्येव परं व्यवहितोच्चारणात् अर्थबोधस्यासम्भवो दृश्यते । अतः पदस्फोटस्य सार्थककरणेऽत्र वाक्यबोधाय वा रेफोत्तरवर्ती आकारोत्तरवर्ती उकारत्वरूपस्य आनुपूर्वीमेव शक्तावच्छेदकत्वं स्वीकर्तव्यं भवति ।

घटेनेति शब्दद्वारा पदस्फोटसिद्धिप्रक्रिया स्वीकृयत इत्थम् । तेषां मते घटेनेति अखण्डपदस्फोटः वर्तते । तत्र प्रकृतिप्रत्यययोः स्पष्टता नास्ति । यथा युष्मदस्मदोः स्थाने वस्नदीनामादेशेऽपि प्रकृतिप्रत्यययोः प्रतीतिर्नभवति तथैवात्रापि अखण्डपदस्फोट स्वीकृयते । 'घटेन' इत्यत्र 'घटे' इति प्रकृतिरस्ति 'न' प्रत्ययोऽस्ति वा 'घट' इति प्रकृतिरस्ति 'एन' इति प्रत्ययः इति सन्दिग्धत्वात् वाचकतायाः सिद्धत्वं न जायते । तत्र भाष्येऽपि उक्तम् यत् – 'सर्वे सर्वपदादेशाः' इति । भाष्योक्तिबलादपि वस्नसादिवत् अत्र प्रकृतिप्रत्यययोः सम्भावना नास्ति ।

अतः "बहुवचनस्य वस्नसौ८।१।२१"(पाण्डेय, सन् २०१३, पृ.९३) इति सूत्रे सुवन्तस्य स्थाने सङ्घातस्यैव वस्नसादीनामादेशात् समुदाये प्रकृतिप्रत्यययोः विभागः न सम्भवः । अतः अखण्डस्फोट सिद्ध्यति ।

**वाक्यस्फोटः**

एक तिङ् इति वाक्यम् । सुप्तिङन्तचयो वाक्यमिति । वस्तुतः वर्णपदयोः यथा वाचकता सिद्धिर्जायते तथैव वाक्यस्यापि वाचकत्वं चकास्ति एव । यथा 'हरेऽव', 'विष्णोऽव' इत्यादौ 'हरे' 'विष्णो' एतौ सम्बोधनपदे स्तः । तत्र 'अव' इति क्रियापदम् तिङ् वा । वर्णपदयोः वाचकत्वसिद्धिवत् अनयोः वाक्ययोरपि वाचकत्वात् अस्य समुदायस्य वाक्यस्फोट इति स्वीकर्तव्यम् ।

**अखण्डस्फोटः**

न खण्डः इति अखण्डः, अखण्डश्चासौ स्फोटः अखण्डस्फोटः । नञ् समासात् अखण्डः, कर्मधारयसमात् अखण्डस्फोटो भवति । पूर्वं सखण्डस्फोटस्य चर्चा विहिता । अत्र अखण्डः चर्च्यते यत् – पदे न वर्णा विद्यन्ते वर्णेष्वयवा न च । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन (त्रिपाठी, विं.सं.२०७९, पृ.७५) ॥ पदे वर्णाः न सन्ति वर्णेष्वपि केऽपि अवयवाः न सन्ति । एवङ्कारं पदानामपि वाक्ये कश्चिदपि भेदो नास्ति । यथा 'पचति' इति पदेषु वर्णाः न भवन्ति । वर्णसमूहरूपं पदं न भवति वर्णेष्वपि...इति कथनात् । अत्र एकारऔकाऋकारादीनां वर्णानामं अवयवत्वादपि अवयवत्वं न मन्यते । तथैव वाक्यमपि अखण्डं वर्तते पदं भिन्न वाक्यं भिन्नं नास्ति । वाक्याभ्यन्तरे पदानि नायान्ति । वाक्यमखण्डत्वेन तिष्ठति । वर्णसमूहस्य पदत्वं पदसमूहस्य वाक्यत्वस्वीकारे अनन्तवर्णकल्पनं कर्तव्यं भवति तस्य तु मानाभावात् । उदाहरणाय द्रष्टुं शक्यते यत् – गच्छति, पठति इत्यादौ गकारछकारपकारादीनां आनन्त्यं भविष्यति । अतः अखण्डस्फोटत्वं सिद्ध्यति । तथैव व्यक्तिजातिभेदेन स्फोटस्य जातित्वं व्यक्तित्वमपि स्वीकृतं वर्तते । वर्णत्वपदत्ववाक्यत्वस्वीकरणे जातिः भवति । तथा च वर्णपदवाक्यानां पाठे व्यक्तिर्भवति । जातिस्वीकरणे लघुता भवति परं व्यक्तिस्वीकरणे दीर्घत्वमापतति । इत्थङ्कारं स्फोटं ब्रह्मत्वमिति स्वीकृयते, एवञ्च स्फोटं शक्तिविशेषत्वेन स्वीकृयते तथापि कल्पनया उपाधिभेदात् वर्णपदवाक्यभेदेन लोके व्यवहृतः । अर्थप्रकाशकं स्फोटं ज्ञाने सारल्यं स्यादिति हेतुः स्फुट्यते अर्थो येन इति स्फोटः स्फुटति अर्थोऽस्मादिति स्फोटः एताभ्यां विग्रहाभ्यां अर्थापितो वर्तते । वृत्याश्रयविषये स्फोटविषये नानामतैक्यप्रदर्शनपूर्वकं स्फोटस्य शक्तित्वं स्वीकृतम् । तदपि वर्णपदादिभेदेनापि स्वीकृतः । वस्तुतः वाक्यस्फोटस्य प्रधान्यं दृश्यते । वाक्यबोधने वर्णादीनां स्वतः ज्ञानं भवत्येव किमर्थं वर्णादीनां कल्पना विभागो वेति प्रश्न आयाति । ततः वक्तुं शक्यते यत् – सुकराय । वाक्यज्ञाने पदज्ञानम्, पदज्ञाने वर्णज्ञानम् । वर्णोपत्तिः, ततः पदोत्पत्तिः ततः वाक्योत्पत्तिः भवति । सत्यमस्ति वर्णस्य ऋते पदज्ञानम्, पदस्य ऋते वाक्यज्ञानम् असम्भवम् । तथापि तीक्ष्णबुद्धीनाङ्कृते तु वाक्यज्ञाने प्रक्रियावशाद् पदवर्णयोः स्वतः ज्ञानं भवति परन्तु अल्पबुद्धीनां तादृशं न स्यादतः वर्णपदवाक्यानाम् आवश्यकता दृश्यते । तथैव जातिव्यक्तिस्वीकरणस्यापि स्थूलकारणन्तु नास्ति ज्ञानबोधक्रमे प्रक्रियाक्रमे च सुकरं स्यादिति हेतुः जातित्वं स्वीकृतम् । जातिस्वीकरणे व्यक्तित्वं स्वतः आयाति । पदस्याखण्डता पदस्या प्रामुख्यदर्शनाय अखण्डपदस्फोटः, पदे न वर्णा विद्यन्ते वर्णेष्वयवा इव । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ (अवस्थी, सन् २०१६, पृ.२६८) । श्लोकानुसारेण वाक्यस्य प्राधान्यसंरक्षणाय अखण्डस्फोटः स्वीकृतो वर्तते । पूर्णतया वाक्यसमाप्तिपश्चादेव अर्थज्ञानं भवति अतः अखण्डवाक्यस्फोटः शोभनम् । तथा च वाक्योच्चारणे सति जनाः अर्थं भजन्ते न तु वर्णपदादीनां ज्ञानमतः सुष्ठु भाति अखण्डवाक्यस्फोटत्वम् ।

**कृतज्ञताज्ञापनम्**

वाक्यपदीयपरमलघुमञ्जूषावैयाकरणभूषणसारभाष्यदिशा अन्यस्फोटविषयकचर्चावलम्बितग्रन्थदिशा च निर्मिते लेखे स्फोटविचारविषये प्रविधिसाहाय्ये च सहयोगदातृभ्यो सुधीभ्यो गुरुवर्येभ्यो हार्दिकं धन्यवादं निवेदयामि।

**उपसंहारः**

यत अर्थप्रकाशनं भवति सः स्फोटो वर्तते। पाणिनिना "अवङ् स्फोटायनस्य" ६।१।१२३ इति सूत्रे स्फोटायनशब्दस्योल्लेखनं कृत्वा स्फोटशब्दस्य सङ्केतः कृतः। तथैव 'अक्षरणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः' इति हरिवंशपुराणे 'दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः' इति श्रीमद्भागवतपुराणे 'व्यङ्ग्येन वा न नहि लक्षणया कदापि, स्फोटेन यच्च कवयो न विशन्ति मुख्याः। निर्देशभावरहितं प्रकृतेः परञ्च त्वां ब्रह्म निर्गुणमलं शरणं व्रजामः ॥' इति गर्गसंहितायाञ्च स्फोटस्य प्रयोगो दृश्यते। विशेषतः स्फोटस्य चर्चा शब्दशास्त्रे विहिता वर्तते। मध्ये मध्ये वृत्याश्रयविषये चतुर्वाचः विषये च व्याख्याकृता। वर्णपदवाक्यस्फोटेषु वाक्यस्फोटस्य मुख्यत्वं वर्तते। तत्रापि वाक्यपदीये पातञ्जलभाष्ये परमलघुमञ्जूषायां वैयाकरणभूषणसारे स्फोटवादे स्फोटसिद्धिग्रन्थे विस्तृतविवरणं वर्तते। वस्तुतस्तु स्फोटः अर्थव्यञ्जकोऽस्ति। मध्यमा वाणी स्फोटव्यञ्जका भवति। स्फोटः ब्रह्मस्वरूपो वर्तते। स्फोटोऽर्थप्रकाशको विद्यते। एकोऽखण्डोऽपि स्फोटः उपाधिभेदे कल्पनया वर्णपदवाक्यानां व्यक्तिजातिखण्डाखण्डादिभेदने अष्टौ भेदाः सन्ति। यद्यपि च स्फोटसिद्धान्तप्रवर्तनं स्फोटायनाचार्येण कृतमिति पतञ्जल्यादिकल्पना परिस्फुरिता, तथापि स्फोटशब्दस्य सम्प्रयोग ईश्वरप्रभवस्य भगवल्लिङ्गरूपस्य त्रिमात्रकस्य "प्रणवस्य" स्फोटत्वनिरूपणप्रसङ्गे वेदव्यासेन स्फुटं कृतः श्रीमद्भागवते–

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः।
हृदयाकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ॥
श्रृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्।
येन वाग् व्यज्यते तस्य व्यक्तिराकाश आत्मनः (शर्मा,१२।६।४०, वि.सं.२०३८, पृ.४०) ॥

अयमेव प्रणवस्फोटः परिवर्तिनी काले परम्परया वर्णपदाद्यष्टस्फोटतां प्रापितो मर्मज्ञैरिति मे मतिः। व्यक्तानां वर्णसमूहात्मकशब्दानां पूर्णताया अवबोधः स्फोटेनैव जायते। यथा गौरित्यत्र शब्दे वर्णास्त्रयो गकार औकार विसर्जनीयश्च (ग् औ : )। यदा कश्चन वक्ता गौरिति समुच्चारयिष्यति, तदा त्रयोऽमी वर्णाः क्रमशो ध्वनितरङ्गत्रितयरूपैः श्रोतृश्रोत्रशष्कुलीमाहत्य नादं जनयिष्यन्ति, किन्तु गौरिति, पूर्णशब्दस्य प्रतीतिस्तु वर्णत्रयसंबलितत्वरूपेणैव भविष्यति, न तु पृथक् पृथग् वर्णस्य। स्फोटप्रक्रियाधुनिकदृष्ट्यापि – लोके यथा संगणके कार्यं भवति, तर्हि आदौ टङ्कणं भवति, पुनः 'सी.पि.यू.' मध्ये कार्यं भवति, पुनः मुद्रितं भवति। तदा प्रतिभाति यन्मध्ये यत् कार्यं जातं सैव स्फोटः। तथैव प्रतिपलोपलब्धद्रव्यगृहेऽपि (एटीएम) कार्डनिवेशानन्तरं या प्रक्रिया भवति साऽपि स्फोटस्यैव स्वरूपा भवति। स्फुट्यते अर्थो अनेनेति स्फोटः। शब्दतत्वं शब्दब्रह्मैव स्फोट इति निष्कर्षयन्ति शाब्दिकाः। वाक्यपदीयस्य वैयाकरणभूषणसारस्य परमलघुमञ्जूषायाः पातञ्जयभाष्यस्यान्यस्य च स्फोटविमर्शनने पुराणादिषु विनियोगप्रयोगेण विविधोहापोहैश्च अर्थप्रकाशकतत्त्वैव स्फोट इति निष्कर्षः समासादितः।

**सन्दर्भसामग्रीसूची**

अवस्थी, शिवशङ्करः. (सन् २०१६) वाक्यपदीयम्. वाराणसी : चौखम्बाविद्याभवन।

त्रिपाठी, जयशंकरलालः. (वि.सं २०७९) परमलघुमञ्जूषा. वाराणसी : चौखम्बा–कृष्णदास–अकादमी ।

दाहालः, लोकमणिः. (सन् २०११) परमलघुमञ्जूषा. वाराणसी : चौखम्बा सुरभारती प्रकाशन्म्

पाण्डेयः, गोपालदत्तः. (सन् २०१३) अष्टाध्यायी. वाराणसी : चौखम्बा सुरभारती प्रकाशनम् ।

शर्मा, गिरिधरः. (विं. सं.२०३८) श्रीमद्भागवतमहापुराणम्. वाराणसी : चौखम्बा–कृष्णदास–अकादमी।

शास्त्री, चारुदेवः. (सन् २०१७) महाभाष्यम्. न्युदिल्ली : एन ए बी प्रिटिङ्ग यूनिट।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

# कारकान्तर्गतस्य कर्मपदार्थस्य निरूपणम्

योगराजः कण्डेलः
उपप्राध्यापकः
शारदाविद्यापीठम्, महेन्द्रनगरम्
Gmail: yograjkandel5@gmail.com
DOI:

**सारसङ्क्षेपः**

पाणिनीयाष्टाध्याय्यां विद्यमानस्य 'कर्तुरीप्सिततमं कर्म' इति सूत्रस्य पदकृत्यपुरश्सरमध्ययनमत्रालेखे विहितमस्ति। विशेषरूपेण सूत्रस्यार्थपरिष्कारपूर्वकं तत्र च विद्यमानानाम् अव्याप्ति–अतिव्याप्ति–असम्भवादीनां दोषाणाञ्चोद्भावनं विधाय तेषां परिहाराय शेखरादिग्रन्थानुरूपं व्याख्यानमत्र विहितमस्ति। नव्यन्यायशैल्या सूत्रस्थपदानां निर्वचनं कृत्वा कर्मपदार्थस्य निर्दुष्टं लक्षणमत्रोपस्थापितं विद्यते। शब्दशास्त्रे विद्यमानेषु षड्विधसूत्रेषु 'कर्तुरीप्सिततमं कर्म' इति संज्ञाविधायकं सूत्रमस्ति। तत्र च सूत्रे कर्तुरिति षष्ठ्यन्तं पदमस्ति, ईप्सिततममिति प्रथमान्तं पदमस्ति कर्म इति च प्रथमान्तं पदं विद्यते एतावता सूत्रे त्रीणि पदानि विद्यन्ते। तथा च कर्तुः ईप्सिततममित संज्ञिदलमस्ति कर्म इति च संज्ञादलमस्ति। सूत्रस्य प्रारम्भिकदशायां परिष्कृतार्थो भवति कर्तृवृत्तिव्यापारजन्यफलाश्रयत्वं कर्मत्वम् इति। अर्थात् कर्तुः व्यापारेण उत्पन्नस्य फलस्याश्रयो यो भवति तत्कर्म इति। यथा 'राघवः विद्यालयं गच्छति' इत्यत्र राघवस्य गम्धात्वर्थोत्तरदेशसंयोगानुकूलव्यापारद्वारा जन्यं फलम् उत्तरदेशसंयोगः, तस्य आश्रयश्च विद्यालय इति तेन भवति विद्यालयस्यानेन कर्मत्वमिति। तथा च 'कर्मणि द्वितीया' इति द्वितीयायां सत्यां राघवः विद्यालयं गच्छति इति वाक्यं सम्पद्यते। एवं रूपेण कर्मसंज्ञाविधायकस्य 'कर्तुरीप्सिततमं कर्म' सूत्रस्य गुणदोषप्रदर्शनपूर्वकं सूत्रार्थस्य परिष्कारोऽत्र विद्यते। परिष्कृतार्थश्च–प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयाभिन्नाश्रयवृत्तिव्यापारविशिष्टफलाश्रयत्वप्रकारिका या वर्तमाकालीनी या इच्छा तादृश इच्छा निरूपिता या विषयता तादृशविषयताश्रयाभिन्नं (विषयताश्रयीभूतम्) यत्कारकं तदभिन्नं कर्म इति।

**कूटशब्दाः** - ईप्सिततमम्, प्रयोज्य, धर्मितावच्छेदक, व्यपदेशिवद्भावः,विषयताश्रयः।

## विषयपरिचयः

कारकत्वञ्च नाम करोति क्रियां निर्वतयति, सम्पादयति, अन्वयति वा कारकमिति भाष्यकारेणोक्तम्। एवञ्च क्रियाजनकत्वम्, क्रियान्वयित्वं वा कारकत्वमिति फलति। एतावता क्रियानिष्ठजन्यतानिरूपितजनकतावत्त्वं कारकत्वमिति सामान्यतः कारकस्यार्थो निष्पद्यते (उपाध्यायः, १९६६, पृ. ७७४)। तथा च सर्वेषां कारकाणां स्वस्ववान्तरक्रियाद्वाराप्रधानक्रियानिष्पादकत्वमिति ज्ञेयम्। कारकप्रकरणम् इति कौमुद्यादिग्रन्थेषु दृश्यते तथापि सम्बन्धोऽपि विभक्त्यर्थः, कारकोऽपि विभक्त्यर्थः अतः विभक्त्यर्थप्रकरणमिति दीक्षितेन सिद्धान्तकौमुद्यां कारकनिरूपणावसरे उक्तम्, अथवा बाहुल्याभिप्रायेण कारकप्रकरणम् इत्यप्यनापत्तिः, तेन दीक्षितशिष्येण वरदराजाचार्येण

लघुसिद्धान्तकौमुद्यां कारकप्रकरणमुक्तम् । यद्यपि 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति परिभाषायाः व्याख्यानप्रसङ्गे भूतितिलकटीकायां सम्बन्धस्यापि कारकत्वं ग्रन्थकृता प्रतिपादितं तच्च न लौकिकम् । (वैजापुरकरः, २०३९, पृ. १०८) अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति, (न निर्दिष्टाः अर्थाः एषां ते अनिर्दिष्टार्थाः) यथा याव एव यावकः, स्वसम्बन्धिप्रकृत्यर्थ एव स्वार्थिकप्रत्ययानामर्थः, कप्रत्ययस्य याव एवार्थः । किन्तु पाचक इत्यादौ 'कर्तरि कृत्' इति सूत्रेण कर्त्रर्थे भवति प्रत्ययः तेन तत्रार्थो निर्दिष्टोऽतः पाककर्ता पाचकपदाद् ज्ञायते । यदि अत्रापि केवलप्रातिपदिकात् स्वादयः विधीयन्ते चेत् सर्वेषां स्वादिप्रत्ययानां प्रातिपदिकार्थत्वमेव स्यात् । अत सर्वेषां पर्यायतापत्तिः (आनुपूर्वीभिन्नत्वे सति समानार्थकत्वम्)

घटम् आनय इत्यत्र कदाचित् घटेन, घटः घटाय वा एवं स्यात्, घटेन कृतम् इत्यादावपि एवं स्यात्, सर्वेषां समानार्थकत्वात् । पर्यायत्वञ्च नेष्टम् । अतः एव स्वादिप्रत्ययानां पर्यायत्वं न स्याद् एतदर्थं अर्थविशेषं व्यवस्थापयितुं पाणिनिना अनभिहिताधिकारमारभ्य कर्मणि द्वितीया इत्यादिरारब्धः । यद्यपि 'द्व्येकयोर्द्विवचनैकवचने' इत्यादेः स्वौजस् इत्यनेन एकवाक्यतया एकवचनस्य एकत्वम्, द्विवचनस्य द्वित्वाद्यर्थाः निर्दिष्टाः सन्ति तथापि कदाचित् घटः इत्यस्य स्थाने घटम्, घटेन वा इत्यादिप्रयोगापत्तिः तदवस्था एव । (एकवचनानाम्, द्विवचनानाम्, बहुवचनानाम्, पर्यायतापत्तिः) अतः विशेषार्थव्यवस्थापनार्थमारब्धमिदं कारकप्रकरणम् । तथा एकवाक्यतया प्रातिपदिकात् प्रातिपदिकगतैकत्वविवक्षायां प्रथमायाः एकवचनं भवति । एवञ्च प्रातिपदिकात् कर्मगतैकत्वविवक्षायां द्वितीयायाः एकवचनम् एवं रीत्या व्यवस्था भवति, न क्षतिः । यद्यपि पाणिनिना अष्टाध्याय्यां अनभिहिताधिकारानन्तरं 'कर्मणि द्वितीया' इत्यादिकं कृतम्, उपान्ते प्रातिपदिकार्थसूत्रं तथैव अन्ते च सम्बोधने च इति (द्विवेदी, सन् २०१८,२४ ) तथापि दीक्षितेन लौकिकीं सरणिमनुसृत्य प्रथमं प्रातिपदिकार्थेति सूत्रस्य उपन्यासो विहितः । कारकप्रकरणे पठितानां सूत्राणां पृथग्वाक्यार्थबोधो न भवति, स्वौजस् इत्यादिना एकवाक्यतयैव तथापि सरलतया बोधनार्थं पृथग्वाक्यार्थबोधः कारकप्रकरणे क्रियते । अत्र च कर्मत्वप्रतिपादनपूर्वकं 'कर्तुरीप्सिततमं कर्म' इति सूत्रस्य व्याख्यानमत्र विहितमस्ति ।

**अध्ययनविधिः**

निगमात्मकविधिमागमात्मकिविधिञ्चाश्रृत्यायं निबन्धो विरचितः । कुत्रचिद् व्यासशैलीं कुत्रचित् समासशैलीमाश्रृत्यानुसन्धानं विहितमस्ति । मुख्यतया पुस्तकालयीयविधिमवलम्ब्यैव कृतमिदमध्ययनम् । अत्र शेखरमनोरमाग्रन्थौ तथैव तदभिमतप्रतिपादका टीकाग्रन्थाश्च संस्कृतमूलकारग्रन्था एव प्रमुखसामग्रीत्वेन प्रयुक्ता वर्तन्ते । अनुसन्धानेस्मिन् हिन्दीनेपाल्यादिभाषायां लिखिता अनूदिताश्च व्याकरणसम्बद्धा कारकार्थप्रतिपादकाः ग्रन्था अपि द्वितीयसामग्रीत्वेन गृहीतास्सन्ति ।

**अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च**

अस्मिन् आलेखे कारकस्य सामन्यपरिचयप्रदर्शनम्, कर्मत्वस्य परिष्कारपूर्वकं कर्मकारकस्य परिचयो विद्यते । शेखरमनोरमाग्रन्थानुसारं कारकनिरूपणावसरे यन्मतवैविध्यं वर्तते तस्य स्पष्टतया विवेचनम्, विश्लेषणमेवास्यानुसन्धानात्मकलेखस्य मूलं क्षेत्रं सीमा च वर्तते ।

**विषयनिरूपणम्**

दीक्षितेन सिद्धान्तकौमुद्यां कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्याद् इत्युक्वा सूत्रार्थो निर्दिष्टः ( शर्मा, सन् २०१४, ५९७) । तथा च सूत्रे त्रीणि पदानि विद्यन्ते । कर्तुरिति षष्ठ्यन्तं पदमस्ति, ईप्सिततममिति प्रथमान्तं पदमस्ति, कर्म इति च प्रथमान्तं पदं विद्यते । अत्र च कर्तुरिति पदस्य व्याख्यानात्पूर्वं ईप्सिततममिति पदस्य व्याख्यानमपेक्षितं भवति । ईप्सिततमं पदञ्च आप्तधातोः सनि क्तप्रत्यये ततः तमप्कृते सति ईप्सिततमं पदस्य निष्पत्तिर्जायते । धातुस्तावत् सम्बन्धार्थकः, सन्प्रत्ययस्यार्थो वर्तते इच्छा, क्तप्रत्ययस्यार्थो विषयताश्रयः, तमप्प्रत्ययस्य च अतिशयोऽर्थो भवति । ईप्सिततमं पदस्य निष्पत्तौ च इच्छायां सनि ततः 'सन्यङोः' इति सूत्रेण द्वित्वे आप् आप् स इत्यवस्थायमभ्याससंज्ञायां सत्यामभ्यासस्य 'अत्र लोपोऽभ्यासस्य' इति सूत्रेण लोपो भवति ततः धातोराकारस्य 'आप्ज्ञाप्यृधामीत्' इति सूत्रेण ईत्वे कृते सति ईप्स इति शब्दस्य निष्पत्तिर्भवति । ततः 'सनाद्यन्ताः धातवः' इति सूत्रेण धातुसंज्ञायां 'मतिबुद्धिपूजार्थेभ्यश्च' सूत्रेण वर्तमानेऽर्थे क्तप्रत्ययः ततः इडागमे, अकारस्य लोपे च ईप्सित इति शब्दो भवति । पुनः अतिशयेन ईप्सितमिर्त्ये 'अतिशायने तमबिष्ठनौ' इति सूत्रेण तमप्प्रत्यये सति ईप्सिततमं पदं भवति । अत्र च आप्धात्वर्थः सम्बन्धः, सन्प्रत्ययश्चेच्छा, क्तप्रत्ययस्यार्थश्च विषयताश्रयः, तमपश्च अतिशय इति । यथा राज्ञः पुरुषः इत्यत्र षष्ठ्यर्थः सम्बन्धः । सामान्यरूपेण षष्ठ्यर्थश्च सम्बन्धो भवति । विशेषसम्बन्धस्य जिज्ञासायां तु अत्रापि स्वस्वामिभावरूपसम्बन्धो भवति । एवमेवात्रापि आप्धात्वर्थसम्बन्धस्य जिज्ञासायां व्यापारविशिष्टफलाश्रयत्वरूपविशेषसम्बन्धस्य लाभो भवति । तथा च सन्प्रत्ययस्य इच्छायाञ्च आप्धात्वर्थसम्बन्धस्य स्वप्रकारकत्वसम्बन्धेनान्वयो भवति (व्यापारविशिष्टफलाश्रयत्वप्राकारिका या इच्छा ) । तेन व्यापारविशिष्टफलाश्रयत्वप्रकारिका या इच्छा तस्य च क्तप्रत्ययार्थविषयताश्रयस्यैकदेशे विषयतायां निरूपितत्वसम्बन्धेनान्वयो भवति (व्यापारविशिष्टफलाश्रयत्वप्रकारिका या इच्छा तादृशेच्छा निरुपिता या विषयता तदाश्रयः) । पुनश्च तस्य च अभेद सम्बन्धेन कारके तस्यापि अभेदसम्बन्धेनैव कर्मणि अन्वयो भवति तथा च व्यापारविशिष्टफलाश्रयत्वप्रकारिका या इच्छा तादृशेच्छा निरूपिता या विषयता तादृशविषयताश्रयाभिन्नं (विषयताश्रयीभूतम्) यत्कारकं तदभिन्नं कर्म इति निष्पद्यते । ईप्सिततममिति पदादेवंरूपोर्थो भवति । तत्र च तमपश्च अतिशयेऽर्थे भवति । सामान्यतया नियमो भवति तमप्प्रत्ययस्य या प्रकृतिः तत्र प्रकारीभूतो योऽर्थः तद्गतम् अतिशयत्वं तमपा गृह्यते । यथा पटुतमः इत्यत्र तमप्प्रत्ययस्य प्रकृतिः पटुः तत्र च प्रकारिभूतो धर्मः पटुत्वम्, तेन पटुगतातिशयस्य ग्रहणं तमप्प्रत्ययद्वारा गृह्यते । तथा चात्रापि ईप्सितशब्दादपि तमप्प्रत्ययो भवति, प्रकृतिश्चेप्सितेति तत्र प्रकारश्च सम्बन्धः, इच्छा च द्वे वर्तेते । तेन ईप्सितपदस्यार्थे सम्बन्धः इच्छा च प्रकारीभूय भासेते अतः तत्र किंगतमतिशयत्वं ग्राह्यं सम्बन्धगतं, इच्छागतं वा इत्याशङ्कामुदेति । स्वल्पेच्छादशायामपि कदाचित् चैत्रः ग्रामं गच्छति इत्यादिप्रयोगाः जायन्ते तेन अनिच्छयापि ग्रामगमने ग्रामं गच्छति इत्यादौ कर्मत्वं न स्यात् अतः अस्मिन् प्रसङ्गे इच्छागतमतिशयत्वं नैव गृह्यते अपितु सम्बन्धगतमतिशयत्वमेवात्र स्वीक्रियते । सम्बन्धगतमतिशयत्वञ्च स्वप्रयोजत्वरूपमिति । तथा च सूत्रे कर्तृग्रहणसामर्थ्यात् सम्बन्धगतवैशिष्ट्यञ्च स्ववाचकधातुवाच्यत्वरूपस्य लाभो भवति । अत्र सूत्रे कर्तृपदाभावेऽपि इच्छायाः यत्किञ्चित्कर्तृनिष्ठत्वेन कर्तृपदस्य लाभो भवति । अथवा कारकाधिकारस्य विद्यमानत्वात् कारकवृत्तिः यो व्यापारः एवं रीत्यापि कर्तृपदस्य लाभो भवत्येव । तेन कर्तृपदस्य व्यर्थत्वमस्त्येव तेन व्यर्थं सत्किञ्चज्ज्ञापयति इति नियमेन स्ववाचकधातुवाच्यत्वस्य ज्ञापनं भवति । एतावता सूत्रस्यार्थो –व्यापारविशिष्टफलाश्रयत्वप्रकारिका या इच्छा तादृश इच्छा

निरूपिता या विषयता तादृशविषयताश्रयाभिन्नं (विषयताश्रयीभूतम्) यत्कारकं तदभिन्नं कर्म । तत्र च सम्बन्धगतं वैशिष्ट्यञ्च स्वप्रयोज्यत्वम्, स्ववाचकधातुवाच्यत्वरूपमिति।

**ईप्सितपदस्य विवेचनम्**

सूत्रे विद्यमानस्य ईप्सितपदस्य यौगिकत्वं रुढित्वं वा इति विदुषां मतवैविद्यं वर्तत एव । नागेशभट्टेन लघुशब्देन्दुशेखरे उक्तम्– ईप्सितशब्दोऽत्र क्रियापरः नाभिप्रेतपरः, पाचकादिवत् क्रियाप्रवृत्तिनिमित्तकः, न गवादिशब्दवत् रूढः अत्र योगाद्रूढिर्बलीयसी इत्यस्य बाधः भाष्यप्रामाण्यात् । ईप्सितशब्दस्य रूढ्यर्थस्तु अभिप्रेतम्र, अभीष्टो वा (आचार्यः, २०१७, २२४) यौगिककार्थस्तु व्यापारविशिष्टफलाश्रयत्वप्रकारिकेच्छेति । अत्र च द्वयोर्मध्ये कस्यार्थस्य ग्रहणं भवतीति जिज्ञासायां योगाद्रूढेर्बलीयस्त्वमिति नियमाद् रूढिशक्तिद्वारा रूढ्यर्थस्यैव ग्रहणमपेक्षितं भवति तथापि अत्र यौगिकार्थस्यैव ग्रहणं विधीयते । यौगिकार्थग्रहणादेव कर्तुः इत्यत्र 'क्तस्य च वर्तमाने' इति सूत्रेण षष्ठी भवति । अनेन सूत्रेण च वर्तमानकालीनशक्तिमतः क्तस्य योगे षष्ठी भवति । अत्र च ईप्सितपदे क्तप्रत्ययोऽपि वर्तमानेऽर्थे एव वद्यते । अन्यथा यदि ईप्सितपदं अभिप्रेतपरकमिति स्वीक्रियते चेद् कर्तुरित्यत्र शेषे षष्ठी भवति न तु कर्तरि । षष्ठ्यर्थस्तु सम्बन्धः स च वृत्तित्वरूपसम्बन्धः तेन सूत्रार्थो भवति कर्तृवृत्तिर्या इच्छा तदाश्रयस्यैव कर्मसंज्ञा भवतु इति । अतः रुढ्यर्थे यदि षष्ठी विधीयते चेद् घटे नैल्यं करोति इत्यादो देवदत्तवृत्तिरिच्छायाः विषयो घटोऽपि भवति यथा कर्ता इच्छति अयं घटः नीलत्ववान् भवतु इति अत्र इच्छाविषयीभूतः घटोऽपि अतः कर्तृवृत्तिर्या इच्छा तादृश इच्छाविषयीभूतस्य घटस्यापि कर्मत्वापत्तिः । तथा च कर्मत्वाधिकरणत्वयोरुभयोः प्राप्तौ सत्यां परत्वात् कर्मसंज्ञा एव भवति । अतः अत्र योगशक्तिद्वारा सिद्धस्य ईप्सितशब्दस्यैव ग्रहणं भवततीति । तेन कर्तुरित्यत्र षष्ठी कर्तरि एव भवति न तु शेष इति ।

**कर्तुः पदविवेचनम्**

अत्र च कर्तृपदेन कस्य ग्रहणं भवति ? कर्तृशब्दात् कर्तरि अर्थे ङस्प्रत्ययेन कर्तुरिति शब्दो निष्पद्यते । प्रकृत्यर्थः कर्ता, प्रत्ययार्थोऽपि कर्तेति । पुनश्चात्र जिज्ञासा जायते कर्तृशब्दात् कर्तरि ङस्प्रत्ययो भवति तथा च प्रकृत्यर्थोऽपि कर्ता इति तेन प्रकृत्यर्थप्रत्ययार्थयोरैक्याद् घटो घट इतिवद् उद्देश्यतावच्छेदकविधेययोरैक्यान्न शाब्दबोधः। यथा घटमुद्दिश्य घटत्वस्य विधानं न भवति तथैव कर्तारमुद्दिश्य कर्तृत्वमपि न विधीयते अथवा धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति तद्धर्मभेदस्य कारणत्वं भवति । अभेदसम्बन्धावच्छिन्नप्रकारतानिरुपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रकारतावच्छेदकविशेष्यतावच्छेदकधर्मयोर्भेदः कारणम् (आचार्यः, २०७३, ४९) । यथा धर्मितावच्छेदकघटत्वस्य सामानत्वान्न न शाब्दबोधो भवति तथैवात्रापि कृत्यर्थप्रत्ययार्थयोरैक्याद् न शाब्दबोध इति । तेनात्र विद्यमानस्य प्रकृत्यर्थस्य न केवलं कर्ता एवार्थः अपितु 'स्वतन्त्रः कर्ता' इत्यत्र विद्यमानस्य व्याकरणशास्त्रे प्रसिद्धस्य प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयरूपस्य पारिभाषिककर्तुरिति पदस्य ग्रहणं भवति । तथा च प्रत्ययार्थस्तु कर्ता एव अर्थात् व्यापाराश्रय इति । 'अनन्यलभ्यो हि शब्दार्थः' इति नियमस्य विद्यमानत्वात् व्यापारस्य च धातुलभ्यत्वाद् आश्रयमात्रं प्रत्ययार्थो भवति । अतः नव्यनैयायिकमते यथा नीलघटो घटः इत्यादिस्थले विधेयांशे अधिकस्यावगाहनेऽपि शाब्दबोधो भवति तद्वदत्रापि प्रकृत्यर्थे अधिकावगाहनेन प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रे प्रत्ययार्थ (आश्रय) स्य अभेदसम्बन्धेन

अन्वयो भवत्येव । एतावता सूत्रार्थो भवति – प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयाभिन्नाश्रयवृत्तिव्यापारविशिष्टफलाश्रयत्वप्रकारिका या इच्छा तादृशेच्छा निरूपिता या विषयता तादृशविषयताश्रयाभिन्नं (विषयताश्रयीभूतम्) यत्कारकं तदभिन्नं कर्म । तथा सति रामः गृहं गच्छति इत्यत्र गम्धातूपात्तप्रधानीभूतदेवदत्तवृत्तिव्यापारजन्यफलाश्रयत्वेनेच्छोद्देश्यस्य ग्रामस्य विद्यमानत्वाद् भवति ग्रामस्य कर्मसंज्ञा इति । । देवदत्तः इच्छति अयं ग्रामः मद्वृत्तिव्यापारजन्यफलाश्रयो भवतु इति । तथा च कर्मणि द्वितीया सूत्रेणा द्वितीया भवति तेन देवदत्त ग्रामं गच्छति इति वाक्यं निष्पद्यते ।

**तमब्ग्रहणस्य प्रयोजनम्**

सूत्रे तमप्ग्रहणसामर्थ्यात् स्वप्रयोज्यत्वस्य लाभो भवतीति पूर्वमेवोक्तम् । तमब्ग्रहणाभावे सूत्रं भवति कर्तुरीप्सितं कर्म इति । कर्तृपदसामर्थ्यात् वैशिष्ट्यनियामकसम्बन्धस्य स्ववाचकधातुवाच्यत्वस्य लाभो भवत्येव तेन अवच्छेदकावच्छेदेन सर्वत्र धातुषु ईप्सितपदस्य कर्मसंज्ञा भवत्येव । तथा सति वारिधातुघटितवाक्येऽपि ईप्सितपदस्य कर्मसंज्ञा भवत्येव तेन 'वारणार्थानामीप्सितः' इति सूत्रस्य वैयर्थ्यं स्पष्टमेव । अनेन सूत्रेण च सर्वेषु धातुघटितवाक्येषु ईप्सितस्य सामान्यरूपेण प्राप्तस्य कर्मसंज्ञायाः वारिधातुघटितेप्सितपदे तु निरवकासत्वेन 'व्याप्यधर्मावच्छिन्नोद्देश्यताकशास्त्रेण व्यापकधर्मावच्छिन्नोद्देश्यताकशास्त्रस्य बाधः' इति नियमाद् कर्तुः सूत्रं प्रबाध्य 'वारणार्थानामीप्सितः' इति सूत्रेण माता अग्नेः माणवकं वारयति इत्यादिस्थले अग्नेः माणवकस्य च अपादानसंज्ञापत्तिर्जायते । अत एव सूत्रे तमब्ग्रहणं कृतमस्ति । अत्र च वारिधातुघटितवाक्यप्रयोगे सति तद्वाक्ये घटकीभूतस्य ईप्सितपदस्य 'वारणार्थानामीप्सितः' इति सूत्रेण निरवकासत्वाद् माणवकस्य अग्नेश्च द्वयो अपादानसंज्ञे भवतः । अत्र च माणवकः अग्निसमीपं गन्तुमिच्छति, माता – तदभावानुकूलव्यापारं करोति इति । वारिधात्वर्थस्तु प्रवृत्तिविघातः अर्थात् उत्तरदेशसंयोगानुकूलव्यापाराभावानुकूलव्यापारः इति । यथा अत्र च सूत्रे प्रकृतधातुः = वारिधातुरिति, प्रकृतधातूपात्तप्रधानीभूतव्यापारः = मातृवृत्तिव्यापारः, तद्विशिष्टफलम् = वैशिष्ट्यञ्च – स्ववाचकधातुवाच्यत्व, स्वम् = व्यापारः (मातृवृत्तिः) तद्वाचकधातुः = वारि, तद्वाच्यत्वम् = उभयत्र उत्तरदेशसंयोगे अभावे च, तदाश्रयः = उत्तरदेशसंयोगः स च समवायसम्बन्धेन अग्नौ वर्तते, अभावानुकूलव्यापारजन्यफलञ्च अभावः तस्य चाश्रयो भवति स्वरूपसम्बन्धेन माणवक इति तेन द्वयोः इच्छोद्देश्यत्वाद् कर्मसंज्ञां प्राप्नोति । अयं माणवकः मद्वृत्तिव्यापारजन्यफलाश्रयो भवतु, अतः स्ववाचकधातुवाच्यत्वस्य उत्तरदेशसंयोगे अभावे च सत्त्वात् उभयत्र कर्मसंज्ञा भवति । तथा सति 'वाराणार्थानामीप्सितः' इति सूत्रं निरवकाशम् भवति तथा च निरवकाशत्वेन कर्तुः सूत्रस्यापवादो भवति तथा च कर्तुरिति सूत्रं च वारिधातुघटितवाक्यातिरिक्ते एव प्रवर्त्तते । अतः अत्र पुनः अग्नौ माणवके च अपादानत्वापत्तिः अतः सूत्रे तमब्ग्रहणं कृतमस्ति । कृते च तमपि स्वप्रयोज्यत्वरूपसम्बन्धस्य लाभो भवति । प्रयोजत्वनाम– जन्यत्वम्, जन्यजन्यत्वं वा । वारिधात्वर्थव्यापारः – उत्तरदेशसंयोगानुकूलव्यापाराभावानुकूलव्यापारः, तद्प्रयोज्यत्वञ्च = अभावः इति, न तु उत्तरदेशसंयोगः, उत्तरदेशसंयोगस्तु माणवकवृत्तिव्यापारजन्यो वर्तते । अतः उभयत्र धातुवाच्यत्वं वर्तते तथैव माणवकस्य व्यापारप्रयोज्याभावस्याश्रयस्य ईप्सिततमत्वाद् कर्मसंज्ञा भवति । अग्नौ तु ईप्सितत्वाद् अपादानसंज्ञा भवति । एतावता द्वयोः सूत्रयोः प्रवृत्तिस्थलभिन्नत्वान्न दोष इति । ईप्सिततमस्थले कर्तुः सूत्रस्य तथा च ईप्सितपदार्थे वारणार्थानामिति सूत्रस्य प्रवृत्तिर्भवति । अभावजन्यञ्च

उत्तरदेशसंयोगो नैव भवति, अपितु माणवककवृत्तिव्यापारजन्यो भवति । यदीप्सिततमं भवति तद् अनायासेन ईप्सितं भवत्येव । तथा च माणवकस्य ईप्सिततमत्वेऽपि ईप्सितं भवत्येव तथा च अपादानसंज्ञामपि प्राप्नोति तथापि परत्वात् 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण वारणार्थानामिति सूत्रस्य बाधो भवति । तथा च परत्वाद् ईप्सिततमपदार्थे कर्तुरिति सूत्रस्य तथा च ईप्सितपदार्थे वारणार्थानामिति सूत्रस्य प्रवृत्तिर्भवति । प्रवृत्तिस्थलभिन्नत्वादुभयत्र सामाञ्जस्यं भवत्येव न दोष इति । स्वप्रयोज्यत्वस्य लाभादेतत्सर्वं सम्पद्यते । अत्र च पुनः भृत्यः अग्नेः माणवकं वारयति इत्यवस्थायां भृत्यमिच्छति माणवक अग्नौ प्रति गच्छेदिति किन्तु स्वामिभयात् तं वारयति अत्र यथा भृत्यस्य इच्छोद्देश्यं यथा माणवको भवति तथैव अग्निरपि भवति, तेनोभयत्र कर्मसंज्ञां प्राप्नोति । तथा च वारणार्थानामिति सूत्रं व्यर्थं भवति, एवमेव माता वारयति इत्यत्र प्रकृतधातूपात्तप्रधानीभूतव्यापारविशिष्ट–फलाश्रयत्वञ्च (स्ववाचकधातुवाच्यत्वेन उभयत्र वर्तते) अग्नौ माणवके च वर्तेते । अतः फलाश्रयत्वेन इच्छोद्देश्यत्वान् माणवके एवञ्च फलाश्रयत्वेऽपि अनीप्सितत्वात् तथायुक्तं चानीप्सितमिति सूत्रद्वारा प्राप्नोति एव । एतावता उभयत्र कर्मसंज्ञासिद्धत्वात् वाराणार्थानामिति सूत्रं व्यर्थमस्तीति ।

**इच्छोद्देश्यस्य फलम्**

यदि अत्र सूत्रे प्रकृतधातूपात्तप्रधानीभूतव्यापारजन्यफलाश्रयत्वमात्रमुच्यते चेत् चैत्रः काशीं गच्छन् पथि मृतः इत्यत्र चैत्रवृत्तिव्यापारः = उत्तरदेशसंयोगानुकूलव्यापारः, तद्जन्यफलम् = संगोगः, तदाश्रयश्च काशी नैव भवति तेन काशीपदस्य कर्मसंज्ञा नैव भवति । तथा सति इच्छोदेश्यत्वनिवेशे सति वारणं भवत्येव । यतो हि चैत्र इच्छति इयं काशी मद्वृत्तिव्यापारजन्यफलाश्रयो भवतु इति इत्याकारिकाया इच्छायाः विद्यमानत्वाद् संयोगाभावेऽपि कर्मसंज्ञा भवत्येव । शेखरग्रन्थानुसारेण तु ईप्सितपदञ्च क्रियापरकः अर्थात् पाचकः, पाठकः इत्यादीनामिव यौगिक एव न तु रूढः । भाष्यकारेण 'वारणार्थानामीप्सितः' इति सूत्रे सर्वं स्पष्टरूपेण प्रतिपादितम् । कैयटेनाऽपि उक्तम् ईप्सितशब्दोऽत्र क्रियाशब्दः यौगिक इति यावत्, एवञ्च माषेभ्यो गां वारयति इत्यादौ वारणक्रियया परकीया अपि माषा वारयितुमीप्सिताः भवन्ति, मा नशन्नेते गोर्भक्षणेनेति – एतेभ्यो गां वारयति –इत्यादिरीत्या । एवञ्चेप्सितशब्दस्य सम्बन्द्धुमिष्यमाणमित्यर्थ इतीप्सितशब्दस्य यौगिकत्वं स्पष्टमेव । कर्तुरिति कर्तरि षष्ठी, एतत्सर्वमुपरि व्याख्यातम् । कर्त्रा आप्तुमिष्यमाणं ईप्सितम् (विवरणविव्रीयमाणयोःसमानार्थकत्वनियमात् । यथा पचतीति पाचकः, पठतीति पाठकः तथैव आप्तुमिष्यमाणम् ईप्सितम् इति ।) तदेव कर्म । आप् भावे तुमुन् । आप्तिरित्यर्थः स च सम्बन्धः, इष्यमाणम् इच्छाविषयत्वं सम्बन्धविषयिणी या इच्छा तादृशेच्छा निरूपितविषयताश्रयत्वम् इति । तत्र केन आप्तुमिति करणाकाङ्क्षायाम् उपस्थितत्वात् कर्तृपदार्थविशेषणीभूतव्यापारविशेषणत्वेन (विशेषणीभूतव्यापारेणेति) अन्वेति । एतावता कर्ता स्वनिष्ठव्यापारप्रयोज्यफलेन यद् सम्बद्धुमिच्छति तत् कर्म । यथा ओदनं पचति इत्यत्र चैत्रस्वनिष्ठव्यापारेण प्रयोज्य(जन्य)फलं = विक्लित्तिः, तया यद् = ओदनं, सम्बद्धुमिच्छति अतः ओदनस्य कर्मत्वम् । स्तोकं पचति इत्यादिस्थले स्तोकं पाचयति इति कथने, विक्लित्तौ, स्तोके च भेदो नैवेति स्तोकाभिन्ना विक्लित्तिरिति । स्तोकपदञ्च विक्लित्त्या आश्रयस्तु व्यपदेशिवद्भावेन भवति । व्यपदेशिवद्भावेन क्वचिद् फलस्यापि फलाश्रयत्वेन व्यवहारः ।

**क्तप्रत्ययार्थे वर्तमानत्वविचारः**

आप्धातोः सन्प्रत्ययेन निष्पन्नाद् ईप्सशब्दान् मतिबुद्धिपूजार्थेभ्यश्च इति सूत्रेण वर्तमानेर्थे क्तप्रत्ययो भवति। तस्य च सन्प्रत्ययोपात्तेच्छायामन्वये कृते सति प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयाभिन्नाश्रयवृत्तिव्यापारविशिष्टफलाश्रयत्वप्रकारिका वर्तमाकालीना या इच्छा, तादृशेच्छा निरूपिता या विषयता, तादृशविषयताश्रयाभिन्नं (विषयताश्रयीभूतम्) यत्कारकं तदभिन्नं कर्म एवं कर्मणः स्वरूपं भवति। तथा सति देवदत्तवृत्ति इच्छा – अयं कटः मद्वृत्तिव्यापारजन्यफलाश्रयो भवतु इत्याकारिका वर्तमानकालिकी इच्छा तथा कृते च घटं करोति इति वाक्यं तु निष्पद्यते किन्तु घटं करिष्यति, घटं कृतवान् इत्यादिवाक्येषु आपत्तिर्जायते। यतो हि तत्र वर्तकालिकी इच्छा एव नास्ति अपितु भूत–भविष्यत्कालिकी इच्छा वर्तते। अतः कर्मत्वानापत्तिः तेन क्तप्रत्ययोपात्तं वर्तमानत्वमविवक्षितमिति। एतावता कटं करिष्यति इत्यादिस्थले क्षतिर्नास्ति। न च क्तप्रत्ययोपात्तवर्तमानत्वस्याविवक्षितत्वेन कर्तुरित्यत्र क्तप्रत्ययेनोपस्थापितं यद् वर्तमानत्वं तस्य योगे कर्तरि षष्ठी इत्यर्थकेन क्तस्य च वर्तमाने इति सूत्रेण कथं षष्ठी इति वाच्यम्? तत्र च वर्तमानत्वार्थनिरूपितशक्तिमतः क्तस्य योगे कर्तरि षष्ठी भवति इत्यर्थकेन अनापत्तिः। वर्तमानत्वार्थनिरूपिता शक्तिस्तु अस्त्येव तेन वर्तमानत्वस्य भानाभावेपि षष्ठी भवत्येव न क्षतिरिति।

**कारकार्थविवेचनम्**

कारके इति अधिकारविधायकं सूत्रमस्ति। अधिकारत्वं नाम उत्तरोत्तरसम्बन्धत्वमिति। अत्र प्रथमायाः अर्थे सप्तमीति कारके इति कारकमित्यर्थः। तने कारकप्रकरणे सर्वत्र एककालावच्छेदेन कारकाधिकाराद् संज्ञाद्वयस्य समावेशो वर्तते। न चात्र आकडारीयसंज्ञायाः सत्वात् सूत्रद्वयस्याधिकारं नैव सम्भवति इति चेद्, अत्र कारके इति अधिकारारम्भसमार्थ्यात् जायते अस्यापि अधिकारः। ध्रुवमपायेऽपादानम् इत्यादौ सर्वत्र योगविभागेन अर्थोपस्थापनं विधीयते। यथा ध्रुवमपाये इति एकं सूत्रम्, अपादानम् इति द्वितीयसूत्रम्। तत्र च प्रथमसूत्रे कारकस्याधिकाराद् तस्यार्थो भवति अपाये यद् ध्रुवं तत् कारकसंज्ञं स्यात्, उक्तञ्च कारकम् अपादानसंज्ञं स्यात्। तद्वदत्रापि कर्तुरीप्सिततमं करकं भवतु उक्तञ्च कारकं कर्मसंज्ञं स्यादिति। तथा च अस्याः कारकसंज्ञायाः संज्ञी कः? इति जिज्ञासायां भाष्यकारः कथयति अत्र कारकमिति महती संज्ञा विहिता, अन्वर्था चेयं संज्ञा तेन क्रियाजनकत्वरूपं संज्ञिनम् आक्षिप्तम्। यद् यद् क्रियाजनकं तत् तत् कारकम्। क्रियानिष्ठजन्यतानिरूपितजनकतावत् यत् तत् कारकमिति।

**कर्तुः ग्रहणस्य प्रयोजनम्**

प्रकृतसूत्रे कर्तुरिति षष्ठ्यन्तपदस्य ग्रहणं नैव क्रियते चेद् सूत्रस्य स्वरूपं भवति ईप्सिततमं कर्म इति। तथा च केन ईप्सिततम् इति जिज्ञासायां कारकमित्यस्याधिकारोस्त्येव तथा सति कारकपदे विशेषणीभूतस्य व्यापारस्य लाभो भवत्येव तथा च व्यपारजन्यफलाश्रस्य कर्मसंज्ञा सम्पद्यते सूत्रे कर्तुरिति पदं व्यर्थमिति। यदि व्यापारजन्यफलाश्रयस्य कर्मसंज्ञा क्रियते चेत् चैत्रः माषेषु अश्वं बध्नाति इत्यत्र यथा चैत्रवृत्तिबन्धनव्यापारजन्यफलाश्रयः अश्वो भवति तथैव अश्ववृत्ति(भक्षण) गलबिलाधःसंगोगजन्यफलाश्रयस्य माषस्यापि कर्मत्वापत्तिः अतः कर्तुः पदमत्रावश्यकमिति। (चैत्रः यदि इच्छति – अयं अश्वः माषभक्षणेन पुष्टो भवेत्, या माषनाशो न स्याद् इति एतदर्थं अन्यत्र बध्नाति इति अभिप्रायद्वयम्।) कर्तृपदोपादाने सति चैत्रवृत्तिशंकुसंयोगानुकूलव्यापारजन्यफलाश्रयश्च अश्व एव भवति तस्य च भवति कर्मसंज्ञा, न तु माषस्येति। माषेषु

कर्तृवृत्तिव्यापारजन्यफलाश्रयत्वं नास्ति अपि तु अश्ववृत्तिगलबिलाधःसंगोगानुकूलव्यापारजन्यफलाश्रयत्वं विद्यते अतः न काचित् समस्या। यद्यप्यत्र बन्धधातोः कर्ता चैत्र इति तथैव भक्षधातोः कर्ता अश्व इति। तेनात्र बन्धधातुजन्यफलाश्रयस्य अश्वस्य यथा कर्मसंज्ञा भवति तथैव भक्षधातुजन्यफलाश्रयस्य माषस्यापि कर्मसंज्ञापत्तिस्तु अस्त्येव इत्युच्यते चेद् यद्धातुवाच्यफलाश्रयत्वेनेष्टस्य कर्मत्वं चिकीर्षितं तद्धात्वर्थनिरूपित एव कर्ता गृह्यते इति। अतः बन्धधातूपात्तं फलं भक्षणं नास्ति अतः भक्षणे स्ववाचकधातुवाच्यत्वाभावान्न दोष इति। यदि चैत्रः पुष्ट्यर्थं माषे अश्वं बध्नाति चेत् तत्र बन्धनप्रयोज्य माषोपि भवति तथा च यथा बन्धनधातुप्रयोज्य शंकुसंयोगः तथैव भक्षणमपि भवत्येव। अतः बन्धधातुवाच्यबन्धनरूपफलाश्रयो यथा अश्वो भवति तथैव तज्जन्यं भक्षणमपि प्रयोज्यत्वाद् तदाश्रयस्य माषस्य कर्मसंज्ञा भवत्येव। तेन अत्र स्वप्रयोज्यत्वरूपसम्बन्धेन कर्मसंज्ञायां प्राप्तायामपि वैशिष्ट्यनियामकद्वितीयसम्बन्धस्य स्ववाचकधातुवाच्यत्वरूपस्य अगमनाद् न क्षतिरिति। बन्धधातुवाच्यफलं संयोगः, न तु भक्षणमिति तेन स्वप्रयोजत्वरूपसम्बन्धस्य विद्यमानत्वेपि वैशिष्ट्यनियामकद्वितीयसम्बन्धस्याभावाद् माषस्य कर्मसंज्ञा नैव भवतीति।

**तमबन्तग्रहणस्य प्रयोजनम्**

सिद्धान्तकौमुद्यां तमब्ग्रहणं किम् ? इत्युक्तम् तस्य आशयस्तु तमब् ग्रहणं यत्र इति बहुव्रीहिद्वारा तमब्विशिष्टं ईप्सिततमम् किमर्थम् इति प्रश्नस्य आशयो वर्तते। सूत्रे केवलं कर्तुः इतिमात्रमुच्यते चेत्तत्र उद्देश्यपदस्याध्याहारो भवति तथा च कर्तुरुद्देश्यं कर्म इति भवति, लाघवोपि भवति। पयसा ओदनं भुङ्क्ते (भुज् = गलबिलाधःसंगोयानुकूलव्यापारः) इत्यत्र भोजनानन्तरं यथा पयो लोभेन पुनः भोजने प्रवृत्तिर्भवति तस्यामवस्थायां कर्तुरुद्देश्यं पयोपि भवति तेन तस्य कर्मसंज्ञापत्तिरिति अतः करणरूपस्य पयसः कर्मसंज्ञा न स्याद् इत्येतदर्थम् ईप्सिततममिति पदमावश्यकं भवतीति। यदि च पयसोदनमिश्रितं भक्षणं करोति चेद् तत्र देवदत्तवृतिभक्षणरूपव्यापारजन्यफलाश्रयत्वेन पयसोपि कर्मसंज्ञा भवत्येव।

**प्रयोज्यत्वग्रहणस्य प्रयोजनम्**

प्रकृतसूत्रे वैशिष्ट्यनियामकसम्बन्धत्वेन स्वप्रयोज्यत्वस्य ग्रहणं विहितमस्ति। तेन च जन्यत्वम्, जन्यजन्यत्वं वा अवबुध्यते। अद्यप्यत्र स्वजन्यत्वमात्रोक्तावपि सर्वत्र समन्वयो भवत्येव पुनः स्वप्रयोज्यत्वस्य ग्रहणं किमर्थमिति प्रश्नस्याशयः। यथा गोपः गां पयो दोग्धि इत्यत्र दुह्धात्वर्थः – विभागानुकूलव्यापारानुकूलव्यापारः, तत्र च अन्तिमव्यापाराश्रयो गोपः, तज्जन्यं फलञ्च विभागानुकूलव्यापारः, तस्य आश्रयश्च गौ इति तेन गोः कर्मत्वं सम्भवति किन्तु विभागाश्रयस्य पयसो नैव भवति कर्मसंज्ञा। विभागे स्ववाचकधातुवाच्यत्वस्य विद्यमानत्वेपि स्वजन्यत्वं तु नास्ति तथा सति एकसत्त्वेऽपि द्वयं नास्तीति इति न्यायानुसारेण पयसोपि कर्मत्वं नैव सम्भवति तेन स्वप्रयोज्यत्वमावश्यकं भवतीति विज्ञेयम्। तथा च व्यापारजन्यं फलं विभागानुकूलव्यापारः, तज्जन्यं फलञ्च विभागः, तस्याश्रयश्च पयः इति एतावता कर्मत्वं सुतरां सम्भवति न क्षतिः। अतः स्वप्रयोज्यत्वनिवेशं कृत्वैव भाष्यकारेण अकथितं च इति सूत्रस्य प्रत्याख्यानं विहितमिति।

**कर्मग्रहणस्य प्रयोजनम्**

यद्यपि प्रकृतसूत्रे पूर्वसूत्राद् (अधिशीङ्स्थासां कर्म) कर्मपदस्य अनुवृत्तिं सम्भवति, अनुवृत्तकर्मपदेनैव सम्भवे सति

पुनः सूत्रे कर्मपदग्रहणं व्यर्थमिति । अष्टाध्याय्यां च आधारोऽधिकरणम् इति सूत्रस्थमाधारपदं स्वरितत्वयुक्तं वर्तते तेन ततः आधिशीङस्थासां कर्म सूत्रे आधारपदस्य अनुवृत्तिरागच्छति । तथा च आधारशब्दस्यो भवति आश्रयः, पच्धातूपस्थाप्य विक्लित्तिरूपक्रियायाः आश्रयः तण्डुलो भवति एवमेव व्यापारस्य आश्रय कर्तापि भवति । तथाप्यत्र आधारपदेन वैयाकरणनिकाये प्रसिद्धस्य आधारोऽधिकरणम् इत्यत्र विद्यमानस्य पारिभाषिकाधारपदस्य ग्रहणं क्रियते । अत एव कर्तृकर्मद्वारा क्रियायाः आश्रयः यो भवति तादृशस्यैवाधारस्यानेन कर्मसंज्ञा विधीयते । यथा हरिः वैकुण्ठं अध्यास्ते इत्यत्र कर्तृकर्मद्वारा यथा चैत्रः कटे आस्ते इत्यत्र कटस्य कर्ताद्वारा आसनक्रियायाम् स्ववृत्तिवृत्तित्वसम्बन्धेनान्वयो भवति यथा स्वम् = कटः, तद्वृत्तिः चैत्रः, तद्वृत्तित्वमासनक्रियायामिति एवं रीत्या यदि क्रियायाः कटे क्रियते चेद् स्वाश्रयाश्रयत्वसम्बन्धेन भवति । यद्यत्र अनुवृत्तकर्मपदेनैव कार्यं सम्भवति इत्युच्यते चेद् तस्यार्थस्तु आधारत्वविशिष्ट कर्म इति भवति । अर्थात् कर्तुरिति सूत्रे अनुवृत्तकर्मपदस्य एकवाक्यतया आधारः सन्नपि यो फलाश्रयत्वेनेच्छोद्देश्यं तदेव कर्मत्वमिति बोधो भवति । अर्थात् ईप्सिततमविशिष्टाधारस्यैव कर्मत्वं तेन गेहं प्रविशति इत्यत्रैव स्यात् नान्यत्र । अतः सूत्रे स्वतन्त्रेप्सिततमस्य कर्मत्वं न स्याद्, यः ईप्सिततमं सन् आधारो भवति तस्यैव कर्मत्वं । ओदनं खादति इत्यादौ ओदनस्य ईप्सिततमत्वेऽपि आधारत्वाभाद् न कर्मत्वं स्याद् अतः कर्मग्रहणं कर्तव्यं । कृते च कर्मग्रहणे पूर्वसूत्राद् नानुवर्तते आधारत्वविशिष्टं कर्मपदम्, अतः न क्षतिः ।

**निष्कर्षः**

प्रस्तुतमिदमालेखं कर्तुरीप्सिततमं कर्म इति सूत्रस्य परिष्कारपूर्वकं सूत्रे विद्यमानां सकालानां पदानामावश्यकं विद्यते न वेति विषये केन्द्रितं वर्तते । अत्र च विषयप्रवेशः, अध्ययनविधिः, क्षेत्र–सीमाङ्कनम्, विज्ञपरामर्शादयः प्रमुखः शीर्षकाः विद्यन्ते । विशेषतः सूत्रोपात्तपदानां पदकृत्यं विधाय गुणदोषाणां सम्यग् निर्वचनमत्र विहितं वर्तते । यथा ग्रामं गच्छति इत्यादिस्थलेषु कर्मसंज्ञाविधायकस्यास्य सूत्रस्य अर्थो एवं सम्पद्यते – प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयाभिन्नाश्रयवृत्तिव्यापारविशिष्टफलाश्रयत्वप्रकारिका या वर्तमाकालीनी या इच्छा तादृश इच्छा निरूपिता या विषयता तादृशविषयताश्रयाभिन्नं (विषयताश्रयीभूतम्) यत्कारकं तदभिन्नं कर्म इति । सारल्येत उच्यते चेद् कर्तृवृत्तिव्यापारजन्यफलाश्रयत्वाद् ग्रामस्य कर्मसंज्ञा भवति ।

**सन्दर्भग्रन्थसूची**

आचार्यः, बालकृष्णः (सन् २०१७) अमरकोषः, वाराणसीः यशोदा पुस्तकालयः ।

आचार्यः, सुदर्शनः (२०७३) व्युत्पत्तिवादः, वाणी विलासः प्रकाशनम् ।

गौड, दौलतराम (सन् २०११) ऋग्वेदसंहिता, वाराणसीः रूपेशः ठाकुरप्रसादप्रकाशनम् ।

त्रिपाठी, जयशङ्करलालः (२०७०) व्याकरणमहाभाष्यम्, वाराणसीः चौखम्बा–कृष्णदास–अकादमी ।

पाण्डेयः, रामनारायणदत्तः (२०७६) लघुसिद्धान्तकौमुदी, गोरखपुरः गीताप्रेसः ।

पोद्दारः, हनुमानप्रसादः (२०६९). परासर उपपुराण, वाराणसीः चौखम्बा–संस्कृतसंस्थानम् ।

शर्मा, गिरिधरः (सन् २०१४) वैयाकरणसिद्धान्तकौमुदी, वाराणसीः मोतिलाल–वनारसीदासः ।

शास्त्री, बाल (सन् २०१३ ) लघुशब्देन्दुशेखर, वाराणसीः चौखम्बा–संस्कृत–संस्थानम् ।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**अभिज्ञानशाकुन्तले प्रकृतिचित्रणम्**

प्रकाश पौडेलः
उपप्राध्यापकः
श्री-विन्दुवासिनी-संस्कृत-विद्यापीठम्, पोखरा
Gmail: ppaudel15@gmail.com
DOI:

**सारः**

प्रस्तुतालेखे 'अभिज्ञानशाकुन्तलम्' इति नाटके निबद्धं प्रकृतेर्मानवीकरणं विश्लेषितमस्ति । विश्लेषणस्य सैद्धान्तिकाधारतया काव्यलक्षणशास्त्रीया प्रकृतेर्मानवीकरणसम्बद्धा मान्यता गृहीताः सन्ति । अस्य निर्माणक्रमे तथ्यानि प्राथम्येन कालिदासविरचिताद् 'अभिज्ञानशाकुन्तल'नाटकात् सङ्कलितानि वर्तन्ते । एवञ्च तथ्यसङ्कलनायैव तन्नाटकसम्बद्धाः पुस्तकपत्रिकालेखरचनादिद्वितीयकस्रोतांसि च प्रयुक्तानि सन्ति । इत्थं प्राथमिकद्वितीयकस्रोताभ्यां समुपलब्धानि तथ्यानि गुणात्मकविधिना वर्णनं विश्लेषणञ्च विधाय निष्कर्षितानि सन्ति। 'अभिज्ञानशाकुन्तल'नाटकान्तर्गते प्रकृतिचित्रणे मानवीकरणस्य महत्त्वपूर्णं स्थानं लभ्यते। तत्र प्रकृतौ मानवव्यवहारारोपेण सह मानवस्य प्रकृतीकरणञ्च नितरां रमणीयं लभ्यते । 'अभिज्ञानशाकुन्तल'नाटके प्रस्तुते प्रकृतेर्मानवीकरणे प्रकृतौ मानवीयक्रियया साकं सुखदुःखादेरनुभवक्षमता दयादाक्षिण्यादिमानवीयसंवेदनग्रहणप्रकटीकरणशक्तिश्च यथा समारोपिता वर्तते तया प्रकृतिर्निर्विवेकित्वन्निगूहति जाड्यञ्च जहाति । नाटकीयप्रकृतिचित्रणस्थलेषु तपोवनाभोगस्थाः वृक्षाः, इन्दुपाण्डुतरुः, माधवीलता, नवमालिका, लताश्चेत्यादयो वनस्पतयः, मयूरः, मृगी, मृगशावकः, चक्रवाकः, कोकिलश्चेत्यादयस्तिर्यञ्चश्च मानवेन इव स्थाने स्थाने सुखदुःखादिकमनुभवन्ति, दयादाक्षिण्यादिमानवीयसंवेदनामनुभवन्ति, तथैव तान् प्रकटीकुर्वन्ति च। एवमेवालौकिककल्पनया सूक्ष्मनिरीक्षणेन च सर्वाङ्गसुन्दरी सुमधुरा च प्रकृतिरत्र सजीवपात्रमिव वर्णिता वर्तते इति निष्कर्षितमस्ति। एतन्निष्कर्षः सम्बद्धवैषयिकजिज्ञासावतां समेषामुपयोगे आगमिष्यतीत्यपेक्षितमस्ति।

**शब्दकुञ्जी :** चेतना, प्रकृतीकरणम्, मानवीकरणम्, संवेदना।

## पूर्वपीठिका

संस्कृतकाव्यपरम्परायां कविकुलगुरुः इति पदवीमलङ्कुर्वतः महाकवेः कालिदासस्य सुविख्यातं नाटकं वर्तते 'अभिज्ञानशाकुन्तलम्' । तस्य प्रणयनकालः ईशवीया प्रथमा शताब्दी इति मन्यते । प्रस्तुतनाटके काव्यकलया परिष्कृत्य प्रस्तुता पौराणिकी कथा विराजते। आङ्गल-जर्मन-डच-रसियनादिषु पाश्चात्यदेशीयासु बहुषु भाषासु अनूदितेऽस्मिन् नाटके निबद्धा काव्यकला नाट्यकला च भारतवर्शीयभूखण्डमतिक्राम्य विश्वसमुदाये एव ख्याता लभ्यते। "काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला। तत्राऽपि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्" इत्याभाणके नाटकस्य सप्ताङ्केषु चतुर्थाङ्कस्य यत् रम्यत्वं निर्दिष्टमस्ति तत् प्रकृतेर्मानवीकरणाश्रितं मन्यते। अभिज्ञानशाकुन्तले प्रकृतेर्मानवीकरणविश्लेषणोद्देश्यभूते प्रस्तुतालेखे गृहीता

समस्या वर्तते - 'अभिज्ञानशाकुन्तल'नाटके प्रकृतेर्मानवीकरणं कीदृशम् ? इति। तस्याः समाधानाय पूर्वाध्ययनेषु भाषान्तरे समुपलब्धानि बहुस्थलेषु विकीर्णानि च तथ्यानि एकत्रीकरणाय प्रस्तुतालेखो निर्मितो वर्तते । कालिदासविरचितम् 'अभिज्ञानशाकुन्तल'नाटकं प्रस्तुताध्ययनस्य क्षेत्रं वर्तते । नाटके प्रस्तुतं प्रकृतिचित्रणमालम्बनोद्दीपनोपमानकरणरूपेण प्रस्तुतमुपलभ्यते। एवञ्च बिम्ब-प्रतीक-सूक्ति-वस्तुसङ्केत-व्यञ्जकादिस्वरूपे च प्रकृतिश्चित्रिता लभ्यते। अतो नाटकीयं प्रकृतिचित्रणं बहुभ्यः पक्षेभ्यो विवेचनं विश्लेषणञ्च कर्तुं शक्यते, परन्तु मानवीकरण-प्रकृतीकरण-संवेदनशक्तिविन्यासदृष्ट्या विहितं प्रकृतिचित्रणं विविच्यते इत्यस्य सीमा वर्तते।

**अध्ययनविधिः**

'अभिज्ञानशाकुन्तल'नाटके प्रकृतेर्मानवीकरणविश्लेषणाधारितं प्रस्तुतमध्ययनं गुणात्मकं वर्तते । अत्र कृतितः समुपलब्धतथ्यविश्लेषणं कृत्वा निष्कर्षः स्थापितो वर्तते । निदर्शनचयनस्य प्रचलितेषु विधिषु समष्टिविधेरुपयोगेन महाकविकालिदासेन ईशवीयप्रथमशतके विरचितं सम्पूर्णम् 'अभिज्ञानशाकुन्तल'नाटकं चीतमस्ति। तस्य बहुलपाठेषु च २०११ तमे ईशवीयाब्दे चौखम्बाकृष्णदासअकादमीतः प्रकाशिते ज्योत्स्नासरलासंस्कृतहिन्दीव्याख्यायुते ग्रन्थे स्थितः पाठो विश्लेषणे प्रयुक्तो वर्तते । विश्लेषणाय तथ्यानि प्राथमिकस्रोतसः 'अभिज्ञानशाकुन्तला'त् एवमेव द्वितीयकस्रोतसस्तन्नाटकसम्बद्धेभ्यः पुस्तकपत्रिकालेखरचनादिभ्यः सङ्कलितानि सन्ति । सङ्कलितसामग्र्यो वर्णनात्मकविश्लेषणात्मकविधिना विश्लिष्य निष्कर्षिताः सन्ति।

**सैद्धान्तिकाधारः**

'कृ'धातोः 'क्तिन्' प्रत्यययोगेन निष्पन्ने कृतिरिति शब्दे 'प्र' इति उपसर्गयोगेन प्रकृतिशब्दो निर्मीयते। 'प्रकृयते कार्यमनया' इति व्युत्पत्त्या प्रकृतिशब्देन सर्वेषां सांसारिककार्याणां सम्पादिका शक्तिरित्यर्थो ज्ञायते। व्याकरणे, दर्शने, वाङ्मये च बहुषु स्थलेषु विविधार्थेषु प्रकृतिशब्दोपन्यस्तो लभ्यते। शब्दोऽसौ क्वचित् स्वभावः (श्रीमद्भगवद्गीता, ३/३३) इत्यर्थे, क्वचित् जन्मजन्मान्तरीयः संस्कारः (श्रीमद्भगवद्गीता, शाङ्करभाष्यम्, ई. २०१०, पृ. १००) इत्यर्थे, कुत्रचित् जगत्प्रसविणीशक्तिः (श्रीमद्भगवद्गीता, १/१०) इत्यर्थे, जगत् (ब्रह्मसूत्रम्, १/४/२३) इत्यर्थे, जगत उपादानकारणम् (अष्टाध्यायी, १/४/३०, साङ्ख्यकारिका, श्लो. ११ च) इत्यर्थे, क्वचिच्च नायकादिनाट्यकाव्यपात्रविशेषः (सा. द., ७/१५) इत्यर्थे प्रयुक्तो वर्तते। प्रकृतिशब्दादधिगन्तव्यं किमिति जिज्ञासायां श्रीमद्भगवद्गीतायां प्रकृते स्वरूपं प्रस्तुतमुपलभ्यते। तत्र प्रकृतेः परापरे द्वे रूपे दर्शिते स्तः, अपरा प्रकृतिर्जडा वर्तते, तस्याः पृथ्वी, जलम्, अग्निः, वायुः, आकाशः, मनः, बुद्धिः, अहङ्कारश्चेति अष्टौ भेदाः सन्ति इति प्रतिपादितमुपलभ्यते। यथा -

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥ (श्रीमद्भगवद्गीता, ७/४-५) इति।

तत्रैव संसारे यानि भूतानि सन्ति तानि सर्वाणि परापरप्रकृतितः समुत्पन्नानि वर्तन्ते (७/६) इति च कथितं वर्तते।

एतेन पृथ्वीजलादयः सांसारिकाः जडपदार्थाः, वनस्पतयः, सर्वे प्राणिनश्च प्रकृतेरङ्गानि सन्ति इति बुध्यते। संस्कृतवाङ्मये शब्दस्य मूलरूपम्, राज्यस्य सप्ताङ्गानि, राजशासनानुसाशिताः प्रजाः, प्राणिनो जन्मसिद्धः स्वभावः, जगतः मूलकारणम्, व्यक्तेर्वस्तुनो वा मूलवैशिष्ट्यञ्चेत्यादिषु बहुषु अर्थेषु प्रकृतिशब्दस्य प्रयोगो लभ्यते । इत्थं संस्कृतवाङ्मये पराप्रकृतेः पारलौकिकस्वरूपस्य अवस्थितिविषयिण्यां चर्चायां समुपलब्धायां सत्यामपि लोकव्यवहारे सामान्यतया पृथ्वी, नद्यः, निर्झराः, सागराः, हिमालयाः, पर्वताः, मृत्पाषाणे, वर्षा, मेघः, वायुः, आकाशः, सूर्यः, चन्द्रः, ग्रहाः, नक्षत्राणि, सन्ध्या, प्रभातम्, रात्रिः, मध्याह्नम्, दिवसः, वनस्पतयः, कीटाः, प्राणिनः, खगाश्च प्रकृतौ परिगण्यन्ते।

वस्तुतस्तु मानवोऽपि विशालप्रकृतेरङ्गं वर्तते । तथाऽपि काव्ये नाट्ये च प्राधान्येन मानवानां गाथाः, भावाः, विचाराश्च विवृण्यन्ते । अत एव काव्यनाट्यादौ साहित्यिकरचनासु प्रकृतिचित्रणस्य विवेचने प्रकृतिशब्देन मानवेतरप्रकृतेर्ग्रहणं क्रियते । मानवीयसौन्दर्यादिवर्णने यथा प्राकृतिकवस्तूनां स्वरूपं क्रिया च वर्ण्यते तथैव प्रकृतेर्जडपदार्थानाम्, तिरश्चाम्, वनस्पतीनाञ्च वर्णनेषु मानवस्य गुणाः, भावाः, अनुभूतयश्च प्रकटीक्रियन्ते । प्रस्तुतालेखे अभिज्ञानशाकुन्तलनाटकान्तर्गतेषु प्रकृतिवर्णनेषु प्रकृतेर्मानवीकरणम् मानवस्य प्रकृतीकरणम् मानवीकरणक्रमे प्रकृतौ संवेदनशक्तेर्विन्यासञ्च विश्लेषितमस्ति। विश्लेषणे प्रमुखसैद्धान्तिकाधारतया मानवीकरणसम्बद्धा मान्यताः प्रयुक्ताः सन्ति।

व्याकरणे मानवीकरणशब्दस्य अमानवं मानवं सम्पादनमिति व्युत्पत्तिरलभ्यते । अनया व्युत्पत्त्या पशुपक्षीकीटपतङ्गादिषु मानवेतरप्राणिषु वृक्षलतापुष्पादिषु वनस्पतिषु वायुजलादिजडपदार्थेषु च (अमानवेषु) मानवगुणक्रिययोरारोपणप्रवृत्तिरियं मानवीकरणं कथ्यते। तस्मिन् क्रमे कविरेतादृशीं दृष्टिं निर्मापयति तया प्रकृतौ अवस्थिताः सर्वे पदार्था जीविताः सन्ति, तेषु मनांसि विद्यन्ते, अतस्ते रागद्वेषादिकान् मानवगुणान् धारयन्तीति मन्यते। तत्प्रभावेन काव्ये जडेषु चेतनस्य व्यवहाराः तथा च वनस्पतिषु, तिर्यक्प्राणिषु च मानवस्य क्षमताः, संवेगाः, क्रियाः, भावनाश्च समारुप्यन्ते। संस्कृतनाट्यकाव्ययोरेषा प्रवृत्तिर्प्राचीना वर्तते। इयं काव्योक्तौ प्रभावाधिक्यं वर्धनेच्छता कविना वर्णनीयप्राकृतिकपदार्थेषु ऐतिहासिकघटनाविचारभावादिषु च मानवचेतनायाः क्रियायाश्च समारोपणप्रविधिर्वर्तते (नगेन्द्र, ई. १९८१, पृ. ९६०) । तस्मिन् क्रमे काव्यनाट्यगतेषु वर्णनेषु वायुः, गगनम्, दिक्, कालश्चेत्यादयः अमूर्तपदार्था मूर्तीक्रियन्ते, पाषाणः, मेघः, जलञ्चेत्यादयो जडाश्चेतनीक्रियन्ते, वृक्षः, लता, कुसुमञ्चेत्यादयो वनस्पतयो विवेकसंवेदनशक्तिवन्तः सम्पाद्यन्ते, मृगः, मयूरः, भ्रमरश्चेत्यादयस्तिर्यञ्चश्च मानवोचितां क्रियामनुभूतिं वा प्रकटीकुर्वन्ति इत्थं काव्यगतवर्णनेषु प्रकृतिर्मानवीक्रियते। क्वचित्तु मानवीकृता प्रकृति मानवीयक्रियाभिः सार्धमनुभूतीः, भावान्, संवेगाश्च प्रकटीकरोति । तथैव मानवस्य स्वरूपक्रिययोर्वर्णनक्रमे प्रकृतिमयं प्रदर्श्य मानवस्य प्रकृतीकरणेन च काव्यगतवर्णनेषु चारूत्वमन्वेषितमुपलभ्यते।

**विमर्शपरिणामौ**

महाकविना कालिदासेन प्रणीते 'अभिज्ञानशाकुन्तलम्' इति नाटके प्रकृतिर्विविधस्वरूपे चित्रिता लभ्यते। तत्र प्रकृत्या सह मानवस्याभेद्यसम्बन्धश्च प्रकटीकृतो वर्तते । नान्दीपाठे भगवतः शिवस्य प्रकृतीकरणम्, नट्या प्रस्तुते भ्रमरचुम्बितशिरीषकुसुमविषयीकृते गायने सुष्ठु प्रकृतेर्मानवीकरणमुपलभ्यते । नान्दीप्रस्तावनयोर्यथा प्रकृतिर्मानवीकृत्य प्रस्तुता वर्तते तथैव समग्रे नाटके च प्रकृतेर्मानवीकरणस्य विशिष्टं स्थानमुपलभ्यते । तत्राऽपि प्रकृतौ मानवीयसंवेदनशक्तेर्विन्यासप्रकर्षो नितरां रमणीयो लभ्यते। अभिज्ञानशाकुन्तले प्रकृतेर्मानवीकरणमिति शीर्षकयुतेऽस्मिन्

आलेखे प्रकृतेर्मानवीकरणम्, मानवस्य प्रकृतीकरणम्, प्रकृतौ मानवीयसंवेदनोपन्यासश्चेति पक्षा विश्लिश्य निष्कर्षिताः वर्तन्ते ।

**प्रकृतेर्मानवीकरणम्**

मानवेतरवस्तूनां मानवस्वरूपप्रदानं मानवरूपेण कल्पनं प्रस्तवनं वा मानवीकरणं वर्तते । प्रकृतिशब्देन चराचरजगतो दृश्यादृश्यपदार्थानां बोधो भवति । प्रकृतेर्मानवीकरणस्य तात्पर्यं प्रकृत्यामवस्थितैस्तिर्यक्प्राणिभिः, वनस्पतिभिः, जडपदार्थैश्च मानवीयकार्यसम्पादनकल्पनं प्रस्तवनञ्च भवति । काव्येषु आलम्बनरूपेण उद्दीपनरूपेण उपमानरूपेण वा प्रकृतिचित्रणे यत्र मानवेतरप्राकृतिकावयवैर्मानवस्येव कार्यसम्पादनवर्णनं विधीयते तत्र प्रकृतिर्मानवीकृता भवति । प्रस्तुतं महाकविना कालिदासेन विरचितं 'अभिज्ञानशाकुन्तल'नाटकं प्रकृतेर्मानवीकरणदृष्ट्या विशिष्टं वर्तते । नाटकान्तर्गतप्रकृतिचित्रणस्थलेषु मानवीकरणस्य स्थानमपि उल्लेखनीयं दृश्यते । नाटकस्य प्रथमाङ्के प्रच्छन्नतया तापसकन्यकाया वृक्षसेकक्रियामवलोकयतो राज्ञो दुष्यन्तस्य संवादांशे पतङ्गस्य कृत्येषु मानवव्यवहारारोपो नितरां रमणीयो वर्तते । यथा -

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करौ व्याधुन्वन्त्याः पिवसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ।। (१/२५) इति ।

अत्र नवमालिकासेकाद् भीतेन भ्रमरेण शकुन्तलाया वदने सम्पादितकृत्येषु बलात्कारिणा धृष्टकमुकेन इव बलान्नयनेषु अनेकशश्चुम्बनम्, कर्णान्तिके गत्वा गुप्तचरेण इव गुप्तवार्ताश्रावणम्, निवारितेऽपि कमोद्वेगवता जनेन इवाधरचुम्बनञ्चेति मानवोचितक्रियावर्णनादत्र तिर्यङ् मधुकरो मानवीकृतो वर्तते ।

वृक्षमभिसिञ्चन्त्याः शकुन्तलाया गद्यसंवादे आम्रवृक्षेण पल्लवरूपाङ्गुलीभिः सङ्केतनं वर्णितमस्ति । यथा -

शकुन्तला - [अग्रतोऽवलोक्य] सख्यः एष वातेरितपल्लवनङ्गुलीभिः किमपि व्याहरतीव मां चूतवृक्षः । तद् यावदेनं सम्भावयामि । (पृ. ५२) इति ।

अत्र आम्रवृक्षेणाङ्गुलीसञ्चालनम्, साङ्केतिकभाषाप्रयोगः, वार्तालापविधानञ्चेति क्रिया वर्णिताः सन्ति । एताः क्रिया मानवीयक्रिया वर्तन्ते । वनस्पतौ एतादृशी कार्यशक्तिर्न प्रत्यक्षीक्रियते । आम्रवृक्षस्य क्रियाकलापेषु मानवीयक्रियायाः समारोपणादत्र वनस्पतेर्मानवीकरणं कृतं दृश्यते ।

प्रकृतेर्मानवीकरणदृष्या नाटकस्य चतुर्थोऽङ्कः सर्वोपरि वर्तते । तत्र नायिकायाः शकुन्तलायास्तपोवनतः पतिगृहं प्रति प्रस्थानकालिकी स्थितिः प्रकृतौ मानवीयसंवेदनाग्रहणप्रकटनसामर्थ्यं समारोप्य हृदयावर्जकतया चित्रिता वर्तते । तत्र वियोगज्वलाज्वलितानां जनानां मनोभावान् विचारांश्च समुह्य वृक्षाः, लताः, मृगी, मयूरी, मृगशावकः, परभृतः, चक्रवाकश्च मानवीयां क्रियां सम्पादयन्ति । एतस्मिन् क्रमे ते मनुष्यवदाचरन्तः शारीरिकक्रियया साकं स्थाने स्थाने सुखदुःखदयादाक्षिण्यादिमानवीयां संवेदनामनुभूय प्रकटीकृत्य च मानसिकाः क्रियाश्च सम्पादयन्ति । नाट्यखण्डेऽस्मिन् प्राकृतिकोपकरणेषु मानवीया संवेदना कथं विन्यस्ता वर्तते इति प्रस्तुतालेखान्तर्गते मानवीकरणे संवेदनशक्तेर्विन्यासः

इत्युपशीर्षके विस्तरेण विवेचितमस्ति।

नाटकस्य पञ्चमाङ्के हंसवत्या नेपथ्यगायने भ्रमरकृत्यानि यथा मानवीकृतानि सन्ति -

अभिनवमधुलोभभावितस्तथा परिचुम्ब्य चूतमञ्जरीम्।

कमलवसतिमात्रनिर्वृतो मधुकर ! विस्मृतोऽस्येनां कथम्॥ (५/८) इति।

पूर्वमुपभुक्तां चूतमञ्जरीं विस्मृत्य नूतनं कमलमाश्रयिणो भ्रमरस्य क्रियासु दक्षिणनायकव्यवहारारोपादत्र भ्रमरकृत्यानि मानवीकृतानि सन्ति। नाटकस्य षष्ठाङ्के वियोगाक्रान्तो दुष्यन्तः चेटीं शकुन्तलायाश्चित्रं कारयितुं निर्दिशति। तया चित्रफलके अङ्कितां नायिकां शकुन्तलां विलोकयन् तां भ्रमरपीडितां दृष्ट्वा भ्रमराय क्रुध्यति। विदूषकश्च राज्ञो मनोभावानुकूल्येन व्यवहरन् शकुन्तलया सह चित्रार्पितं भ्रमरमुद्दिश्य कथयति –

विदूषकः - ... [सावधानं दृष्ट्वा] आ ही ही भोः ! एष दास्याः पुत्रः कुसुमरसपाटच्चरो दुष्टमधुकरस्तत्रभवत्या वदनकमलमभिलषति।

राजा - ननु वार्यतामेष धृष्टः (पृ. ४८०-८१) इति।

प्रकरणेऽस्मिन् चित्रार्पितो भ्रमरः प्रतिनायकत्वेन परिकल्पितो वर्तते। अविनीतानां शासिता त्वं वर्तसे तस्मात् त्वमेव धृष्टं भ्रमरं वारयितुं प्रभवसीति विदूषकस्य वचनं श्रुत्वा नायको दुष्यन्तः तं विनेतुं प्रयतते। यथा –

राजा - युज्यते अयि भोः ! कुसुमलताप्रियातिथे ! किमत्र परिपतनखेदमनुभवसि ?

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।

प्रतिपालयति मधुकरी न खलु मधु त्वां विना पिबति॥ (६/२१)

इत्यत्र तृषितया भ्रमर्या कुसुमस्य रसपानावसरो लब्धो वर्तते परन्तु भ्रमरे प्रेमासक्ता सा एकाकिनी पुष्परसं पातुं नेच्छति, प्रियं भ्रमरं प्रतीक्षिका भ्रमरी प्रियभ्रमरेण सहैव कुसुमरसं पिबामीति विचिन्तयन्ती वर्तते। एतस्मिन् वर्णने स्वादु भोजजनावसरे प्रियस्य प्रतीक्षणादिषु भ्रमर्या सम्पादितेषु कार्येषु मानवाचाराः समाविष्टा लभ्यन्ते। एतावता भ्रमरीभ्रमरयोः कृत्येषु नायिकानायकयोर्व्यवहारस्य समारोपादत्र तिर्यञ्चौ तौ मानवीकृतौ स्तः।

तत्रैव नायको दुष्यन्तः प्रमत्तवदाचरन् चित्रगतायाः शकुन्तलायाः ओष्ठे निवसन्तं भ्रमरमुद्दिश्य कथयति – तव प्रिया भृशं तृषिता वर्तते परन्तु तव प्रेमनिरता सा त्वया सह पुष्परसं पातुमिच्छति। तस्मात् सा पुष्पे तिष्ठन्ती अपि पुष्परसपानं विनैव त्वां प्रतीक्षन्ती वर्तते। त्वमस्याः तापसकन्यकाया नीरसाधरयोः परिपतनखेदमनुभवन् मा तिष्ठ इति। इत्थं स्मारितोऽपि भ्रमरः शकुन्तलायाः मुखमण्डलं हातुं नेच्छति। अत एव भ्रमरश्चित्रस्थो वर्तते इति दृष्ट्या विचारं कुर्वन् दुष्यन्तः भ्रमराय क्रुध्यति। स्वकीयादेशस्य हेलनां कुर्वन्तं चित्रार्पितं भ्रमरं कमलोदरबन्धने नियोजयामीति तर्जयति च। प्रकरणेऽस्मिन् दुष्यन्तस्य मनसि भ्रमरस्य या मूर्तिः परिकल्पिता वर्तते सा मानवीकृता वर्तते। तिर्यञ्चि भ्रमरे प्रतिनायकत्वारोपः, भ्रमरे विनेयत्वपरिकल्पनम्, आदेशपालनोल्लङ्घनयोः कल्पनम्, भ्रमरे कामुकेन इवाधरे दन्तक्षतादिना बलात्कारेण परपीडनकल्पनम्, बन्दीकरोमीति कथयित्वा तर्जनप्रयासादौ भ्रमरः धृष्टकामुकरूपेण प्रतिनायकत्वेन च चित्रितो वर्तते। एतासु नायकस्य दुष्यन्तस्य मतिभ्रंशोत्पन्नासु परिकल्पनासु चित्रगतो भ्रमरो मानवीकृत्य प्रस्तुतो वर्तते।

नाटकीये षट्पदमानवीकरणे यादृशी विशेषता लभ्यते यत् वर्णयितुर्नायकस्य अवस्थित्यनुकूलतया षट्पदस्य नामग्रहणं कृतमुपलभ्यते। नाटके प्रियासंयोगकालिके क्षणे घटितषट्पदव्यवहारवर्णने मधुकर इति तन्नामोच्चरितमुपलभ्ते

चेत् वियोगकाले भ्रमर इत्युच्चरितमस्ति। मधुकरशब्दो मधुनः करः इति, मधूनि करोति सञ्चित्य निष्पादयति इति वा विग्रहे कृधातोः 'अच्' प्रत्यययोगेन निष्पद्यते। अनया व्युत्पत्त्या सङ्केतितार्थमनुसरन् संयोगकालिको मधुकरः रतिभावजागरणैः प्रेमसुखभोगाय सहाय्यमाचरन् जनेभ्यः मधु (इष्टम्) करोति। भ्रमति प्रतिकुसुममिति व्युत्पत्त्या 'भ्रम्' धातोः उणादेः 'अर'प्रत्यययोगेन भ्रमरशब्दो निष्पद्यते। वियोगावस्थायां भ्रमणशीलो भ्रमरः झङ्कृतै रत्यादिभावोद्दीपनेन वियुक्तं जनं चिन्तासन्तापपीडादिषु भ्रमयति। अनया रीत्या षट्पदस्य स्वाभाविकक्रियाः संयोगवियोगावस्थयोर्वैपरीत्यमाचरन्ति। तथ्यमिदं सूक्ष्मेक्षिकया निरीक्ष्य नाटके षट्पदकृत्येषु मानवीयव्यवहारारोपवर्णनादौ तन्नामग्रहणं मानवीयमनोभावानुकूल्येन कृतं वर्तते।

नाटके मधुकरमयूरमृगशावकभ्रमर्यादयः तिर्यञ्चो बलात् चुम्बनम्, गुप्तवार्ताश्रावणम्, अधरपानम्, प्रतीक्षणम्, गमनानुमतिप्रदानम्, मार्गावरोधनञ्चेत्यादिभिः मानवोचितक्रियाभिः, आम्रवृक्षः, माधवीलता, नवमालिका, इन्दुपाडुतरुः, तरवश्चेत्यादयो वनस्पतयश्च अङ्गुलीसञ्चालनम्, सङ्केतकरणम्, वार्तालापेन, वस्त्राभूषणप्रदानम्, मानववार्ताश्रवणम्, सन्देशप्रेषणादिना मानवीयक्रियाभिर्मानवीकृताः सन्ति।

**मानवस्य प्रकृतीकरणम्**

काव्ये मानवः प्रकृतेरङ्गत्वेन दर्श्यतेतथा च तद्व्यवहाराः प्राकृतिकतत्त्वानि इव प्रस्तूयन्ते चेत् मानवः प्रकृतीकृतो भवति। इयं मान्यता प्रकृतिमानवयोरभेद्यसम्बन्धं ख्यापयति। मानवोऽपि प्रकृतेरवयवो वर्तते, स प्राकृतिकशक्तिसीमयोरधीनस्थो भवति इति मन्यते। साहित्ये प्रकृतीकरणाय मानवस्य प्राकृतिकजडपदार्थैः प्राणिभिः वनस्पतिभिश्च तुलना क्रियते। मनुष्यजीवनप्राकृतिकपदार्थयोरैक्यञ्च वर्ण्यते। अभिज्ञानशाकुन्तले प्रकृतेर्मानवीकरणेन साकं मानवस्य प्रकृतीकरणञ्चोपलभ्यते। नाटकारम्भे नान्दीपाठे भगवतः शिवस्य प्रकृतीकरणं यथा प्रस्तुतमुपलभ्यते। यथा -

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥ (१/१) इति।

अत्र भगवतः शिवस्य अष्टमूर्तीनां वन्दना कृता वर्तते। एतासु जलम्, सूर्यः, चन्द्रः, आकाशः, पृथ्वी, वयुश्चेति सप्तमूर्तयः प्रकृतेरङ्गानि सन्ति। ईशस्य सप्तमूर्तयः प्राकृतिकस्वरूपे विद्यन्ते। एका यजमानरूपा मूर्तिर्मानवस्वरूपिणी वर्तते। अनेन प्रकारेणात्र भगवतः शिवस्य सप्तमूर्तयः प्रकृतीकृताः सन्ति। एवमेव 'अभिज्ञानशाकुन्तल'स्य नायिका शकुन्तला प्राकृतकन्या वर्तते। तत्र शारीरिकसौन्दर्यवर्णनेषु, दुष्यन्तस्य दृष्टौ, शकुन्तलावचनेषु च शकुन्तला प्रकृतीकृता लभ्यते। राजा दुष्यन्तः शकुन्तलायाः शरीरलावण्यं प्रकृतीकरणेन सह यथा वर्णयति -

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥ (१/२२) इति।

शकुन्तलाया अधरः किसलयरागो वर्तते, हस्तौ कोमलशाखायितौ स्तः, सर्वाङ्गव्याप्तं यौवनञ्च कुसुमतुल्यमस्ति। अतश्शकुन्तला वासन्तिकविटपी वर्तते। मानवकन्यायास्तरोरभेदस्वरूपाधानादत्र सुष्ठु मानवस्य प्रकृतीकरणं विहितमस्ति।

सुन्दर्याः शकुन्तलायाः प्राकृतिकसौन्दर्यं विलोकयन् मुग्धो दुष्यन्तस्तां वनलतामेव पश्यति। यथा -

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।

दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ (१/१७) इति।

दुष्यन्तो मारीचाश्रमे पुनर्मिलितां शकुन्तलामुद्दिश्य लता इति सम्बोधयति -

राजा - तेन हि ऋतुसमागमचिह्नं प्रतिपद्यतां लताकुसुमम् (पृ. ५८८) इति।

एवमेव नाटके कण्वाश्रमाभोगोद्भवा लताः शकुन्तलाया भगिन्यो निर्दिष्टाः सन्ति। यथा -

एका - हला शकुन्तले त्वत्तोऽपि तात कण्वस्य आश्रमवृक्षाः प्रियतरा इति तर्कयामि येन नवमालिकाकुसुमपरिपेलवाऽपि त्वम् एतेषामालवालपरिपूरणे नियुक्ता।

शकुन्तला- हला अनसूये न केवलं तातस्य नियोगः ममापि एतेषु सहोदरस्नेहः । यतो भगिनी मे भवति ततः किमिति न सिञ्चामि (पृ. ५९) ? इति।

प्रियंवदा - त्वया समीपस्थितया लतासनाथ इव अयं चूतवृक्ष प्रतिभाति।

अनसूया - हला शकुन्तले इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनतोषिणीति नवमालिका एनां विस्मृतासि (पृ. ५४) ? इति।

शकुन्तला - तत आत्मनामपि विस्मरिष्यामि [लतामुपेत्य अवलोक्य च] हला रमणीयः खलु कालः अस्य पादपमिथुनस्य रतिकरः संवृत्तः (पृ. ५४) इति च।

तथैव तस्या धर्मपिता कण्वस्तां तलाया ज्येष्ठभगिनीमेव पश्यति -

शकुन्तला - [स्मृत्वा] तात ! लताभगिनीं तावत् माधवीमामन्त्रयिष्ये।

कण्वः - वत्से ! अवैमि ते तस्यां सौहार्दम्। इयं सा, दक्षिणे पश्य।

शकुन्तला - [उपेत्य समालिङ्ग्य] लताभगिनि प्रत्यालिङ्ग मां शाखामयैर्बाहुभिः । अद्य प्रभृति दूरवर्तिनो खलु ते भविष्यामि। तात अहमिव इयं त्वया चिन्तनीया।

कण्वः - सङ्कल्पितं प्रथममेव मया त्वदर्थे
भर्त्तारमात्मसदृशं स्वगुणैर्गतासि।
अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः
कान्तं समीपसहकारमिमं करिष्ये। (४/१५) इति।

एतावद्भिर्वर्णनैर्नाटके अनेकशः शकुन्तला लता एव प्रतिपादिता वर्तते । मारीचमुनेस्तपःस्वरूपवर्णने वल्मीकेन शरीरवेष्टनम्, द्वितीयब्रह्मसूत्रमिव सर्पत्वकग्धारणम्, जीर्णैर्लताप्रतानवलयैरत्यन्तकण्ठपीडनम्, जटासु शकुन्तैर्नीडनिर्मापनम्, सूर्यबिम्बमभितः स्थाणु इव निश्चलत्वेनावस्थानञ्चेत्यादिवर्णनेन मुनेः स्थाणुतुल्यं स्वरूपं प्रदर्श्य प्रकृतीकरणं विहितमस्ति (७/११)। अनया रीत्या नाटके शिवस्य जलादिमूर्तिकल्पनया, शकुन्तलाया लतारूपवर्णनेन, मारीचस्य स्थाणुसारूप्यदर्शनेन च मानवस्य प्रकृतीकरणं विहितमुपलभ्यते।

**मानवीकरणे संवेदनशक्तेर्विन्यासः**

'अभिज्ञानशाकुन्तल' नाटकान्तर्गतस्य प्रकृतिचित्रणस्य विशेषता वर्तते यत् प्रकृतौ मानवीया प्रवृत्तिश्चेतना च समारोपिता लभ्यते। अस्य नाटकस्य प्रकृतिवर्णनेषु एतादृशी महती विशेषता विराजते तया प्रकृत्यामवस्थितं जाड्यमपह्यते, तत्र भावप्रवणता, गतिशीलता, सचेतनता च सञ्चरन्ति। प्रकृतिचित्रणे अलौकिकी कल्पना प्रतिभा च यथा समारूढे लभ्येते तया प्राणिनो वनस्पतयो जडपदार्थाश्च मानवायन्ते। 'अभिज्ञानशाकुन्तल'नाटकस्य चतुर्थोऽङ्कः प्रशंसितो बहुजनप्रियश्च वर्तते। तस्मिन् अङ्के प्रकृतेर्मानवीकरणं यथा विहितमुपलभ्यते तपोवनस्य प्राकृतिकपदार्थेषु केवलं मानवोचिता कार्यशक्तिः समागच्छति अपितु सुखम्, दुःखम्, दया, दाक्षिण्यम्, परोपकारः, दानशीलता, परकीयमनोभावबोधक्षमता चेयत्यादिसहिता मानवीयसंवेदनाबोधशक्तिश्चारोहति। तत्र तिर्यञ्चो वनस्पतयश्च स्थाने स्थाने मानवीयसंवेदनामवगच्छन्ति, स्वयमेवानुभवन्ति, प्रकटीकुर्वन्ति च। यथा हि धर्मपुत्रीं शकुन्तलां हस्तिनापुरप्रेषणाय राजकुलोचितानां श्रृङ्गारप्रसाधनानामन्वेषणक्रमे कुलपतिः कण्वः शिष्यं हारीतं वनस्पतिभ्यः कुसुमानि आनेतुं निर्दिशति। वृक्षास्तु तस्याः कृते विविधानि वस्त्राभरणानि ददति -

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं<br>
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचिद्।<br>
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै<br>
र्दत्तान्याभरणानि नः किसलयच्छायापरिस्पर्द्धिभिः॥ (४/७) इति।

अत्र नवपरिणीता वधूरिव प्रथमवारं पतिगृहं गच्छन्त्याः शकुन्तलाया आवश्यकतां ज्ञातरुपकारी स्वजन इव इन्दुपाण्डुतरुर्माङ्गलिकावसरे परिधेयं वस्त्रं शकुन्तलायै अदात् तथैव अन्ये वृक्षाश्चरणप्रसाधनाय लाक्षारसः, भूषणानि च अदुरिति वर्णितमस्ति। अत्र वृक्षेषु सहयोगप्रदानस्य परकीयावश्यकतायाः बोधस्य च क्षमता समारूढा दृश्यते। कविना अलौकिककल्पनाशक्त्या प्रतिभया च वृक्षेषु चेतना यथा समानीता वर्तते तेन वृक्षाणि अपि कदा किमावश्यकमिति जानन्ति काले एव यथावश्यकमुपहरन्ति च। तथैव कण्वः स्वकीयं मनस्तापं सुहृदि इव वृक्षेभ्यो निवेदयति -

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या<br>
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।<br>
आदौ वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः<br>
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥ (४/११) इति।

कण्वः शकुन्तलाया निकटागतं भर्तृगृहगमनकालं तपोवनवृक्षेभ्यः सूचयति, तैः सह सम्मतिञ्च याचते, पुत्रिवियोगजां पीडां तेभ्यो वितरति च। कण्वसन्देशज्ञास्तपोवनवृक्षाश्च स्वकीयसन्देशवाहकानां कोकिलानां कूजितैः शकुन्तलायै सम्मतिं ददति। यथा -

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।<br>
परभृतविरुतं कल (लं ?) यतः प्रतिवचनीकृतमेभिरात्मनः॥ (४/१३) इति।

वृक्षेभ्यः श्रावितां वार्तामिमां श्रुत्वा शकुन्तलावियोगो निकटे एव वर्तते इति ज्ञाता हरिणी, मयूरी, लताश्च आसन्नवियोगसन्तप्तो मनुज इव शोकविह्वलाः सञ्जाताः सन्ति। यथा -

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी।
अपसृतपाण्डुपत्रा मुञ्चन्ति अश्रु इव लताः ॥ (४/१४) इति।

आसन्नवियोगभीत्या मृगी शोकविवृतमुखात् कुशग्रासमुद्गिरति, मयूरी न नृत्यति, लताश्च पाण्डुपत्रपरित्यागेनाश्रुपातं कुर्वन्ति इत्युक्त्वा पशुवनस्पतिषु मानवीयव्यवहार आरोपितो वर्तते । अत्र जडया प्रकृत्या सुखदुःखादिकानुभवे, मानवीयसंवेदनावगमने, प्रकटीकरणे च प्रकृतेर्मानवीकरणस्य उत्कर्षो लभ्यते । एवमेव शैशवे शकुन्तलया नीवारमुष्टिप्रदानादिभिः पोषितः मृगशावको तपोवनान्निर्गच्छन्तीं शकुन्तलां रोद्धुं प्रयतते। यथा -

शकुन्तला – [गतिभेदं रूपयित्वा] अहो ! को नु खलु एष पदाक्रान्त इव मे पुनः पुनर्वसनान्ते सज्जते ?

कण्वः - वत्से !

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्याषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्द्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ (४/१६) इति।

मृगशावकः शिशुर्मातुरिव शकुन्तलाया वस्त्राभ्यन्तरे गच्छति। सा बहिर्गन्तुकामा वर्तते इति जनाति तां निरोद्धुं प्रयतते च। प्रकरणेऽस्मिन् तेन तस्या पटधारमाधाय कर्षणम्, मृगशावके इयं गन्तुकामास्ति, मया रोद्धव्या इति मतेरुद्भवः, तस्मिन् हार्दभावोत्पत्त्यादिभिः सचेतनसम्पाद्यैः कर्मभिस्तिरश्चो मृगशावकस्य शारीरिकमानसिकक्रिया मानवीकृताः सन्ति। एवमेव शकुन्तला वियोगवार्तया खिन्नश्चक्रवाकः प्रियया सह रमणं स्वादुमृणालभक्षणमपि परित्यज्य शकुन्तलां विलोकयति (४/१६) । माधवीलता शकुन्तलामालिङ्गति (पृ.२९८) नवमालिका आम्रवृक्षमारुह्य चीरप्रतिक्षितवरसम्प्राप्ता तरुणी इव प्रसीदति। तपोवनस्थैर्वृक्षैः, कोकिलेन, मृग्या, मयूर्या, लतया, मृगशावकेन, चक्रवाकेन, माधवीलतया, नवमालिकया च सम्पादिता मानवोचिताः कायिकाः मानसिकाश्च क्रियाः पशुपक्षीवनस्पतीनां स्वाभाविकक्रिया न सन्ति तथा सत्यपि उपरि समुद्धृतेषु नाट्यांशेषु वर्णिताः सर्वाः क्रियास्तिर्यग्भिर्वृक्षैश्च सम्पादिता इति वर्णितमस्ति । अनया रीत्या प्रकृतौ मानवीयकार्यकलापसंवेदनशक्त्योः समारोपादत्र प्रकृतेर्मानवीकरणं विलसति। नाटकस्य षष्ठाङ्के शकुन्तला परिणीतपूर्वा वर्तते इति स्मरणानन्तरं खिन्नो दुष्यन्तो वसन्तोत्सवं निषेधयति। राज्ञस्तन्निषेधं प्रकृत्या यथा परिपालितं वर्तते -

चूतानां चिरनिर्गताऽपि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरुवकं तत् कोरकावस्थया
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ॥ (६/३¬) इति।

अत्र राज्ञः शासनमनुपालयन्ती उद्यानप्रकृतिश्चित्रिता वर्तते । तस्यां बहुकालपूर्वं निर्गतासु चूतकलिकासु परागशून्यता, मुकुलोद्गमसन्निकटासु कुरवकपुष्पकलिकासु कालेनापि कलिकोद्गमाभावः, शीतकालगमनानन्तरमपि पुंस्कोकिलरुताभावश्च दर्शिता वर्तते । तिरश्चां वनस्पतीनाञ्च नाटके वर्णिता एताः क्रियाः संवेदनशक्त्यारोपपूर्वकं मानवीक्रिताः सन्ति।

इत्थं नाटके वृक्षाः लताश्च दयादाक्षिण्यादिप्रकटनेन, वार्ताश्रवणेन, अनुमतिप्रदानेन, रोदनेन, राजशासनपालनेन च

सुखदुःखदयादाक्षिण्यभयादिकान् मनोभावान् प्रकटयन्ति, अनुभवन्ति च । मयूरमृगकोकिलमृगशावकैरपि शोकः, भयम्, वात्सल्यञ्चेत्यादयो मनोभावाः प्रकटीकृताः सन्ति । महाकविना कालिदासेन तिर्यक्षु वनस्पतिषु च मानवीय सहानुभूतीः, भावान्, संवेगांश्च प्रदर्श्य प्रकृतिर्मानवीकृता वर्तते ।

**निष्कर्षः**

'अभिज्ञानशाकुन्तल'नाटके प्रस्तुतस्य प्रकृतिचित्रणस्य विशेषता वर्तते यत् – नाटकीयं प्रकृतिचित्रणं मानवीकरणाप्लावितं वर्तते । नाटकस्य नान्दीपाठे एव भगवतः शिवस्य प्रकृतीकरणमुपलभ्यते । प्रस्तावनायामपि नट्या प्रस्तुते गायने भ्रमरो मानवीकृत्य प्रस्तुतो वर्तते । इत्थं नाटकस्यारम्भे एव प्रकृत्या सह मानवस्याभेद्यः सम्बन्धः प्रदर्शितोस्ति ।

नाटके पशुपक्षीपतङ्गवृक्षलतादेशकालादिकेषु प्राकृतिकवस्तुषु मानवव्यवहारारोपो नितरां रमणीयो वर्तते । तत्र चन्द्रसूर्यवायुनदीस्थाणुवृक्षादिजडानाम्, मृगकाककोकिलशलभमधुकरादितिरश्चाम्, वर्षावसन्तप्राचीप्रभात-सूर्यास्तादिदेशकालानाञ्च व्यवहारा मानवीकृताः सन्ति । नाट्यवस्तुनो विस्तारक्रमे घटनाभावयोर्वर्णनेषु जडाः, तिर्यञ्चः, वनस्पतयश्च मानवोचितक्रियाः सम्पादयन्ति । तथैव नाटके मानवोऽपि प्रकृतीकृत्य प्रस्तुतो वर्तते । नान्द्यामष्टमूर्तिवर्णने भगवान् शिवः सप्तमूर्तिसु प्राकृतिकशरीरं धारयति । नाटकस्य नायिका शकुन्तला प्रकृतिकन्या दर्शिता वर्तते । नाट्यवर्णनेषु तस्याः शरीरं लतासादृश्यं बिभर्ति । अधरादीनि शरीरावयवानि यौवनञ्च पल्लवरागकोमलविटपापूर्वपुष्पादिभिः साम्यं धारयन्ति । अत्र सा दुष्यन्तकण्वप्रियंवदाभिर्लतासहोदरी सुन्दरी लता एव वर्णिता वर्तते । नाटकस्य सप्तमाङ्के मारीचमुनेर्विग्रहः स्थाणुतुल्यं निर्दिश्य प्रकृतीकृतोऽस्ति । इत्थं नाटके देवमानवयोः प्रकृतिमयत्वं साधितं वर्तते ।

'अभिज्ञानशाकुन्तल'नाटकान्तर्गतप्रकृतिचित्रणगता प्रमुखा विशेषता इयं वर्तते प्रकृतौ केवलं मानवोचिताः क्रियाः समारोपिता न सन्ति अपितु प्रकृत्यामवस्थितं जाड्यं निर्विवेकित्वञ्चापहृत्य तस्यां भावात्मकता, गतिशीलता, सञ्चेतना, अलौकिकी कल्पना च सम्यक् जागरिता वर्तते । नाटकीयवर्णनेषु वृक्षलतादयो वनस्पतयः मयूरमृगीमृगशावककोकिलादयस्तिर्यञ्चश्च मानवेन इव सुखदुःखादिकमनुभवन्ति, दयादाक्षिण्यादिमानवीयसंवेदनामनुभवन्ति, प्रकटीकुर्वन्ति च ।

प्रकारेणानेन नाटके संवेदनामनुभवन्ती प्रकटीकुर्वन्ती च प्रायशः सुकोमला सुमधुरा प्रकृतिश्चित्रिता लभ्यते । नाटकीये प्रकृतेर्मानवीकरणे मानवस्य प्रकृतीकरणे च कवेः सूक्ष्मनिरीक्षणक्षमतया साकमलौकिककल्पनाशक्तेः सुन्दरं सुमधुरञ्च संयोजनम्, आयामस्वरूपगतवैविध्यञ्च विलोक्यते ।

**सन्दर्भसूची**

आचार्य, श्रीराम शर्मा (?/२००५). १०८ उपनिषद् (सरल हिन्दी भावार्थसहित). युग निर्माण योजना । https://sanatanjan.wordpress.com/wp-content/uploads/2017/07/hindi-book-108-upanishads-part-2gyan-khanada-pt-shriram-sharma-acharya_2.pdf

ईश्वरकृष्णः (ई. १९७०). साङ्ख्यकारिका (युक्तिदीपिका एवम् तत्त्वप्रभा व्याख्यासहिता, रमाशङ्करत्रिपाठी, व्या. का.). https://archive.org/details/dli.ministry.26848/page/n90/mode/1up?view=theater

कच्छावाहा, संदीप (ई.२०२४). महाकवि कालिदास के काव्यों में प्रकृति चित्रण. http://www.socialresearchfoundation.com/new/publish-journal.php?editID=9388

कालिदासः (सन् २०११). अभिज्ञानशाकुन्तलम् (ज्योत्स्नासरलासंस्कृतहिन्दीव्याख्योपेतम्, सुधाकरमालवीयः, व्या.का.). चौखम्बा कृष्णदास अकादमी, वाराणसी।

कालिदासः (सन् २०१३). अभिज्ञानशाकुन्तलम् (विमलाचन्द्रकलासंस्कृतहिन्दीव्याख्योपेतम्, कृष्णमणित्रिपाठी, व्या.का.). चौखम्बा सुरभारती प्रकाशन।

ठाकुर, सुरवीर सिंह आई (सन् २०२१). अभिज्ञानशाकुन्तलम् में मानवीय संवेदना International Journal of Research in Humanities & Soc. Sciences https://www.raijmr.com/ijrhs/wp-content/uploads/2021/11/IJRHS_2021_vol09_issue_8_Eng_08.pdf

त्रिवेदी, बिपिन बिहारी, गुप्ता, उषा, (ई. १९६१). काव्य विवेचन. प्रकाशन केन्द्र। https://ia902205.us.archive.org/0/items/in.ernet.dli.2015.483948/2015.483948.KAVAYA-VIVACHAN.pdf

नगेन्द्र (ई.१९९१). भारतीय साहित्य कोश. नेशनल पब्लिसिङ हाउस। https://ia801405.us.archive.org/7/items/in.ernet.dli.2015.273683/2015.273683.Bhartiya-Sahitya.pdf

राज, पुनम (ई.२०१८). अभिज्ञानशाकुन्तलम् में पर्यावरणीय महत्व. International Journal of Scientific Research in Science and Technology. Technoscience Academy. https://ijsrst.com/paper/2920.pdf

विश्वनाथः (२०६३). साहित्यदर्पणः (सटिप्पणलक्ष्मीव्याख्याविभूषितः, आचार्यः कृष्णमोहनशास्त्री, व्या.का., सम्पा.). चौखम्बा संस्कृत संस्थान।

सुश्रुतसंहिता (तृ. सं.) (?/ई. १९६०). (अत्रिदेव अनु.). सुन्दरलाल जैन, मोतीलाल वनारसीदास। https://archive.org/details/by_20230409/page/n3/mode/2up?view=theater

शर्मा, चन्द्रधर (ई. १९९०/२०१०). भारतीयदर्शन आलोचन और अनुशीलन (द्वि. सं. पुनर्मुद्रण). मोतीलाल वनारसीदास। https://ia902908.us.archive.org/12/items/bharatiyadarsanalochanaauranusheelanindianphilosophycriticalsurveychandradharsharma_202003_128_C/Bharatiya%20Darsan%20Alochana%20Aur%20Anusheelan%20Indian%20Philosophy%20%28Critical%20Survey%29%20Chandradhar%20Sharma.pdf

श्रीमद्भगवद्गीता (शाङ्करभाष्यहिन्द्यनुवादसहिता, अष्टमसं.) (१९८८/२०१०). (श्रीहरिकृष्णगोयन्का अनु.). घनश्यामदास जालान गीताप्रेस। https://archive.org/details/4.bhagavadgitasankarabhashyawithhinditranslationharikrishnadasgoyandaka1953gitapress/page/n105/mode/2up?view=theater

श्वेताश्वेतरोपनिषद् (मन्त्रार्थ शाङ्करभाष्य भाष्यार्थसहित) (?). मोतीलाल जालान, गीताप्रेस। https://ia802905.us.archive.org/35/items/

in.ernet.dli.2015.408312/2015.408312.Swetaswatropnishad.pdf

सिंह, रामायण (ई.२०२४). कालिदासीय काव्यों में पर्यावरण-विमर्श. https://www.allstudyjournal.com/article/1162/6-4-18-538.pdf

सोनकर, सुष्मिता (ई.२०१८). अभिज्ञानशाकुन्तल में पर्यावरणीय चिन्तन. International Journal of Scientific Research in Science and Technology (IJSRST). Technoscience Academy. https://ijsrst.com/paper/4196.pdf

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

# फलादेशे ग्रहाणामवस्थाविवेकः

शालिग्राम ढकाल
उपप्राध्यापकः
वाल्मीकिविद्यापीठम्, काष्ठमण्डपः
Gmail: shaligram.dhakal41@gmail.com
DOI:

**शोधसारः**

ग्रहाणां बालाद्यवस्थादीनां वास्तविकज्ञानपुरःसरं कृतेन फलादेशेन जातकस्य वास्तविकमूहापोहं विज्ञायते । ग्रहास्त्ववस्थानुसारं फलं प्रयच्छन्ति । बालो ग्रहश्चरणैकफलं, कुमारो ग्रहश्चरणद्वयफलं, युवा ग्रहः पूर्णं फलं, वृद्धो ग्रहोऽत्यल्पफलं मृतश्च ग्रहो निष्फलत्वं जनयति । जागृतो ग्रहः पूर्णं फलं, स्वप्नस्थो ग्रहो मध्यफलं सुषुप्तो ग्रहश्च फल्गुफलं जनयति । दीप्त - स्वस्थ - मुदित - शान्तग्रहदशायां मानवो धनैश्वर्यादि-वाहन-पुत्र-पत्नी-राजसम्मान-विविधलाभान्वितो भवति चेद् दीन - दुःखित - विकल - खल - क्रुद्धा ग्रहास्तु शुभान्यपहत्याशुभानि प्रयच्छन्ति । तथैव मुदितगर्वितग्रहाः स्वदशायां शुभत्वं जनयन्ति । अन्ये च ग्रहाः शुभत्वं नाशयन्ति । शयनस्थो ग्रहो रुग्णत्वम्, उपवेशनस्थो ग्रहः कष्टाधिक्यत्वं जनयति । नेत्रपाणिस्थो ग्रहः शुभजनको भवति । प्रकाशन - सभावास - नृत्यलिप्सा - कौतुकाश्च ग्रहाः केवलं शुभत्वाधायकाः, अन्यास्ववस्थासु चाशुभजनका ग्रहा भवन्ति । तथैव प्रवासद्यवस्थायामपि नामसन्निभानि फलानि ग्रहाः स्वदशायां प्रयच्छन्ति ।

**शब्दबीजानि -** बालादयः, दीप्तादयः, जाग्रदादयः, शयनादयः, प्रवासादयः, ग्रहावस्थाः, शुभाशुभत्वम् ।

## विषयपरिचयः

जातकस्य त्रैकालिकं समग्रं ज्ञानं सूर्यादिग्रहाणामवस्थापरिशीलनेनैव सम्भवति । कुण्डल्यां द्वादशभावे विराजिता ग्रहाः कस्यामवस्थायां वरीवृत्यन्त इति तदवस्थाबोधपुरःसरं ग्रहजन्यशुभाशुभफलाप्तिविषयकनिर्णयो भवति । ग्रहास्तु स्वस्यावस्थानुसारं फलं प्रयच्छन्ति । ग्रहाणामंशाधारेण बालाद्यवस्था भवन्ति । बाल-कुमार-युवा-वृद्ध-मृतावस्थासु पूर्णं फलं युवावस्थायामेव प्राप्यते न त्वन्यावस्थासु । तथैव ग्रहाणां नवधा दीप्ताद्यवस्था भवन्ति । तत्र दीप्त-स्वस्थ-मुदित-शान्तासु चतसृष्ववस्थासु शुभत्वद्योतका भवन्ति ग्रहाः । अन्यासु शक्त-निपीडित-भीत-विकल-खलावस्थासु शुभत्वहीना अशुभत्वाधायका भवन्ति । जाग्रदाद्यवस्थासु जागरुका ग्रहाः पूर्णं फलं जनयन्ति । तथैव ग्रहस्थितनक्षत्राधारेण स्पष्टांशाधारेण च द्वादशविधाः शयनाद्यवस्था भवन्ति । तत्र शयनमुपवेशने, नेत्रपाणिः, प्रकाशनम्, गमनागमने, सभावासः, आगमः, भोजनम्, नृत्यलिप्सा, कौतुकम्, निद्रवास्था च । एतास्ववस्थासु द्वादशभावाधारेण शुभाशुभत्वं प्रयच्छन्ति । तथैव प्रवास-नष्ट-मृत-जय-हास्य-रति-मुद-सुप्त-भुक्त-ज्वर-कम्प-स्थिरावस्था भवन्ति । ग्रहस्थितनक्षत्राधारेण भयाताधारेण चैता अवस्था आनीयन्ते । अवस्थानुसारं फलं च प्राप्नोति जातकः । ग्रहाः कस्यामवस्थायां कस्मिँश्च भावे विराजमानाः सन्तीति परिशीलनपूर्वकं फलबोधो विधीयते चेत् सर्वेषां जनिमतां ग्रहजन्यानि समग्राणि फलानि सुष्ठु विज्ञायन्ते । अतः कुण्डल्यां

विराजिताः सूर्यादिनवग्रहाः कस्यामवस्थायां सन्तीति चिन्तनं विनैव कृतेन फलादेशेन देवज्ञोऽपयशोभागी भवति । अतो ग्रहाणामवस्थाज्ञानं सम्यक्तया करणीयम् । सूर्यादिग्रहाणामवस्थायां बहुतरं वैविध्यं दरीदृश्यते । यासामवस्थानां सुष्ठु परिचिन्तनेन जातकस्य त्रैकालिकमूहापोहं हस्तामलकवदनुभूयते । होराशास्त्रपारावारिणैर्महर्षिभिर्ग्रहाणामवस्थानामालोडनं विहितमपि दृश्यते । अत्र सोदाहरणं ग्रहावस्थापरिशीलनं विधीयते ।

**समस्याकथनम्**

सूर्यादिनवग्रहाणां शुभाशुभत्वफलबोधाय बालादयो दीप्तादयाद्यवस्थानां परिशीलनं दृश्यते । मानवजीवनेऽवस्थानुसारेण कीदृशं फलं प्राप्यत इत्यस्मिन्ननुसन्धानात्मके आलेखे प्रदर्श्यते । अतोऽत्र ग्रहावस्थाजन्यसमस्याः समुद्घाटिताः सन्ति । अस्मिन्नध्ययने विशेषरूपेण निम्नसमस्ययोः समाधानाय प्रयत्नः कृतोऽस्ति -

क) ग्रहाणां बालादयोऽवस्थाः काः काः सन्ति ?

ख) ग्रहावस्थाबोधः कथं भवति ?

**उद्देश्यम्**

ग्रहाणां प्रभावो मानवजीवने कीदृशो विद्यत इति निश्चयार्थं ग्रहावस्थापरिशीलनमत्यावश्यकम् । अतोऽवस्थापरिशीलने समुपस्थापितायाः समस्यायाः समाधानरूपेणेदमध्ययनं कृतमस्ति । उक्तयोः समस्ययोरुत्तरात्मकमुद्देश्यं यथा -

क) ग्रहाणां बालादयाद्यवस्थानां परिशीलनम् ।

ख) ग्रहावस्थाबोधसमीक्षणम् ।

**अध्ययनविधिः**

अनुसन्धानात्मकस्यालेखस्याध्ययनक्रमे सामग्रीसङ्कलनाय पुस्तकालयीयविधिर्विशेषरूपेण प्रयोगः कृतः । ग्रहाणामवस्थाजन्यफलबोधनिर्णये सम्बद्धजातकानां कुण्डलीनिदर्शनं वार्तालापं च विधाय स्थलगतमध्ययनमपि विहितम् । अभीष्टसिद्धये वर्णनात्मक-विश्लेषणात्मक-तुलनात्मकविधिः प्रयुज्यते । ततः सामग्रीणां सत्यापनद्वारा निष्कर्षो विहितो विद्यते ।

**सीमाङ्कनम्**

ग्रहाणां परिचिन्तनं विविधमाध्यमेन कर्तुं शक्यते । परन्त्वत्र ग्रहाणां बालाद्यवस्थानां दीप्ताद्यवस्थादीनामेवाध्ययनं विधीयते । बालाद्यवस्थादिपरिचिन्तने एव प्रवृत्तिर्भविष्यति । तदन्यत्राप्रवृत्तिश्चास्यानुसन्धानस्य सीमा ।

**ग्रहाणां बालाद्यवस्थाः**

सूर्यादिग्रहाणामंशाधारेण तेषां विभिन्ना बालाद्यवस्था निर्मीयन्ते । ताश्च पञ्चविधाः सन्ति । त्रिंशदंशान् पञ्चभिर्भाजिते सति षडंशा भवन्ति । यथा ३०० ÷ ५ = ६० । बालावस्था, कुमारावस्था, युवावस्था, वृद्धावस्था, मृतावस्था च । सम-

विषमराश्योर्ग्रहस्थितित्वादंशाधारेण सर्वासामवस्थायां पार्थक्यं दरीदृश्यते । विषमराशौ, आदितः ६ अंशपर्यन्तं बालावस्था, ७-१७ अंशपर्यन्तं कुमारावस्था, १३-१८ अंशपर्यन्तं यौवनावस्था, १९-२४ अंशपर्यन्तं वृद्धावस्था तथैव २५-३० अंशपर्यन्तं मृतावस्था । समराशौ च वैपरीत्यं भवत्यवस्थायाम् । अर्थात् समराशौ ०-६ अंशपर्यन्तं मृतावस्था, ७-१२ अंशपर्यन्तं वृद्धावस्था, १३-१८ अंशपर्यन्तं यौवनावस्था, १९-२४ अंशपर्यन्तं कुमारावस्था, २५-३० अंशपर्यन्तं बालावस्था । कथितञ्च - बालः कुमारोऽथ युवा च वृद्धो मृतश्च राशावयुजि क्रमेण । त्रिंशल्लवैर्व्यत्ययतः समे स्युरेकैकशोंऽशाः पुनरेव कार्या (जातकपारिजातः, २।८४) । एतदेव मतं पराशरस्यापि नयनगोचरीभूतं दृश्यते । यथा - क्रमाद् बालः कुमारोऽथ युवा वृद्धस्तथा मृतः । षडंशैः रसभे खेटः समे ज्ञेयो विपर्ययात् ( बृहत्पाराशरहोराशास्त्रम्,४७।३)। बेङ्कटेशशर्मणोऽपि पूर्वोक्तमेव मतं दरीदृश्यते । यथा - बालाद्यवस्थाः क्रमशो ग्रहाणामोजे समे तद् विपरीतमाहुः । बालः कुमारोऽथ युवा च वृद्धो मृतो लवानामृतुभिः क्रमेण ( सर्वार्थचिन्तामणिः,१।३५) । देवज्ञेन महादेवपाठकेनापि एतदेव कथनमस्ति । यथा - ओजर्क्षे क्रमाद् बालकुमारयुववृद्धमृताख्या अवस्थाः समर्क्षे व्यत्ययः( जातकतत्त्वम्,१।६८) । स्पष्टज्ञानार्थं बालाद्यवस्थाबोधकं चक्रमधः प्रस्तूयते ।

| अवस्थाः | बालावस्था | कुमारावस्था | युवावस्था | वृद्धावस्था | मृतावस्था |
|---|---|---|---|---|---|
| **विषमराशौ** | ०° - ६° | ७°-१२° | १३°-१८° | १९°-२४° | २५°-३०° |
| **समराशौ** | २५°-३०° | १९°-२४° | १३°-१८° | ७°-१२° | ०° - ६° |

कस्मिँश्चिद् जातकग्रन्थे राश्याधारेण बालाद्यवस्थाबोधो विहितो न त्वंशाधारेण । तच्च समराशिगतो ग्रहोऽतिबालः, मित्रगृहस्थो ग्रहो बालः, स्वगृहस्थो ग्रहः कुमारः, मूलत्रिकोणस्थो ग्रहो युवा, उच्चराशिगतो ग्रहो राजा, शत्रुगृहस्थो ग्रहो वृद्धः, नीचराशिस्थो ग्रहो मृतः । उक्तञ्च - अतिबालः समर्क्षस्थो बालो बन्धुगृहे स्थितः । कुमारः स्वगृहस्थः स्यात् स्वत्रिकोणे युवा भवेत् ॥ उच्चस्थानगतो राजा वृद्धः शत्रुगृहे स्थितः । मृतनामातिनीचस्थो दशैवं स्थानतो भवेत् ( जातकपारिजातः, पृ. ८२) । पुनश्चोदितो ग्रहोऽतिबालः, सप्तांशपर्यन्तको ग्रहो बालः, ततः कुमारः, वक्रारम्भे युवा, वक्रावधौ राजा, अस्तसन्निकटे वृद्धः, अस्तङ्गतो ग्रहो मृतो भवति ।

अतिबालावस्थाग्रहदशायां जातको जडतां याति । रोदने बलं मनुते । बाल्यावस्थाग्रहदशायां जातकः क्रीडासक्तो भवति । आमोदे प्रमोदे च रमते । कुमारावस्थाग्रहदशायां विद्याभिरुचिर्भवति । युवावस्थाग्रहदशायां भोगाभूषणाभिरुचिर्वासनापूर्तिश्च भवति । वृद्धग्रहदशायां दौर्बल्यं जाड्यञ्च दृश्यते । मृतो ग्रहो जैवनिकावस्थायां मृत्युं दर्शयति । मृत्युकारकश्च भवति । अत्र कल्याणवर्मणो मतं पृथक् दृश्यते । स्वराशिस्थो मित्रराशिस्थो ग्रहो बालः, मूलत्रिकोणराशिस्थो ग्रहो कुमारः, उच्चराशिस्थो ग्रहो युवा शत्रुराशिस्थो ग्रहो वृद्धः, नीचस्थो ग्रहो मृतो भवतीत्यक्तम् । यथा - स्वमित्रक्षेत्रसंस्थानां ग्रहाणां बालसंज्ञिका । स्वत्रिकोणगतानाञ्च कुमारो नामसंज्ञितः ॥ ग्रहाणां स्वोच्चसंस्थानां युवराजः प्रकीर्तितः । शत्रुक्षेत्रगतानाञ्च वृद्धो नाम तथेरितः । । नीचगानां ग्रहाणां च दशा मरणसंज्ञिता । तत्तत्फलसमायुक्ता ग्रहाणां तु दशा भवेत्(सारावली,५।४७-४९) । सारांशेन बालेन ग्रहेण सुखी, निश्चिन्तश्च, कुमारेण सुशीलः, यूना ग्रहेण राजा, वृद्धेन ग्रहेण ऋणग्रस्तो भयभीतश्च भवति । तथैव

मृतो ग्रहो मरणमपमानञ्च करोति।

**ग्रहाणां दीप्ताद्यवस्थाः**

ग्रहाणामवस्थित्याधारेण नवधा दीप्ताद्यवस्था वर्तन्ते । ताश्च दीप्तावस्था, स्वस्थावस्था, मुदितावस्था, शान्तावस्था, शक्तावस्था, निपीडितावस्था, भीतावस्था, विकलावस्था, खलावस्था च । कथितञ्च - दीप्तः स्वस्थो मुदितः शान्तः शक्तो निपीडितो भीतः । विकलः खलश्च कथितो नवप्रकारो ग्रहो हरिणा(सारावली,५।२) । उच्चराशिस्थो ग्रहो दीप्तः, स्वराशिस्थो ग्रहः स्वस्थः, मित्रराशिस्थो ग्रहो मुदितः, शुभवर्गस्थो ग्रहः शान्तः, समराशशिस्थो ग्रहः शक्तः, सूर्यसान्निध्येनास्तो ग्रहो विकलः, ग्रहपीडितो ग्रहो निपीडितः, पापवर्गस्थितो ग्रहः खलः, नीचराशिस्थितो ग्रहो भीतो भवति । उक्तञ्च - स्वोच्चे भवति दीप्तः स्वस्थः स्वगृहे सुहृद्गृहे मुदितः। शान्तः शुभवर्गस्थः शक्तः स्फुटकिरणजालश्च ॥ विकलो रविलुप्तकरो ग्रहाभिभूतो निपीडितश्चैवम् । पापगणस्थश्च खलो नीचे भीतः समाख्यातः(सारावली, ५।३-४) । अस्मिन् प्रसङ्गे पराशरस्य पार्थक्यं मतं दरीदृश्यते । दीप्तः, स्वस्थः, प्रमुदितः, शान्तः, दीनः दुःखितः, विकलः, खलः क्रोधी च । यथा चोक्तम् - दीप्तः स्वस्थः प्रमुदितः शान्तो दीनोऽथ दुःखितः । विकलश्च खलः क्रोधीत्यवस्था नवधाऽपराः(बृहत्पाराशरहोराशास्त्रम्,४७।७) । अवस्थानां पार्थक्ये हेतुत्वं वर्तते यत् उच्चस्थो ग्रहो दीप्तः, स्वराशिस्थ स्वस्थः, अधिमित्रराशिस्थः प्रमुदितः, मित्रराशिस्थः शान्तः, समराशिस्थो ग्रहो दीनः, शत्रुगृहस्थो दुःखी, पापग्रहयुतो विकलः, पापग्रहराशिस्थः खलः, अस्तङ्गो ग्रहः क्रोधी भवतीति । उट्टङ्कितञ्च - स्वोच्चस्थः खेचरो दीप्तः स्वर्षे स्वस्थोऽधिमित्रभे ॥ मुदितो मित्रभे शान्तः समभे दीन उच्यते । शत्रुभे दुःखितः प्रोक्तो विकलः पापसंयुतः ॥ खलः खलगृहे ज्ञेयः क्रोधी स्यादर्कसंयुतः(बृहत्पाराशरहोराशास्त्रम्, ४७।(८-९) । पराशरस्य कल्याणवर्मणश्च मतं तालिकायां प्रदर्श्यते स्पष्टज्ञानार्थम्

| महर्षिः पराशरः | | कल्याणवर्मा | |
|---|---|---|---|
| दीप्ताद्यवस्थाः | अवस्थितयः | दीप्ताद्यवस्थाः | अवस्थितयः |
| दीप्तः | उच्चराशिः | दीप्तः | उच्चराशिः |
| स्वस्थः | स्वगृही | स्वस्थः | स्वगृही |
| प्रमुदितः | अधिमित्रगृही | मुदितः | मित्रगृही |
| शान्तः | मित्रगृही | शान्तः | शुभवर्गः |
| दीनः | समराशिः | शक्तः | समराशिः |
| दुःखितः | शत्रुगृही | निपीडितः | पापपीडितः |
| विकलः | पापग्रहयुतः | भीतः | नीचराशिः |
| खलः | पापग्रहराशिः | विकलः | अस्तः |
| क्रोधी | अस्तः | खलः | पापवर्गः |

दीप्तग्रहदशायां जातकः प्रतापी, रिपुनाशकः, ऐश्वर्यशाली च भवति। स्वस्थग्रहदशायां रत्नप्राप्तिः पदप्राप्तिः,धनधान्यवृद्धिः कुलकुटुम्बवृद्धिश्च भवति। मुदितग्रहदशायां प्रसन्नता, शत्रुपराजयः, ऐश्वर्यभोगश्च भवति। शान्तग्रहदशायां धार्मिकः शान्तः परोपकारी पण्डितश्च भवति। शक्तग्रहदशायां भूषाभिर्विभूषितः, नेता यशस्वी च भवति। पीडितग्रहदशायां शत्रुभीतिः, रोगग्रस्तो बन्धुवियोगश्च भवति। भीतावस्थायां पराजितो दीनहीनश्च भवति। विकलग्रहदशायां भ्रष्टो दुःखितः परदेशगामी शत्रुभयश्च भवति। खलसंज्ञकग्रहदशायां स्त्रीकष्टं धनक्षतिश्च भवति। तेनैव कारणेन सदैव सन्तप्तो भवति।

**ग्रहाणां जाग्रदाद्यवस्थाः**

यथा मानवानां जाग्रदाद्यवस्था भवन्ति तथैव ग्रहाणामपि भवन्ति। ग्रहो यदि नवांशकुण्डल्यामुच्चराशौ स्वराशौ वा वर्तते चेद् जाग्रदवस्थायां भवति। नवांशकुण्डल्यां मित्रराशौ स्थितो ग्रहः स्वप्नावस्थायां भवति। शत्रुनवांशे वा नीचनवांशे स्थितो ग्रहः सुषुप्तावस्थायां भवति। कथितञ्च - उच्चांशे स्वनवांशे च जागरुकं वदन्ति हि। सुहृन्नवांशकं स्वप्नं सुप्तं नीचारिभांशकम् ( जातकपारिजातः,२।८५)। एतदेव मतमस्ति मुकुन्दपर्वतीयस्य। यथा - जागरूक उदितः स्वनवांशः स्वीयतुङ्गलवकोऽपि तथा स्यात्। मित्रखेचरलवः शयनाख्यः सुप्तकौ त्वधरशात्रवभागौ (भावमञ्जरी, १।२२)। जाग्रदवस्थायां ग्रहः पूर्णं फलं प्रयच्छति। स्वप्नावस्थायां ग्रहो मध्यफलदो भवति चेत् सुषुप्तावस्थायां निष्फलो भवति ग्रहः। उक्तञ्च जागरे च फलं पूर्णं स्वप्ने मध्यफलं तथा। सुषुप्तौ तु फलं शून्यं विज्ञेयं द्विजसत्तम ( बृहत्पाराशरहोराशास्त्रम्, ४७।६)।

**ग्रहाणां शयनाद्यवस्थाः**

ग्रहाधिष्ठितनक्षत्राणामाधारेण, अंशाधारेण च शयनाद्यवस्थाबोधो भवति। ताश्च शयनाद्यवस्था द्वादशविधाः। शयनावस्था, उपवेशनावस्था, नेत्रपाण्यवस्था, प्रकाशनावस्था, गमनावस्था, आगमनावस्था, सभावासावस्था, आगमावस्था, भोजनावस्था, नृत्यलिप्सावस्था, कौतुकावस्था, निद्रावस्था च। यथा चोक्तम् -शयनं चोपवेशञ्च नेत्रपाणिप्रकाशनम्। गमनागमनञ्चाथ सभायां वसतिं तथा॥ आगमं भोजनं चैव नृत्यलिप्सां च कौतुकम्। निद्रां ग्रहाणां चेष्टां च कथयामि तवाग्रतः(बृहत्पाराशरहोराशास्त्रम्, ४७।३९-४०)। शयनाद्यवस्थाज्ञानार्थमेतादृशी प्रक्रियाऽवलम्ब्यते। तद्यथा - ग्रहस्थितनक्षत्रसंख्यया ग्रहसंख्यां गुणनं विधाय तत्फलं पुनः ग्रहांशसंख्यया गुणितं कार्यम्। ततस्तस्मिन् फले इष्टघटिकां जन्मनक्षत्रसंख्यां जन्मलग्नराशिसंख्यां च योजनं विधातव्यम्। तत्पश्चात् तत्पूर्णफलं द्वादशसंख्याभिर्विभाजितं कार्यम्। शेषसंख्यानुसारेण शयनाद्यवस्थाः भवन्ति। कथितञ्च - ग्रहर्क्षसंख्या खगमाननिघ्नी खेटांशसंख्या गुणिता ग्रहाणाम्।
निजेष्टजन्मर्क्षतनुप्रमाणैर्युतार्कतष्टा शयनाद्यवस्था (भावकुतूहलम्,११।३)।

सूत्रनिर्माणे तु -

{(ग्रहस्थितनक्षत्रसंख्या×ग्रहसंख्या)×खेटांशसंख्या)}+(इ.घ.प+ज.न.+लग्नराशिसंख्या)÷१२

उदाहरणम्

स्पष्टसूर्यः = ९।१।५९।५६

सूर्यग्रहस्थितनक्षत्रसंख्या = २१(उत्तराषाढा)

सूर्यग्रहसंख्या = १

खेटांश(स्पष्टसूर्यात्मक अंश = १

इष्टघटी = २२

जन्मनक्षत्रसंख्या = ६(आर्द्रा)

लग्नराशिसंख्या = ३(मिथुनम्)

अत्र सूत्रानसारे,

{(ग्रहस्थितनक्षत्रसंख्या×ग्रहसंख्या)×खेटांशसंख्या)}+(इ.घ.प+ज.न.+लग्नराशिसंख्या)÷१२

{(२१×१)×१)+(२२+६+३)÷१२}

{(२१×१)+(२२+६+३)÷१२}

{(२१+३१)÷१२}

{५२÷१२}

१२) ५२ ( ४

४८

४ शेषाः

अतः सूर्य प्रकाशावस्थायां वर्तते। प्रकाशावस्थायां सूर्यः औदार्यं धनाधिक्यं वचनपटुत्वं पुण्यकर्तृत्वं बलशालित्वं सौन्दर्यपूर्णत्वञ्च कारयति जातकम् । कथितञ्च - उदारचित्तः परिपूर्णवित्तः सभासु वक्ता बहुपुण्यकर्ता । महाबली सुन्दररूपशाली प्रकाशने जन्मनि पद्मिनीशे ( भावकुतूहलम्, १२।४) । तथैव शयानो ग्रहः शुभफलं नैव प्रयच्छति । अर्थात् शयानः सूर्यः पित्तप्रकोपं जनयति । अङ्घ्रिस्थौल्यं व्रणकष्टं शूलञ्च कारयति । यथोक्तम् - मन्दाग्निरोगो बहुधा नराणां स्थूलत्वमङ्घ्रेरपि पित्तकोपः । व्रणं गुदे शूलमुरःप्रदेशे यदोष्णभानौ शयनं प्रयाते (भावकुतूहलम्,१२।१) । तथैव उपवेशनस्थः सूर्यः शुभत्वहीनो भवति । नेत्रपाणिस्थः सूर्यः शुभावहः । गमनावस्थायामागमनावस्थायां च सूर्यः शुभत्वं नैव प्रयच्छति । सभावस्थायामतिशुभावहः । आगमभोजनावस्थायां चाशुभः । नृत्यलिप्सावस्थायां सूर्यः शुभत्वकारको भवति । कौतुकावस्थायामपि शुभो दिवाकरः । निद्रास्थः सूर्यस्तु न शुभः ।

अपरमुदाहरणम्

| | |
|---|---|
| चन्द्रग्रहस्थितनक्षत्रसंख्या | = ६(आर्द्रा) |
| चन्द्रग्रहसंख्या | = २ |
| खेटांश-स्पष्टचन्द्रात्मक अंश_ | = १४ |
| इष्टघटी | = २२ |
| जन्मनक्षत्रसंख्या | = ६(आर्द्रा) |
| लग्नराशिसंख्या | = ३(मिथुनम्) |

अत्र सूत्रानसारे,

{(ग्रहस्थितनक्षत्रसंख्या×ग्रहसंख्या)×खेटांशसंख्या)+(इष्टघटी+जन्मनक्षत्रम्+लग्नराशिः)÷१२}

{(६×२)×१४)+(२२+६+३)÷१२}

{(१२×१४)+(२२+६+३)÷१२}

{(१६८+३१)÷१२}

{१९९÷१२}

७ शेषाः

अतश्चन्द्रमा, आगमनावस्थायां वर्तते। आगमनस्थश्चन्द्रः शुभत्वहीनो भवति।
अनया रीत्या अन्येषां भौमादिग्रहाणां शयनाद्यवस्था आनीयन्ते। अवस्थानुसारं फलं च प्राप्यते।

**ग्रहाणां प्रवासाद्यवस्थाः**

ग्रहाणां प्रवासाद्यवस्था द्वादशविधा भवन्ति। ताश्च प्रवासावस्था, नष्टावस्था, मृतावस्था, जयावस्था, हास्यावस्था, रत्यवस्था, मुदावस्था, सुप्तावस्था, भुक्तावस्था, ज्वरावस्था, कम्पावस्था, स्थिरावस्था च। यथा चोक्तम् - प्रवासनष्टा च मृता जया हास्या रतिर्मुदा। सुप्ता भुक्ता ज्वरा कम्पा सुस्थितिर्नामसन्निभा (भावकुतहलम्,पृ. १२७)। तस्य कृते ग्रहस्थितगतनक्षत्रसंख्या षष्टिभिर्गुणिता कार्या। तत्र पलात्मकं भयातं योजनीयम्। तद् योगफलं चतुर्भिर्गुणितं कार्यम्। पुनः तत्फलं पञ्चचत्वारिंशत्संख्याभिर्विभाजितं करणीयम्। शेषाः प्रवासाद्यवस्था भवन्ति। द्वादशाधिक्ये शेषे सति द्वादशभिर्भाजिते प्रवासाद्यवस्था भवन्ति। उक्तञ्च

षष्टिघ्नं गतभं भुक्तघटीयुतं युगाहतम्।

शराब्धिहृल्लब्धतोऽर्काच्छेशावस्था द्विजोत्तम (भावकुतहलम्,पृ. १२७)।

उदाहरणम् -

सूर्यग्रहाधिष्ठितनक्षत्रसंख्या = २१(उत्तराषाढा)

सूर्याधिष्ठितगतनक्षत्रसंख्या = २०(पूर्वाषाढा)

पलात्मकं भयातं = ४०।५०×६० = २४५०

अतः सूर्यग्रहप्रवासाद्यवस्था =

= ({((ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं)}×४)/४५

= ({(२०×६०)+२४५०}×४)/४५

= ({(१२००)+२४५०}×४)/४५

= ({(१२००)+२४५०}×४)/४५

=({(१२००)+२४५०}×४)/४५

=(३६५०×४)/४५

=१४६००/४५

४५) १४६००(३२४
- १३५
११०
-९०
२००
-१८०
२० शेषाः

अत्र द्वादशाधिक्ये शेषे पुनः द्वादशभिर्विभाजिते सति ८ शेषसंख्याः । तस्मात् प्रवासाद्यवस्थासु सूर्यः, अष्टमावस्थायां(सुप्तावस्थायां) वर्तते। ग्रहा अवस्थानुसारं फल प्रयच्छन्ति।

**ग्रहाणां लज्जिताद्यवस्था**

ग्रहाणां षड्विधाः लज्जिताद्यवस्था भवन्ति । ताश्च यथा - लज्जितावस्था, गर्वितावस्था, क्षुधितावस्था, तृषितावस्था, मुदितावस्था, क्षोभितावस्था च । कथितञ्च - लज्जितो गर्वितश्चैव धुधितस्तृषितस्तथा । मुदितः क्षोभितश्चैव ग्रहावस्थाः प्रकीर्तिताः(बृहत्पाराशरहोराशास्त्रम्,४७।२०)।

**लज्जितावस्था**

ग्रह पुत्रगृहे वर्तते अथवा सूर्य-भौम-शनैश्चर-राहु-केतुषु, एकस्मिन् पापयुते सति लज्जितो भवति। कथितञ्च - पुत्रगेहगतः खेटो राहुकेतुयुतोऽथवा। रविमन्दकुजैर्युक्तो लज्जितो ग्रह उच्यते(बृहत्पाराशरहोराशास्त्रम्,४७।२१)।

**गर्वितावस्था**

स्वोच्चराशौ वा मूलत्रिकोणराशौ स्थितो ग्रहो गर्वितो भवति। यथा चोक्तम् - तुङ्गस्थानगतो वापि त्रिकोणेऽपि भवेत्पुनः। गर्वितः सोऽपि गदितो निर्विशङ्कं द्विजोत्तम (बृहत्पाराशरहोराशास्त्रम्,४७।२२)।

**क्षुधितावस्था**

शत्रुराशौ स्थितः शत्रुयुतः शत्रुदृष्टो वा शनियुतो ग्रहः क्षुधितो भवति। यथोक्तम् - शत्रुगेही शत्रुयुतो रिपुदृष्टो भवेद्यदि। क्षुधितः स च विज्ञेयः शनियुक्तो यथा तथा( बृहत्पाराशरहोराशास्त्रम्,(४७।२३)।

**तृषितावस्था**

जलराशौ स्थितो ग्रहः शत्रुदृष्टो वर्तते, शुभग्रहदृष्टिरहितश्चास्ति चेत् तृषितो भवतीति पराशरमतमस्ति । यथा - जलराशौ स्थितः खेटः शत्रुणा चावलोकितः। शुभग्रहा न पश्यन्ति तृषितः स उदाहृतः ( बृहत्पाराशरहोराशास्त्रम्,४७।२४)।

मुदितावस्था

मित्रराशौ स्थितः, मित्रयुतः मित्रदृष्टः बृहस्पतियुतश्च ग्रहो मुदितो भवति । यथोक्तम्  -मित्रगेही मित्रयुक्तो मित्रेण च विलोकितः । गुरुणा सहितो यश्च मुदितः स प्रकीर्तितः(बृहत्पाराशरहोराशास्त्रम्,४७।२५) ।

**क्षोभितावस्था**

अस्तङ्गतो ग्रहः केवलं पापयुतः शत्रुदृष्टश्च वर्तते चेत् क्षोभितो भवति । उक्तञ्च - रविणा सहितो यश्च पापाः पश्यन्ति सर्वथा । क्षोभितं तं विजानीयाच्छत्रुणा यदि वीक्षितः (बृहत्पाराशरहोराशास्त्रम्,४७।२६) ।

स्पष्टज्ञानार्थं तालिका प्रस्तूयते

| अवस्थाः | लज्जितः | गर्वितः | क्षुधितः | तृषितः | मुदितः | क्षोभितः |
|---|---|---|---|---|---|---|
| अवस्थितिः | स्वपुत्रराशौ, पापग्रहयुतौ | स्वोच्चराशौ मूलत्रिकोणराशौ | शत्रुराशौ शत्रुयुतौ शनियुतौ | जलराशौ शत्रुदृष्टौ | मित्रराशौ मित्रयुतौ गुरुयुतौ | अस्तङ्गतौ पापयुतौ शत्रुयुतौ |

सर्वेषां ग्रहाणामवस्थाबोधकपूर्वकं कृतेन फलादेशेन वास्तविकं ज्ञानं भवति ।

**उदाहरणम्**

वि.सं. २०३९।०३।१० दिनाङ्कस्य प्रातः ४ :४५ प्रवादनकाले काष्ठमण्डपे जायमानस्य जातकस्य स्पष्टलग्न-ग्रहादयः

स्पष्टलग्नम् - २।४।४६।४५ - बालावस्थायाम् ।

| ग्रहाः | स्पष्टराश्यादयः | नक्षत्राणि | बालादयः | जाग्रदादयः | शयनादयः | लज्जितादयः | दीप्तादयः |
|---|---|---|---|---|---|---|---|
| रविः | २।८।१६।५७ | आर्द्रा-४ | कुमारः | जाग्रत् | प्रकाशनः | मुदितः,क्षुधितः | दीनो विकलः |
| सोमः | ३।१०।५८।२९ | तिष्य-३ | वृद्धः | जाग्रत् | उपवेशः | गर्वितः | स्वस्थः |
| कुजः | ५।१५।४७।२७ | हस्त-२ | युवा | सुषुप्तः | प्रकाशनः | क्षुधितः | दुःखितो विकलः |
| बुधः | १।१८।११।३ | रोहिणी-३ | कुमारः | स्वप्नः | नृत्यलिप्सा | मुदितः | शान्तः |
| गुरुः | ६।७।५७।३१ | स्वाती- १ | कुमारः | जाग्रत् | शयनम् | गर्वितः | दुःखितः |
| शुक्रः | १।५।४५।६ | कृत्तिका-३ | मृतः | जाग्रत् | प्रकाशनः | गर्वितः | स्वस्थः |
| शनिः | ५।२१।५५।४२ | हस्त-४ | कुमारः | सुषुप्तः | उपवेशः | क्षुधितः | शान्तो विकलः |
| राहुः | २।१९।४६।३७ | आर्द्रा-४ | वृद्धः | जाग्रत् | नृत्यलिप्सा | गर्वितो मुदितः | दीप्तः |
| केतुः | ८।१९।४६।३७ | पूषा-२ | वृद्धः | जाग्रत् | नृत्यलिप्सा | मुदितः | दीप्तः |

लग्नकुण्डली




नवमांशकुण्डली




जातको मिथुनलग्ने जातः । तल्लग्नञ्च बालावस्थायां वर्तते । अतः बालत्वलग्नप्रभावेण जातकः प्रमोदयुक्तः सुखी च भवितुमर्हति । जातके एतत्सर्वं दरीदृश्यते । लग्नस्थः सूर्यः कुमारावस्थायामस्ति । तस्य प्रभावेण जातकस्य प्रबला विद्याभिरुचिर्दृश्यते । सुशीलः सदाचारी चास्ति । चन्द्रो वृद्धावस्थायामस्ति । परन्तु स्वगृहस्थः सन् स्वस्थो वर्तते । कल्याणवर्मणो मते तु स्वराशिस्थो ग्रहो बालो भवति । तस्यैव प्रभावेण जातकः सुसन्तुष्टः सुखी च दृश्यते । एतेन कल्याणवर्मणो मतं व्यावहारिकं चानुभूयते । युवावस्थायां भौमो नृपत्वेन राजते । बुधः कुमारो लग्नाधिपश्चास्ति । तेन जातको ज्ञानगङ्गायां सदा स्नातको दृश्यते । विद्याभावे स्थितो बृहस्पतिरपि कुमारावस्थायां वर्तते । तस्य प्रभावेण विद्यापारङ्गतो जातकश्चरित्रनिर्माणसंस्थादिषु दत्तचित्तो दृश्यते । शुक्रो मृतावस्थायामस्ति । तेनापमानञ्जनयति । शनैश्चरोऽपि कुमारावस्थायां विराजते । सूर्यबुधगुरुवत्फलं भुञ्जानो दृश्यते जातकः । राहुकेतू वृद्धौ स्तः । तस्य प्रभावेण जातको भयान्वितो दृश्यते ।

तथैव जाग्रदाद्यवस्थायां सूर्य जागरुको दृश्यते । अतः सूर्यः जातकाय स्वस्य पूर्णं फलं प्रयच्छति । चन्द्रोऽपि जाग्रदवस्थायां वर्तते धनभावे । अतो जातको धनाय सदा जागरुको दृश्यते । भौमस्तु सुषुप्तः सन् निष्फलत्वं जनयति । बुधः सुहृन्नवांशकेऽस्ति । अतः स्वप्नावस्थायां वर्तते । तस्मात् मध्यफलदो बुधः । गुरुः स्वनवमांशे वर्तते । अतः पञ्चमभावजन्यं फलं प्रयच्छति । तदेव दृश्यते च जातकस्य । शुक्रो जागरुको भूत्वा पूर्णं फलं प्रयच्छति । शनैश्चरः सुषुप्तः सन् निष्फलत्वं जनयति । राहुकेतू जागरुकौ सन्तौ पूर्णं फलं प्रयच्छन्तौ स्तः ।

शयनाद्यवस्थायां सूर्यः प्रकाशावस्थायां वर्तते । तस्य प्रभावेण जातकस्तेजस्वी भवति । चित्तेनोदारः, वित्तेन परिपूर्णः, वाण्या प्रवीणः, कर्मणा पुण्यशीलः, बलेन भीमतुल्यः, सौन्दर्येण कामदेवसमश्च भवतीति कथितमस्ति । यथा - उदारचित्तः परिपूर्णवित्तः सभासु वक्ता बहुपुण्यकर्ता । बहाबली सुन्दररूपशाली प्रकाशने जन्मनि पद्मिनीशे (भावकुतूहलम्, १२।४) । जातके एतत्सर्वं दृश्यते । चन्द्र उपवेशनावस्थायां द्वितीयभावे स्थितः सन् मौनत्वं साधयति । ऐश्वर्यञ्च जनयति । शुक्लपक्षस्य चन्द्रः सदैव शुभत्वकारको भवति । कृष्णपक्षस्य तु नैव शुभः । कथितञ्च- चन्द्रस्य द्वादशावस्था फलं शुक्लदले शुभम् । अशुभं कृष्णपक्षे तु विज्ञेयं गणकोत्तमैः( भावकुतूहलम्,११।७) । भौमोऽपि चतुर्थभावे प्रकाशनावस्थायामेव

वर्तते । तादृशो भौमो मानवृद्धिकारकः, सद्गुणप्रकाशकः सन् तिष्ठति । तस्य प्रभावेण राजकृपान्वितस्तेजस्वी च दृश्यते जातकः । परन्तु पञ्चमभावे सप्तमभावे च प्रकाशनावस्थायाः कुजः पत्नीपुत्राणां कृते नैव शुभः । उक्तं च - प्रकाशो गुणस्य प्रवासः प्रकाशे धराधीशभर्तुः सदा मानवृद्धिः । सुते भूसुते पुत्रकान्तावियोगो युते राहुणा दारुणो वा निपातः( भावकुतूहलम्, १२।२८) । बुधो नृत्यलिप्सावस्थायां वर्तते । अतः जातको नर्तनादिकार्ये समुद्युक्तो दृश्यते । तथैव धन-वाहन-सम्मानादिभिर्युक्तो मित्रमण्डितः पुत्रसेवितश्च भवति । कथितञ्च नृत्यलिप्सागते चन्द्रजे मानवो मानयानप्रवालव्रजैः संयुतः ( भावकुतूहलम्, १२।४५) । गुरुः शयनावस्थायां वर्तते । अतः शयानो गुरुरेकान्तप्रियं कारयति जातकम् । प्रकाशनावस्थायां स्थितः शुक्रः प्रकाशयुक्तं कारयति । स्वगृहस्थः स्वोच्चराशिस्थो मित्रगृहस्थः शुक्रो जातकं सोल्लासयुक्तं सदानन्दसमन्वितं कारयति । तथैव ऐश्यर्यसम्पन्नं काव्यकलापारङ्गतं गीतसङ्गीतप्रावीण्यं च प्रकाशशीलः शुक्रः कारयति । यथोक्तम् - स्वालये तुङ्गभे मित्रभे भार्गवे तुङ्गमातङ्गलीलाकलापी जनः । भूपतेस्तुल्य एवं प्रकाशं गते काव्यलविद्याकलाकौतुकी गीतवित् (भावकुतूहलम्, १२।६२) । उपवेशनावस्थायां स्थितः शनैश्चरो कुत्रापि न चरति । केवलमुषित्वा चिन्तनशीलो भवति जातकस्तस्य प्रभावेण । राहुर्नृत्यलिप्सावस्थायामस्ति । केतुरपि तदेवावस्थायां वर्तते । तस्य प्रभावेण जातको गीत-सङ्गीतादिकार्ये समुत्सुको दृश्यते ।

लज्जिताद्यवस्थायां तु सूर्यो मुदितः क्षुधितः च वर्तते । मुदितः सूर्यो मित्रमण्डलीमण्डितं, पुत्रसुखान्वितं, धर्मपरायणं, विविधरत्नविभूषितं दैवज्ञपङ्क्तौ कनिष्ठिकिधिष्ठतं च कारयति जातकम् । कथितं च - हर्षिते भवति हर्षितः सदा मित्रपुत्रपरिपूरितो मुदा । धर्मकृन्मणिगणेन मण्डितः पण्डितः परमदैवविज्जनः( भावकुतूहलम्,१३।७) । एतैर्जातको मुदितो वर्तते सदेति विज्ञायते । तथैव क्षुधितोऽर्थात् क्षुत्तृड्भ्यां पीडितश्च भवति । चन्द्रो गर्वितो वर्तते । तस्य प्रभावेण जातको मानेच्छुको दृश्यते । भौमो शत्रुराशौ शत्रुयुतः सन् क्षुधितो वर्तते । तेनैव कारणेन प्रायो बुभुक्षा बाधते जातकम् । बुधो मित्रस्य शुक्रस्य राशौ शुक्रेण सह विराजते । अतो मुदितावस्थायामस्ति । तस्य प्रभावेण मुखमण्डलं सदैव प्रमुदितो दृश्यते जातकस्य । गुरुर्वक्रगतित्वाच्छत्रुराशावपि गर्वितो भवति । कारणं शत्रुराशौ वक्री ग्रहः स्वोच्चराशितुल्यतां धत्ते । अतः प्रदीप्तः सन् धवलकीर्तिमन्तं, सर्वैश्वर्यपरिपूर्णं, तीर्थस्नातकं, वैरिविहीनं, सुखशान्तिशीलं च बृहस्पतिः कारयति । शुक्रोऽपि स्वगृहस्थः सन् स्वस्थः गर्वितो वर्तते । तस्य प्रभावेण जातकः रिपुमर्दनशीलः, अनेकनिकेतननिर्माता, उदारमना, सर्वश्रेष्ठः, यशस्वी, सुन्दरश्च भवति । उक्तं च - स्वस्थे गुणागारजयालयानामुपार्जको वैरिविनाशकर्ता । नरोऽप्युदारो नृपपूजितः स्याद् विशालकीर्तिः कमनीयमूर्तिः ( भावकुतूहलम्, १३।६) । शनैश्चरः क्षुधितो वर्तते । राहुकेतू गर्वितमुदितौ वर्तेते ।

जातकस्य ग्रहाणां प्रवासाद्यवस्थाज्ञानाय गणितस्यावश्यकता भवति ।

सूर्यस्थितगतनक्षत्रसंख्या = ५ ( मृगशीर्षम्)

पलात्मकं भयातम् = ३२।१४ = ३२×६०+१४ = १९३४

अतः सूर्यस्य प्रवासाद्यवस्था = ({(ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं}×४)/४५

= ({(५×६०)+१९३४}×४)/४५

= ८९३६ ÷ ४५

= २६ शेषसंख्याः

द्वादशाधिक्यात् १२ संख्याभिर्भाजिते सति शेषसंख्या २ । अतः शेषानुसारेण सूर्यो नष्टावस्थायां वर्तते ।

तथैव चन्द्रस्थितगतनक्षत्रसं. = ७(पुनर्वसुः)

पलात्मकं भयातं = १९३४

अतः चन्द्रस्य प्रवासाद्यवस्था = = ({(ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं}×४)/४५

= ({(७×६०)+१९३४}×४)/४५

= ९४१६ ÷ ४५

= ११ शेषसंख्याः। ११ शेषत्वात् कम्पावस्थायां चन्द्रो वर्तते।

भौमस्थितगतनक्षत्रसं. = १२( उत्तराफाल्गुनी)

पलात्मकं भयातं = १९३४

अतः भौमस्य प्रवासाद्यवस्था = ({(ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं}×४)/४५

= ({(१२×६०)+१९३४}×४)/४५

= १०६१६ ÷ ४५

= ४१ शेषसंख्याः। ५ शेषत्वात् हास्यावस्थायां भौमो वर्तते।

बुधस्थितगतनक्षत्रसंख्या = ३(कृत्तिका)

पलात्मकं भयातम् = १९३४

अतो बुधस्य प्रवासाद्यवस्थाः

= ({(ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं}×४)/४५

= ({(३×६०)+१९३४}×४)/४५

= ८४५६ ÷ ४५

= ४१ शेषसंख्याः। ५ शेषत्वात् हास्यावस्थायां बुधो वर्तते।

गुरुग्रहस्थितगतनक्षत्रसंख्या = १४ (चित्रा)

पलात्मकं भयातम् = १९३४

= ({(ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं}×४)/४५

= ({(१४×६०)+१९३४}×४)/४५

= ११०९६ ÷ ४५

= २ शेषौ। २ शेषत्वात् नष्टावस्थायां गुरुर्वर्तते।

शुक्रग्रहस्थितगतनक्षत्रसंख्या = २ (भरणी)

पलात्मकं भयातम् = १९३४

= ({(ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं}×४)/४५

= ({(२×६०)+१९३४}×४)/४५

= ८६१६ ÷ ४५

= २ शेषौ। २ शेषत्वात् नष्टावस्थायां शुक्रो वर्तते ।

शनिग्रहस्थितगतनक्षत्रसंख्या = १२ (उत्तराफाल्गुनी)

भौमवत् शनैश्चरोऽपि हास्यावस्थायां वर्तते।

राहुग्रहस्थितगतनक्षत्रसंख्या = ५ (मृगशीर्षम्)

पलात्मकं भयातम् = १९३४

राहुरपि सूर्यवत् नष्टावस्थायां वर्तते।

केतुग्रहस्थितगतनक्षत्रसंख्या = १९ (मूलम्)

पलात्मकं भयातम् = १९३४

= ({(ग्रहस्थितगतनक्षत्रसंख्या×६०)+पलात्मकं भयातं}×४)/४५

= ({(१९×६०)+१९३४}×४)/४५

= १२२९६ ÷ ४५

= ११ शेषाः। ११ शेषत्वात् कम्पावस्थायां केतुर्वर्तते।

जातकस्य प्रवासाद्यवस्थाबोधकज्ञानं तालिकायां प्रस्तूयते -

| ग्रहाः | सूर्यः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्र | शनिः | राहुः | केतुः |
|---|---|---|---|---|---|---|---|---|---|
| प्रवासाद्यवस्थाः | नष्टः | कम्पः | हास्यः | हास्यः | नष्टः | नष्टः | हास्यः | नष्टः | कम्पः |

सर्वेषां ग्रहाणां प्रवासाद्यवस्थाजन्यानि सर्वाणि फलानि जातकेऽनेनानुसन्धात्रानुभूयन्ते।

**निष्कर्षः**

सूर्यादिनवग्रहाः कस्यामवस्थायां कुत्र सन्तः फलं प्रयच्छन्तः सन्तीति ज्ञानं सर्वैर्ज्योतिर्विद्भिः सम्यक्करणीयम्। जातकस्य जन्मकुण्डलीदर्शनप्रसङ्गे पञ्चमभावे मेषराशिस्थः सूर्यो वर्तते। अतो जातकस्य विद्याक्षेत्रं सन्ततिक्षेत्रं च प्राबल्यं दरीदृश्यते। कारणं तु मेषस्थः सूर्यः समुच्चो भवतीति कथनपूर्वकं कृतेन फलादेशेन दैवज्ञो नैव विज्ञत्वं जनयति। उच्चस्थः सूर्यस्तु दीप्तो भवति। अन्यासु चतसृष्ववस्थासु बलहीनो वर्तते। अन्यासु सर्वासु कुण्डलीषु नीचो वर्तते चेत् सन्ततिविद्यापक्षयोः कथितं समग्रं फलं नैव प्राप्नोति जातकः। अर्थात् बालाद्यवस्थायां मृतो वा बालो वर्तते चेत् सूर्यः शुभत्वाधायको नैव भवति। लग्नकुण्डल्यां समुच्चः सूर्यो नवांशकुण्डल्यां नीचो वर्तते चेत् सुप्तावस्थायामेति ग्रहः। तेन च फल्गुफलं जनयति। तेनैव प्रकारेण शयनाद्यवस्थानां, लज्जिताद्यवस्थानां प्रवासाद्यवस्थानां च सुसूक्ष्मचिन्तनं परमावश्यकम्। तस्मात् ग्रहाणां सर्वासामवस्थानां परिशीलनं कृत्वा कुण्डलीदर्शनं क्रियते चेत् फलादेशे साफल्यमधिगच्छन्ति दैवज्ञाः। नोचेत् नक्षत्रसूचीपङ्क्तौ उषित्वा महर्षिप्रणीतानि होराशास्त्राणि दूषयन्ति, अपयशोभागिनश्च भवन्ति। अतः ग्रहाणामंशाधारेण समविषमराश्याधारेण बालाद्यवस्थानां, स्वोच्चराशि - स्वराशि - मित्र - शुभ - सम - पाप - नीचराश्यादीनामाधारेण दीप्ताद्यवस्थानां, स्वोच्चांश - स्वांश - सुहृदंश - नीचांशादीनां समीक्षणेन जाग्रदाद्यवस्थानां स्पष्टांशादीनामाधारेण

शयनाद्यवस्थादीनां, ग्रहस्थितनक्षत्राधारेण प्रवासाद्यवस्थानां तथैव लज्जिताद्यवस्थानां च सम्यक् समीक्षणं परमावश्यकम्। समेषां ग्रहाणां सर्वाषां खल्ववस्थानां सुसूक्ष्मरूपेण परिचिन्तनं कर्तव्यम्। तेन चिन्तनलोचनेन फलादेशो विधीयते चेद् दैवज्ञो देववत् पूज्यो भवति सर्वत्र। ज्योतिषशास्त्ररहस्यमर्मज्ञो भवति। त्रिकालदर्शी च भूत्वा न केवलं जनस्यापि तु समग्रस्य राष्ट्रस्य निखिलस्य ब्रह्माण्डस्य संरक्षणायोद्युक्तो भवति। तेनैव कर्मणा स्वस्य च मानवजन्म साफल्यं मनुते। स्वयमपि कृतकृत्यो भवति।

**सन्दर्भसामग्रीसूची**

आचार्यमुकुन्ददैवज्ञः, (सन् २०२२), भावमञ्जरी, नई दिल्ली : रञ्जन पब्लिकेशन्स।

आलोकः, (वर्षः १, अङ्कः २ , कार्तिक-मंसिर २०७५), काठमाडौ : नेपाल प्रगतिशील प्राध्यापक सङ्गठन, वाल्मीकि विद्यापीठ समिति।

जीवनाथः, (सन् २०१३), भावकुतूहलम्, वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।

पाठकः,महादेवः, (सन् २०२२), जातकतत्त्वम्, नई दिल्ली : रञ्जन पब्लिकेशन्स।

मर्यादा,(वर्ष १, अङ्क १, २०७८),काठमाडौ : नेपालसंस्कृतविश्वविद्यालयः,वाल्मीकि विद्यापीठम्।

महर्षिः, पराशरः, (सन् २०१७), बृहत्पाराशरहोराशास्त्रम्, वाराणसी : चौखम्बाकृष्णदास अकादमी।

वर्मा, कल्याण,(सन् २००५), सारावली, वाराणसी : चौखम्बाकृष्णदास अकादमी।

वैद्यनाथः(सन् २००६), जातकपारिजातः, वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।

शर्मा, वेंकटेशः, (सन् २०२४), सर्वार्थचिन्तामणिः, नई दिल्ली : रञ्जन पब्लिकेशन्स ।

शोधः,(वर्ष ६, अङ्क २, वैशाखः २०७५), काठमाडौ : नेपालसंस्कृतविश्वविद्यालय प्राध्यापकसंङ्घ।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**ज्योतिषशास्त्रे गण्डान्तदोषः**

ईश्वर न्यौपाने
उपप्राध्यापकः
शारदाविद्यापीठम्, महेन्द्रनगरम्
Gmail: neu.ishwor@gmail.com

DOI:

**शोधसारः**

जातकस्य जन्मकालो यदि गण्डान्तदोषयुतो भवति, तर्हि तस्य शान्तिः अवश्यं कार्या। गण्डान्तदोषपरिहाराभावे तु तेन जातकेन विहितं किमपि कर्म तु सफलं नैव भवति। तथा च रोगशोकधनहानिविघ्नबाधाप्रभृतिसमस्यया स जातको मरणासन्नावस्थायां प्राप्नोति। यदि जातकस्य जन्मसमये गण्डान्तदोषः अस्ति चेत् कुण्डलीप्रदर्शनं फलादेशकरणञ्च निरर्थकं जायते। तस्मात् कारणात् गण्डान्तदोषेण युक्तस्य जातकस्य गण्डान्तदोषशान्तिः अपरिहार्या भवति। यदि शान्तिकार्यं न क्रियते, तर्हि तस्य जातकस्य मातुः, पितुः, भ्रातुः धनादीनां च नाशेन साकं स्वस्य च विनाशो भवति। तस्य गण्डान्तदोषस्य शान्तिः क्रियते चेद् दोषाणां परिहारो भवति। दोषाणां परिहारानन्तरं तस्य जीवने साफल्यं भवति। नानामुनीनां मतानुसारं गण्डान्तदोषेण दुष्टे काले जातो जातकः शान्तिकर्मणा विना गृहे न स्थापनीयः, स तु त्याज्य एव। शान्तिकर्मणि विहिते सति दोषनिवृत्त्या स अष्टाभ्यो वर्षेभ्यः अनन्तरं स गृहे स्थापयितुं शक्यते। गण्डान्तदोषः नक्षत्रदोषः, राशिदोषः, लग्नदोषश्चेति त्रिविधो वर्तते। मूलज्येष्ठयोः, अश्लेषामघयोः, रेवत्यश्विन्योश्च सन्धिकालो विशेषेण गण्डान्तः कथ्यते। अस्मिन् काले जातो जातको दोषभाग् भवति। एतेषां नक्षत्राणां गण्डान्तकाले यदि जन्म भवति तर्हि जातकस्य पितृमात्रादीनां हानिः भवति। शान्तिकर्मणि विहिते सति तस्य जातकस्य पूर्वार्धजीवनं यद्यपि किञ्चित्काठिन्यने युतं भवति, तथापि जीवनस्य उत्तरार्धकालस्तु तस्य सुखमयः सफलश्च जायते। गण्डान्तस्य फलं जातकस्य दशाकुण्डलीयोगेभ्यः पृथग् वर्तते।

**शब्दबीजानि -** गण्डान्तः, ऋक्षसन्धिः, तपस्यः, ग्रहचक्रम्, सार्पः, पित्र्यः, अभुक्तः।

**विषयनिवेशः**

“ज्योतिषं वेदचक्षुः” इति छान्दोग्योपनिषदो वाक्यं महान्तम् अर्थं बिभर्ति, यतो हि कालनिर्णयः, ग्रहाणां स्थित्यादेः निर्णयः, नक्षत्राणां विचारश्च अस्य माध्यमेन एव सम्भवति। वैदिकानां कर्मणां यज्ञादीनां च सम्पादनाय शुभाशुभकालस्य निर्णयः, ग्रहणादीनां दैवानां सङ्केतानां विवेचनम्, मानवानां जन्मकुण्डल्याः विमर्शः, तदाधारेण जातकस्य गुणानां दोषाणां च विवेचनं ज्योतिषशास्त्रस्य मुख्याः विषयाः वर्तन्ते। जगति ईश्वरं विहाय गुणैः दोषैः च रहितं वस्तु किमपि नास्ति। तेन मनुष्यः अपि सगुणः सदोषश्च भवति। ज्योतिषशास्त्रे विविधानां गुणानां दोषाणां च विषये विवेचनं प्राप्यते। दैवज्ञाः गुणानां दोषाणां च ज्ञानं कुर्वन्ति। गुणानां ज्ञानेन तेषां परिवर्धने दोषाणां ज्ञानेन तेषां परिहरणे च दैवज्ञाः जातकान् निर्दिशन्ति। दोषाणां परिहारेण विना जातकाः समुन्नतिं कर्तुं न पारयन्ते, दोषाणां ज्ञानेन विना च तेषां परिहारो न सम्भवति। अतो ज्योतिषशास्त्रे

विविधा दोषाः निरूपिताः सन्ति । तेषु दोषेषु गण्डान्तदोषः अपि अन्यतमो वर्तते । ज्योतिषशास्त्रे गण्डान्तदोषो नक्षत्राणां राशीनां लग्नानां च आधारेण बहुविधाः वर्तन्ते । तेषां दोषाणां शुभानाम् अशुभानां च फलानां विषये बहुत्र चर्चा लभ्यते । अयम् अनुसन्धानात्मकः आलेखो तस्मिन् एव गण्डान्तदोषे केन्द्रितो वर्तते । अत्र आलेखे गण्डान्तदोषः कथं भवति ? स कुत्र भवति ? गण्डान्तदोषस्य प्रभावः कीदृशः ? इत्यादयो विषयाः उपस्थापिताः सन्ति । सम्यग् विचारेण अत्र गण्डान्तदोषस्य विषये विविधैः मुनिभिः प्रोक्ताः विचाराः विमृष्टाः विद्यन्ते । नैकविधानां दैवज्ञानां मुनीनां मतानां समीक्षणपुरःसरम् अत्र तेषां विश्लेषणेन निष्कर्ष उपस्थापितो वर्तते ।

**समस्याकथनम्**

वैदिकानां कर्मणां यज्ञादीनां च सम्पादनाय शुभाशुभकालस्य निर्णयः, ग्रहणादीनां दैवानां सङ्केतानां विवेचनम्, मानवानां जन्मकुण्डल्याः विमर्शः, तदाधारेण जातकस्य गुणानां दोषाणां च विवेचनं ज्योतिषशास्त्रस्य मुख्याः विषयाः वर्तन्ते । तदर्थं ग्रहाणां गतिस्थित्यादिवशात् ज्योतिषशास्त्रे विविधदोषाः निरूपिताः सन्ति । तेषु दोषेषु अन्यतमस्य गण्डान्तदोषस्य विषये सविमर्शम् अध्ययनं विविधैः शास्त्रैः विहितं वर्तते । तस्य दोषस्य चर्चा अनेकविधेषु ग्रन्थेषु प्राचीनैः नव्यैश्च दैवज्ञैः मुनिभिः कृता लभ्यते । अस्मिन् अध्ययने तस्य गण्डान्तदोषस्य एव विषये विविधानां दैवज्ञानां मतसमीक्षणेन साकम् अध्ययनं कृतम् अस्ति । गण्डान्तदोषस्य परिहारः किमर्थम् आवश्यकः इत्येव विषयः अस्य अध्ययनस्य प्रमुखा समस्या विद्यते । तामेव समस्याम् पुरस्कृत्य अत्र समाधेयत्वेन निम्ने समस्ये उद्भाविते स्तः । अत्र विशेषेण अनयोः समस्ययोः एव सामाधार्थं यत्नो विहितो विद्यते –

क) ज्योतिषशास्त्रे गण्डान्तदोषस्य स्वरूपं कीदृशं निरूपितम् अस्ति ?

ख) ज्योतिषशास्त्रे गण्डान्तदोषस्य गुणाः दोषाश्च कथं निरूपिताः सन्ति ?

**उद्देश्यम्**

जन्मकालस्य अवस्थाम् आधृत्य मनुष्यः सगुणः सदोषश्च भवति । ज्योतिषशास्त्रे विविधानां गुणानां दोषाणां च विषये विवेचनं प्राप्यते । दैवज्ञाः गुणानां दोषाणां च ज्ञानं कुर्वन्ति । गुणानां ज्ञानेन तेषां परिवर्धने दोषाणां ज्ञानेन तेषां परिहरणे च दैवज्ञाः जातकान् निर्दिशन्ति । दोषाणां परिहारेण विना जातकाः समुन्नतिं कर्तुं न पारयन्ते, दोषाणां ज्ञानेन विना च तेषां परिहारो न सम्भवति । अतो ज्योतिषशास्त्रे विविधा दोषाः निरूपिताः सन्ति । तेषु दोषेषु गण्डान्तदोषः अपि अन्यतमो वर्तते । ज्योतिषशास्त्रे अयं दोषः नैकैः विद्वद्भिः दैवज्ञैः चर्चितो वर्तते । अयम् एव गण्डान्तदोषः अस्य अनुसन्धानात्मकस्य आलेखस्य विषयो वर्तते । सपरिचयं गण्डान्तदोषस्य परिहारं विषयीकृत्य उद्भावितयोः समस्ययोः आधारेण अत्र समाधेयत्वेन निम्ने द्वे उद्देश्ये उपस्थापिते स्तः ।

क) ज्योतिषशास्त्रे गण्डान्तदोषस्य स्वरूपनिर्धारणम्,

ख) ज्योतिषशास्त्रे गण्डान्तदोषस्य गुणदोषनिरूपणम् ।

**सीमा**

ज्योतिषशास्त्रस्य क्षेत्रं विपुलम् अस्ति। अस्मिन् शास्त्रे ग्रहाणाम्, नक्षत्राणाम्, तारकाणाम्, खगोलस्य, भूगोलस्य, गणितस्य, व्यावहारिकजीवनस्य च समग्रम् अध्ययनं भवति । कालनिर्णयः, ग्रहाणां स्थित्यादेः निर्णयः, नक्षत्राणां विचारश्च अस्य शास्त्रस्य माध्यमेन एव सम्भवति। वैदिकानां कर्मणां यज्ञादीनां च सम्पादनाय शुभाशुभकालस्य निर्णयः, ग्रहणादीनां दैवानां सङ्केतानां विवेचनम्, मानवानां जन्मकुण्डल्याः विमर्शः, तदाधारेण जातकस्य गुणानां दोषाणां च विवेचनं ज्योतिषशास्त्रस्य मुख्याः विषयाः वर्तन्ते । जातकस्य जीवनं जन्मकालिकानां ग्रहाणां गतिस्थित्यादीनां वशात् निर्दिष्टं भवति । तत्र ग्रहाणां गतिस्थित्यादिकम् आधृत्य विविधा योगाः, अनेके गुणाः, नैके दोषाश्च सम्भवन्ति। दोषाणां परिहारपूर्वकं जीवनस्य समुन्नतये दोषाणां ज्ञानं नितराम् आवश्यकं भवति। तादृशेषु दोषेषु गण्डान्तदोषः अपि अन्यतमो विद्यते। अस्य दोषस्य विषये विविधैः विद्वद्भिः विविधेषु ग्रन्थेषु विविधानि मतानि प्रस्तुतानि सन्ति। अत्र अस्मिन् अनुसन्धानात्मके आलेखे गण्डान्तदोषस्य विषये एव दैवज्ञानां मुनीनां मतानि आलोडितानि सन्ति। अन्ये दोषाः अत्र विषयीकृताः न सन्ति। अयम् एव अस्य अध्ययनस्य सीमा वर्तते।

**अध्ययनविधिः**

दैवज्ञाः जन्मकाले ग्रहादीनां गतिस्थित्यादिकं विचार्य विविधानां योगानां गुणानां दोषाणां च विवेचनं कुर्वन्ति। गुणानां ज्ञानेन तेषां परिवर्धने दोषाणां ज्ञानेन तेषां परिहरणे च दैवज्ञाः जातकान् निर्दिशन्ति। दोषाणां परिहारेण विना जातकाः समुन्नतिं कर्तुं न पारयन्ते, दोषाणां ज्ञानेन विना च तेषां परिहारो न सम्भवति । अतो ज्योतिषशास्त्रे विविधा दोषाः निरूपिताः सन्ति। तेषु दोषेषु गण्डान्तदोषः अपि अन्यतमो वर्तते। अयम् आलेखः तस्य एव गण्डान्तदोषस्य विषये विद्वद्भिः उपस्थापितानां मतानां समालोचनपरं विद्यते । गण्डान्तदोषस्य निर्णये अनेकानां दैवज्ञानां मुनीनाञ्च सम्बद्धज्योतिषग्रन्थानाम् अध्ययनं विहितं विद्यते। अस्य आलेखस्य कृते गण्डान्तदोषस्य विषये अध्ययनार्थं सामग्रीणाम् एकीकरणाय पुस्तकालयविधिः प्रयुक्तो विद्यते। पुस्तकालयविधेः प्रयोगे च भौतिकेन पुस्तकालयेन साकं साञ्जालिकस्य पुस्तकालयस्य अपि उपयोगः अत्र विहितः अस्ति। तदनु विविधानां विदुषां मतसमीक्षणे च अत्र प्रायेण तुलनात्मकविधः प्रयुक्तो विद्यते। एकीकृतानां सामग्रीणाम् आधारेण निष्कर्षणं च पुनः अत्र विश्लेषणविधिना कृतम् अस्ति । अत्रोक्तयोः समस्ययोः समाधानार्थम् एभिः एव विधिभिः यत्नो विहितो वर्तते । वस्तुतः अस्मिन् आलेखे अभीष्टसिद्धये वर्णनात्मक-विश्लेषणात्मकविधिः प्रयुक्तः अस्ति । तदनु एव सामग्रीणां सत्यापनद्वारा निष्कर्षणं विहितं विद्यते।

**गण्डान्तदोषविमर्शः**

ज्योतिषशास्त्रे गण्डान्तदोषो विशेषदोषो वर्तते । गण्ड इत्यनेन नक्षत्रान्तम्, अन्त इत्यनेन च समीपप्रदेशः सङ्केत्यते । यदा जातकः आश्लेषामघयोः, ज्येष्ठामूलयोः, रेवत्यश्विन्योः वा नक्षत्रयोः सन्धिकाले, विशेषतया उक्तयोः द्वन्द्वयोः मध्ये प्राक्तनस्य नक्षत्रस्य अन्त्यांशे पश्चात्तनस्य च आद्यांशे जन्म लभते तदा गण्डान्तदोषः सम्भवति । ज्योतिर्विदाम् अनुसारेण कर्कटः, वृश्चिकः, मीनश्चेति राशयो जलराशयः सन्ति चेत् सिंहः, धनुः, मेषश्चेति राशयः अग्निराशयो वर्तन्ते। ग्रहचक्रे जलराशीनाम् अन्त्यांशाद् अग्निराशीनां आद्यांशे चन्द्रमसः सङ्क्रमणं गण्डपदेन अभिधीयते । अस्यां सङ्क्रमणावस्थायां जन्मनि

काठिन्यम्, अशान्तिः, जन्मसमये क्लेशः, मातृदुःखम्, शिशोः भयादिकं च आचार्यैः निर्दिष्टं वर्तते । एनं विषयम् आधारीकृत्य ज्योतिर्विदा ऋषिणा पराशरेण उक्तम् अस्ति यत्-

गण्डान्ते जातमशुभं, मातृदुःखं भयादिकम्।
शान्तिकर्मप्रभावेन न्यूनं स्यादिति निश्चितम्॥ (बृहत्पाराशरहोरात्रशास्त्रम्)

पराशरस्य अनुसारेण गण्डान्तस्य समये जनिं लब्धवतो जातकस्य शुभतां सम्पादयितुं तद्दोषान् निवारयितुं च शान्तिकर्मणः आवश्यकता भवति । शास्त्रोक्तेन विधिना शान्तिकर्मणि विहिते शुद्धव्यवहारेण दोषजनितानि फलानि दूरीभवन्ति । तथा च अस्माभिः ज्ञातव्यमस्ति यत्, ज्योतिषं न केवलं ग्रहगणितं, किन्तु जीवनस्य रक्षार्थं मार्गदर्शिका विद्या अपि विद्यते । तत्र जातकस्य दोषाणां प्रशमनम्, जीवने सौख्यानां प्राप्तिः, अलौकिकी समृद्धिश्च ज्योतिषशास्त्रम् अनुसृत्य शान्तिकर्मणां विधानेन सम्भवति । अतो जन्मकालवशात् सम्प्राप्तान् दोषान् विचिन्त्य जनैः दुखिभिः न भाव्यम्, अपि तु तैः ज्योतिषशास्त्रे समुल्लिखितानां शान्तिकर्मणाम्, दोषपरिहारेण सम्बद्धानाम् उपायानां च सज्ञानं विधिपूर्वकम् अनुष्ठानम् अनुष्ठेयम् । एवं विधाने सति दोषा दुष्टतां परिवर्ज्य गुणतां यान्ति इति मुनीनाम् अभिमतं वर्तते।

अश्लेषाया अन्ते वर्तमानं कर्कटान्तं घटिकार्धम्, ज्येष्ठाया अन्ते वर्तमानं वृश्चिकान्तं घटिकार्धम्, रेवत्याः अन्ते वर्तमानं मीनान्तं घटिकार्धम्, अश्विन्याः आदौ वर्तमानं मेषादि घटिकार्धम्, मघायाः आदौ वर्तमानं सिंहादि घटिकार्म्, मूलस्य आदौ वर्तमानं धनादि घटिकार्धं च गण्डान्तपदेन अभिधीयते। उक्तं च मुहूर्तचिन्तामणौ-

ज्येष्ठापौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनी-
पित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम्॥ (मुहूर्तचिन्तामणिः ६/४३)

विशेषतः जातकस्य जन्मकाले उक्तानां नक्षत्राणाम् अन्ते आद्ये च समये तथा तन्नक्षत्रस्य राशौ तथा तस्य राशेः लग्ने च बालकस्य जन्म भवति चेत् तदा जातकगण्डान्तो भवति । यदा जातकस्य जन्म गण्डान्तयुक्ते काले भवति तदा शास्त्रोक्तं विधिम् अनुसृत्य गण्डान्तदोषशान्तेः कर्म करणीयम्। तत्र नामकरणदिने बालकस्य गण्डान्तदोषस्य शान्तेः संस्कारः क्रियते। अयं संस्कारो नामकरणसंस्कारेण सहैव विधीयते। जातकस्य जन्मकालो नक्षत्रगण्डान्तस्य दोषेण युक्तो वर्तते चेत् जातकस्य जीवनं क्लेशयुक्तम्, सन्तापयुक्तम् तथा मृत्युदञ्च भवति । तस्य जातकस्य जीवनस्य पूर्वार्धं कष्टदं भवति परम् उत्तरार्धं धनधान्यैश्वर्ययुतं तथा सफलं च भवति। नारदमतानुसारेण मूलनक्षत्रस्य गण्डान्तकाले समुत्पन्नो जातकः कुलध्वंसको भवति, प्रायेण स्वयं च न जीवति। यदि जीवेत्, तर्हि स लब्धप्रतिष्ठः, धनी, ज्ञानी, मानी च भवति।

यत्र नक्षत्रेण सह राशेः अपि युगपद् अवसानं भवति, तत्र गण्डान्तो जायते । अतो गण्डान्तः ऋक्षसन्धिरपि कथ्यते । तत्र लग्नगण्डान्तः, नक्षत्रगण्डान्तः, तिथिगण्डान्तश्चेति गण्डान्तः त्रिविधः भवति । लग्नगण्डान्तः यथा – 'शशिभवनालिझषान्तमृक्षसन्धिः (जातकपारिजातः ९/५९)' इति । अश्लेषाया अन्ते कर्कटस्य, ज्येष्ठाया अन्ते वृश्चिकस्य, रेवत्यन्ते च मीनस्य चान्तो लग्नगण्डान्ते भवति । अतो मीनवृश्चिककर्कटानां अन्त्यकालिकं घटिकार्धम्, मेषसिंहधनुषां च आद्यकालिकं घटिकार्धं च गण्डान्तः मन्यते। जन्मसमये सः गण्डान्तः त्याज्यो भवति। यथोक्तम् –

मीनवृश्चिककर्कान्ते घटिकार्धं परित्यजेत्।
आदौ मेषस्य चापस्य सिंहस्य घटिकार्धकम्॥ (मुहूर्तचिन्तामणिः)

पुनः ज्येष्ठाश्लेषारेवतीनाम् अन्त्यकालिकं घटिकाद्वयम्, मूलमघाश्विनीनां च आद्यकालिकं घटिकाद्वयं चेति घटीचतुष्टयं

नक्षत्रगण्डान्त इत्युच्यते। स समयः अधिकम् अनिष्टप्रदो भवति। ज्येष्ठान्त्यमूलादिभवं घटिकैकम् अभुक्तमूलसंज्ञकं भवति। अभुक्तमूलस्य समयस्य विषये विदुषां मतैक्यं न दृश्यते। नारदो ज्येष्ठाया अन्त्यकालिकं घटीचतुष्टयं मूलस्य आदिकालिकं घटीचतुष्टयं च अभुक्तमूलं कथयति। वशिष्ठो ज्येष्ठाया अन्त्यकालिकं घटिकैकम्, मूलस्य आदिकालिकं घटीद्वयं च अभुक्तमूलत्वेन गृह्णाति। बृहस्पतिस्तु ज्येष्ठाया अन्त्यकालिकं घटिकैकम्, मूलस्य आदिकालिकं घटिकैकं च अभुक्तमूलं निगदति। अन्ये मूलस्य आद्यं घटिकाष्टकम्, ज्येष्ठायाः अन्त्यं घटिकापञ्चकं अभुक्तमूलं मन्वते। अभुक्तमूले यो जायते, स पित्रा त्याज्यो भवति उत अष्टौ वर्षाणि यावत् पित्रा तस्य मुखं न दर्शनीयं भवति। अत्र विदुषां मतसमाहारं कुर्वता रामदैवज्ञेन कथितम् अस्ति-

> अभुक्तमूलं घटिकाचतुष्टयं ज्येष्ठान्त्यमूलादिभवं हि नारदः।
> वशिष्ठ एकद्विघटीमितं जगौ बृहस्पतिस्त्वेक घटीप्रमाणकम्॥
> अथोचुरन्ये प्रथमाष्टघट्यो मूलस्य शाक्रान्तिमपञ्चनाड्यः।
> जातं शिशुं तत्र परित्यजेद् वा मुखं पितास्याष्टसमा न पश्येत्॥ (मुहूर्तचिन्तामणिः २/५३-५४)

अस्मिन् अभुक्तमूलगण्डान्ते जाताः पुत्र्यः, पुत्राः, भृत्याः, पशवो वा यस्मिने कुले जायन्ते, तस्य कुलस्य ध्वंसं कुर्वन्तीति जातकपारिजातकार एवं निगदति-

> ज्येष्ठादानवतारसन्धिघटिका चाभुक्तसंज्ञा भवेत्।
> तन्नाडीप्रभवाङ्गनासुतपशुप्रेष्याः कुलध्वंसकाः॥ (जातकपारिजातः ९/४५)

अश्लेषानक्षत्रस्य गण्डत्वागण्डत्वविषये दैवज्ञवैद्यनाथेन निगदितमस्ति-

> आश्लेषाद्ये न गण्डं स्याद् धनगण्डं द्वितीयके।
> तृतीये मातृगण्डं तु पितृगण्डं चतुर्थके॥ (जातकपारिजातः ९/५६)

अश्लेषानक्षत्रस्य प्रथमे चरणे गण्डं न भवति, तेन तस्य प्रथमपादे जननं शुभं सम्पद्यते। अश्लेषायाः द्वितीयचरणे धनगण्डं भवति। तत्र जन्म धननाशकरं सम्पद्यते। अश्लेषायाः तृतीये चरणे मातृगण्डं जायते। तत्र जन्मनि मातुः विनाशः सम्भवति। चतुर्थे चरणे पितृगण्डं सम्पद्यते। तत्र जन्मनि जातकस्य पिता नाशम् उपैति।

जातकपारिजातकारस्य टीकाकृता पण्डितेन कपिलेश्वरशास्त्रिणा स्वटीकायाम् अश्लेषायां जन्मनः फलं पुनरेवं प्रतिपादितं विद्यते- 'सार्पाद्ये प्रथमे राज्यं द्वितीये तु धनक्षयः, तृतीये जननीनाशश्चतुर्थे मरणं पितुः (दैवज्ञवैद्यनाथः वि.सं. २०३६, पृ. २९९)' इति। अत्र टीकाकृता ग्रन्थकारस्य मतात् केवलं प्रथमपादे एव मतभेदो निरूपितो वर्तते। ग्रन्थकारः प्रथमे गण्डं न पश्यति, परं टीकाकृत् प्रथमे पादे राज्यगण्डं पश्यति। द्वितीयादिपादानां तु फलम् उभयोः मते समान् एव दृश्यते।

इतः परम् अश्लेषायाः, मघायाः, ज्येष्ठायाः, मूलस्य, रेवत्याः, अश्विन्याश्च गण्डान्तम् उच्यते। मूलस्य, मघायाः, अश्विन्याश्च प्रथमे चरणे जातो जातकः पितुः नाशं करोति। एवं च रेवत्याः, ज्येष्ठायाः, अश्लेषायाः चतुर्थे पादे जातस्य जातकस्य च पितृनाशः सम्भवति। रेवत्याः चतुर्थे चरणे रात्रौ जातस्य जातकस्य मातृनाशः, ज्येष्ठायाः चतुर्थे चरणे दिने जातस्य जातकस्य पितृनाशः, अश्लेषायाः चतुर्थे चरणे सन्ध्याकाले समुत्पन्नस्य जातकस्य स्वशरीरनाशः सम्भवति। अत्र दैवज्ञस्य वैद्यनाथस्य विचार एवंविधो वर्तते-

मूलामघाश्विचरणे प्रथमे पितुश्च पौष्णेन्द्रयोश्च फणिनस्तु चतुर्थपादे।
मातुः पितुः स्ववपुषोऽपकरोति नाशं जातो यथा निशि दिनेऽप्यथ सन्ध्ययोश्च ॥ (जातकपारिजातः ९/५७)

गण्डकाले जन्मनः पूर्वोक्तं पलं दृढीकुर्वन् कथयति पुनः जातकपारिजातकारः-

दिवा जातस्तु पितरं रात्रिजो जननीं तथा।
आत्मानं संध्ययोर्हन्ति नास्ति गण्डे विपर्ययः ॥८(जातकपारिजातः ९/५)

एतदनुसारेण गण्डे दिवाकाले जातस्य पितृहानिः सम्पद्यते, रात्रिकाले जातस्य च मातृहानिः जायते। एवं गण्डे सन्ध्याकाले जातस्य स्वशरीरनाशो भवति। अत्र शान्तिं विना न कथञ्चित् फलविपर्ययो न सम्पद्यते।

मूलनक्षत्रे जन्मनः फलविषये च वैद्यनाथेन निगदितम् अस्ति-

मूलाद्यपादे पितरं निहन्याद् द्वितीयके मातरमाशु हन्ति।
तृतीयजो वित्तविनाशकः स्याच्चतुर्थपादे समुपैति सौख्यम् ॥ (जातकपारिजातः ९/५१)

वैद्यनाथस्य विचारे मूलस्य प्रथमे चरणे जन्मनि पितृविनाशः, द्वितीये चरणे जन्मनि मातृहानिः, तृतीये चरणे जन्मनि धननाशः सम्पद्यते। परं चतुर्थे चरणे चन्मनि सौख्यप्राप्तिः जायते।

रामदैवज्ञस्य विचारः अपि अत्र वैद्यनाथेन सम एव दृश्यते। उक्तं च तेन-

आद्ये पिता नाशमुपैति मूलपादे द्वितीये जननी तृतीये।
धनं चतुर्थोऽस्य शुभोऽथ शान्त्या सर्वत्र सत्स्यादहिभे विलोमम् ॥ (मुहूर्तचिन्तामणिः २/५५)

अत्र रामदैवज्ञस्य विचारे मूलफलस्य विलोमगत्या अश्लेषायाः फलं जायते। तदनुसारेण मूलस्य अश्लेषायाश्च दुष्फलं शान्त्या विनश्यति। शान्त्या तदुभयं नक्षत्रं शुभफलदं जायते।

दैवज्ञो वैद्यनाथो मूलफलं सूक्ष्मेक्षिकया पुनः एवं प्रतिपादितवान् वर्तते –

मूलर्क्षनिखिला नाड्यस्तिथिसङ्ख्याविभाजिताः।
आद्ये पिता पितृभ्राता तृतीये भगिनीपतिः ॥
पितामहश्चतुर्थे तु माता नश्यति पञ्चमे।
षष्ठे तु मातृभगिनी सप्तमे मातुलस्तथा ॥
अष्टमांशे पितृव्यस्त्री निखिलं तु नवांशके।
दशमे पशुसङ्घातो भृत्यस्त्वेकादशांशके ॥
द्वादशे तु स्वयं जातस्तज्ज्येष्टस्तु त्रयोदशे।
चतुर्दशे तद्भगिनी त्वन्ते मातामहस्तथा ॥ (जातकपारिजातः ९/५२-५५)

एतदनुसारेण मूलनक्षत्रस्य निखिलाः भभोगनाड्यः पञ्चदशभिः विभाजिताः कार्याः। तदा तस्य नक्षत्रस्य पश्चदश खण्डानि जायन्ते। तेषु क्रमेण जातस्य फलानि सारिण्यां प्रस्तूयन्ते-

| खण्डः | फलम् |
|---|---|
| प्रथमः | पितृनाशः |
| द्वितीयः | पितृव्यनाशः |
| तृतीयः | भगिनीपतिनाशः |
| चतुर्थः | पितामहनाशः |
| पञ्चमः | मातृनाशः |
| षष्ठः | मातृष्वसृनाशः |
| सप्तमः | मातुलनाशः |
| अष्टमः | पितृव्यानाशः |

| खण्डः | फलम् |
|---|---|
| नवमः | निखिलविनाशः |
| दशमः | पशुविनाशः |
| एकादशः | भृत्यविनाशः |
| द्वादशः | आत्मविनाशः |
| त्रयोदशः | ज्येष्ठभ्रातृविनाशः |
| चतुर्दशः | भगिनीविनाशः |
| पञ्चदशः | मातामहविनाशः |

गण्डान्तस्य उत ऋक्षसन्धेः विषये पुनः निगदितम् अस्ति जातकपारिजाते-

मूलावासवयोर्मघाभुजगयोः पौष्णाश्वयोः सन्धिजं
गण्डान्तं प्रहरप्रमाणमधिकानिष्टप्रदं प्राणिनाम् ॥
ज्येष्ठादानवतारसन्धिघटिका चाभुक्तसंज्ञा भवेत्
तन्नाडीप्रभवाङ्गनासुतपशुप्रेष्याः कुलध्वंसकाः ॥ (जातकपारिजातः ९/४५)

मूलज्येष्ठयोः, मघाऽश्लेषयोः, रेवत्यश्विन्योश्च नक्षत्रयोः प्रहरप्रमाणः अर्थात् सार्धसप्तघटीप्रमाणः सन्धिकालः गण्डान्तपदेन निगद्यते । ज्येष्ठान्तकालस्य पादोनं घटिकाचतुष्टयं मूलस्य आद्यं पादोनं घटिकाचतुष्टयं चेति सम्मिश्रणेन सार्धसप्तघटीमितः प्रहरप्रमाणः कालो गण्डान्तः कथ्यते । गण्डान्तः प्राणिनामधिकानिष्टप्रदः अत्यशुभदश्च भवति । गण्डान्तं परिचाययता श्रीरामदैवज्ञेन च कथितमस्ति–

ज्येष्ठा पौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनी,
पित्रादौ घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम् ॥ (मुहूर्तचिन्तामणिः ६/४३)

ज्येष्ठानक्षत्रे समुत्पत्तेः फलं विवेचयता वैद्यनाथेन उक्तं वर्तते-

ज्येष्ठाद्यपादेऽग्रजमाशु हन्याद् द्वित्तीयपादे यदि तत्कनिष्ठम् ।
तृतीयपादे पितरं निहन्ति स्वयं चतुर्थे मृतिमेति जातः ॥ (जातकपारिजातः ९/५०)

ज्येष्ठायाः प्रथमे पादे जन्मना अग्रजस्य, द्वितीये पादे जन्मना अनुजस्य, तृतीये पादे जन्मना पितुः, चतुर्थे पादे जन्मना स्वस्यैव हानिः भवति इति अत्र पद्ये वैद्यनाथस्य विचारो वर्तते । पुनः सूक्ष्मेक्षिकया ज्येष्ठायां जन्मनः फलं प्रतिपादयता जातकपारिजातकारेण निगदितं वर्तते-

विभक्ता दशभिर्ज्येष्ठा नक्षत्राखिलनाडिकाः ।
आद्यंशे जननीमाता द्वितीये जननीपिता ॥
तृतीये जननीभ्राता यदि माता चतुर्थके ।
पञ्चमे जाततनयः षष्ठे गोत्रविनाशकः ॥

सप्तमे चोभयकुलं त्वष्टमे वंशनाशनम्।

नवमे श्वशुरं हन्ति सर्वं हन्ति दशांशके॥ (जातकपारिजातः ४६-४८)

एतदनुसारेण ज्येष्ठायाः भभोगः दशभिः भक्तः सन् दशसु खण्डेषु स विभक्तो भवति। तत्र प्रतिखण्डं जन्मनः फलं सारिण्याम् एवं प्रस्तूयते-

| खण्डः | फलम् |
|---|---|
| प्रथमः | मातामहीहानिः |
| द्वितीयः | मातामहहानिः |
| तृतीयः | मातुलहानिः |
| चतुर्थः | मातृहानिः |
| पञ्चमः | पुत्रहानिः |

| खण्डः | फलम् |
|---|---|
| षष्ठः | गोत्रहानिः |
| सप्तमः | मातापित्रोः कुलहानिः |
| अष्टमः | वंशहानिः |
| नवमः | श्वशुरहानिः |
| दशमः | सर्वहानिः |

अत्र भगवतो भारद्वाजस्य मतं च समुद्धृत्य टीकाकृता कपिलेश्वरशास्त्रिणा पण्डितेन वैद्यनाथमतम् एवं दृढीकृतं वर्तते-

ज्येष्ठादौ मातृजननीं मातामहं द्वितीयके।

तृतीये मातुलं हन्ति चतुर्थे जननीं तथा॥

आत्मानं पञ्चमे हन्ति षष्ठे गोत्रक्षयो भवेत्।

सप्तमे कुलनाशः स्यादष्टमे ज्येष्ठसोदरम्॥

नवमे श्वशुरं हन्ति सर्वस्वं दशमे तथा॥ (वैद्यनाथः वि.सं. २०३६, पृ. २९७)

अत्रोक्तं फलं पुत्रकन्ययोः द्वयोरेव जन्मनि विज्ञेयम्।

मूलादिषु नक्षत्रेषु नारीणां जन्मनः फलं विवेचयतो नारदस्य मतं समुद्धरता जातकपारिजातस्य टीकाकृता पण्डितेन कपिलेश्वरशास्त्रिणा उदीरितं वर्तते-

मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनाम्।

ऐन्द्री पत्यग्रजं हन्ति देवरं तु द्विदैवजा॥ (वैद्यनाथः वि.सं. २०३६, पृ. २९७)

एतदनुसारेण नारीणां मूलनक्षत्रे जन्मनि श्वशुरविनाशः, अश्लेषायां जन्मनि श्वश्रूविनाशः, ज्येष्ठायां जन्मनि पत्यग्रजविनाशः, अश्विन्यां जन्मनि देवरविनाशः सम्भवति।

सापेन्द्रान्तिमभात्ततोऽब्धिघटिकं पूर्णान्ततोब्ध्यर्ध्दकं

कीटान्त्यालिविरामतः कुघटिकं गन्डान्तमूर्ध्वरम्॥

सावैशूल्यहगाख्ययोगविरतौ भं तत्र चन्डायुधं दुर्योगे दिनभाच्च साभिजिदयुग्भेकंस्तदेकार्गलः ॥१९॥ (मुहूर्तमार्तण्डः, ४\१९)

सापेन्द्रान्तिमभेति। सार्पमाश्लेषा इन्द्रो ज्येष्ठा अंतिमभं रेवती एषामन्तः तस्मात्कालात्प्राक्परं पूर्वापरत अब्धिघटिकं गंडांकं स्यात्। अब्धयश्चतस्रोघटिका यस्मिन्नित्यब्धिघटिकं चतुर्घटिकमित्यर्थः एतदुक्तं भवति। उक्तनक्षत्रात्पूर्वतो घटिकाद्वयं परतो घटिकाद्वयम् अष्टघटिका चतुष्टयं नक्षत्रगंडांतम्। अथतिथिगंडांतमाह। पूर्णान्ततोब्ध्यद्र्ध व पूर्णापंचमीदशमीपूर्णिमा तासामंततः अब्ध्यद्र्धकं द्विषष्टिकंगंडांतं पूर्वापर स्यात्। अथलग्नगंडांतमाह। कीटांत्यालिविरामतः कुघटिकं कीटः कर्कटा

अंत्योमीनः अलिवृश्चिकः एषां विरामोवसानं तस्मात् कुघटिकं प्रागद्धर्घटिक परतोद्र्धघटिका एवमेघटिकं लग्नगंडांतं स्यात्। अथ चंडायुधमाह। सा इति। सासाध्ययोगः वैवैधृतिः शुशूल व्यव्यतीपातः हहर्षणः गगंडः एतद् ख्ययोगानां विरतिरवसांनं तत्र यद्धनक्षत्रं तस्माच्चन्डायुधं स्यात्। चंडंप्रच महत् एवंविधमायुधं स्यात्। आयुधं धातकं स्यात्।

वासरयोगेन ज्येष्ठामूलयोः जन्मफलं प्रतिपादयता वैद्यनाथेन निरुक्तं वर्तते-

भौमवासरयोगेन ज्येष्ठाजा ज्येष्ठसोदरम्।
भानुवासरयोगेन मूलजा श्वशुरं हरेत् ॥ (जातकपारिजातः ९/४९)

भौमवासरे ज्येष्ठायाः योगे समुत्पन्नो बालकः ज्येष्ठं सहोदरं निहन्ति। रविवासरे मूलनक्षत्रस्य योगे जन्मनि श्वशुरविनाशो भवति।

**उपसंहारः**

एवं ज्योतिषशास्त्रजगति गण्डान्तदोषस्य विविधैः मनीषीभिः ज्योतिर्विद्भिः ऋषिभिः नव्यैः चिन्तकैश्च चर्चा विहिता वर्तते। मतमतान्तराणां प्रदर्शनेन पुरःसरं गण्डान्तदोषस्य विश्लेषणं प्रामाणिकग्रन्थेषु बहुत्र लभ्यते। गण्डान्तदोषस्य विषये नानाविधानां दैवज्ञानां मतैक्यं न दृश्यते। केचन मुनयो दैवज्ञाश्च ज्येष्ठानक्षत्रस्य अन्त्याः पञ्च घट्यः, मूलनक्षत्रस्य आद्याः अष्टौ घट्यः चेति त्रयोदश घट्यः अभुक्तमूलं मन्वते। केचन पण्डिताः ज्येष्ठानक्षत्रस्य अन्त्या सार्धा घटी तथा मूलनक्षत्रस्य आद्या सार्धा घटी चेति तिस्रो घट्यः अभुक्तमूलं कथयन्ति। अनया रीत्या केचन दैवज्ञाः अष्टघट्यात्मकम्, केचन दैवज्ञाः त्रिघट्यात्मकम्, केचन एकघट्यात्मकं च अभुक्तमूलादीनां कालप्रमाणं साधयन्ति। तद् एव कालप्रमाणम् आधृत्य दैवज्ञाः गण्डान्तदोषस्य वर्णनं कृतवन्तः सन्ति। गण्डान्तस्य विषये मतैक्यं नास्ति परन्तु गण्डान्तजनिते दोषे तस्य प्रभावे च मतैक्यं दरीदृश्यते। पण्डितानाम् अनुसारेण गण्डान्तदोषैः ग्रस्तो जातकः पित्रा परित्याज्यः अथवा अष्टौ वर्षाणि यावत् पित्रा तस्य मुखं न अवलोकनीयम्। केचन दैवज्ञाः 'गण्डान्तदोषेण युतो जातको न जीवति यदि जीवति चेत् स लब्धप्रतिष्ठः असाधारणया प्रतिभया युक्तो वा भवति' इति कथयन्ति। नक्षत्रगण्डान्तः, राशिगण्डान्तः, लग्नगण्डान्तः चेति गण्डान्तदोषाः त्रिविधाः सन्ति,। परन्तु केचन दैवज्ञाः तिथिगण्डान्तं न स्वीकुर्वन्ति। नक्षत्रगण्डान्तस्य विषये अश्लेषामघयोः, ज्येष्ठामूलयोः, रेवत्यश्विन्योः वा नक्षत्रद्वन्द्वयोः सन्धिकालं नक्षत्रगण्डान्तं मन्वते। पूर्णासंज्ञकानां तिथीनां नन्दातिथिभिः सन्धिः तिथिगण्डान्तः कथ्यते। तत्र पञ्चम्याः षष्ठ्या सह, दशम्याः एकादश्या सह, पौर्णमास्याः अमावास्यायाः वा प्रतिपदा सह सन्धिकालो तिथिगण्डान्तो भवति। लग्नगण्डान्ते कर्कटेन सिंहस्य, वृश्चिकेण धनुषः, मीनेन मेषस्य च सन्धिकालो गण्डान्तत्वेन गृह्यते। यदि एतादृशैः गण्डान्तैः युक्ते काले बालकानां जन्म भवति चेत् तदा ते जातकाः रोगिणः भवन्ति, तेषां मातृहानिः पितृहानिः, स्वहानिः, धनहानिः, श्वसुरहानिः,ज्येष्ठधवाग्रजहानिश्च इत्यादयः अनेके अनिष्टा भवितुम् अर्हन्ति। तेन एव कारणेन एतादृशस्य जातकस्य गण्डान्तदोषस्य वैदिकेन विधिना नामकरणस्य समये एव उत जन्मनः अष्टमवर्षाभ्यन्तरे शान्तिः कर्तव्या भवति। गण्डान्तदोषेण सम्बद्धानां विषयाणां विवेचनक्रमे अत्र सारः, विषयप्रवेशः, समस्या, उद्देश्यम्, शोधविधिः, सीमाङ्कनम्, उपसंहारः इत्यादिभिः अनुसन्धानालेखस्य संरचकघटकैः तथ्यानां विश्लेषणं विवेचनञ्च विधाय सम्यक् निष्कर्षः समासाधितः वर्तते।

**सन्दर्भग्रन्थसूची**

जीवनाथः, (सन् २०१३), भावकुतूहलम्, वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।

महर्षिः, पराशरः, (सन् २०१७), बृहत्पाराशरहोराशास्त्रम्, वाराणसी : चौखम्बाकृष्णदास अकादमी ।

वैद्यनाथः (वि.सं. २०३६), जातकपारिजातः, (सम्पा.कपिलेश्वर शास्त्री) वाराणसी : चौखम्बा संस्कृत संस्थान ।श्रीनारायणः, (वि.सं.२०५३), मूहूर्तमार्तण्डः, (सम्पा. डा.सत्येन्द्र मिश्रः) वाराणसीः कृष्णदास अकादमी।

श्रीरामाचार्यः, (सन्१९९५), मुहूर्तचिन्तामणिः, (सम्पा.केदारदत्त जोशी), दिल्लीः डी. पी. बी. पब्लिकेशन।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

# अच इति षष्ठ्यन्तम्

मनोज भण्डारी
उपप्राध्यापकः
नेपालसंस्कृतविश्वविद्यालयः
Gmail: nepalbharat108@gmail.com
DOI:

**लेखसारः**

पाणिनीयायामष्टाध्याय्यां प्रथमाध्याये प्रथम एव पादे मिदचोऽन्त्यात्परः इति सूत्रं सन्निविष्टमस्ति। परिभाषाप्रकरणे एतत्सूत्रव्याख्यानसन्दर्भे सिद्धान्तकौमुदीस्था पङ्क्तिरियम् - अच इति षष्ठ्यन्तमिति। सूत्रगतपदविवेचनसौकर्याय यद्यपि विभक्त्युल्लेख उचितस्तथापि दीक्षितस्य तु सप्रयोजनकमेव सर्वत्र निर्देशननिदर्शनं दृष्ट्वाऽत्रापि हेतुविशेष ऊह्यते। प्रयोजनञ्च प्रक्रियाकौमुद्युक्तपञ्चमीपरत्वखण्डनमेव । श्रीमद्रामचन्द्राचार्यकृतप्रक्रियाकौमुद्याम् अन्त्यादचः परो मिदिति दर्शनेन तत्खण्डनहेतुकोऽत्र विभक्त्युल्लेख इति स्पष्टम्। कुण्डानि वनानि इत्यादीनामजन्तानामुभयपक्षसाधारण्येन साधनेऽपि पयांसि यशांसीत्यादीनि तु षष्ठीपक्षे न साधयितुं शक्यानीति दीक्षितादयः । तत्र हेतुस्तु पञ्चमीपक्षे अन्त्याचोरभेदेन यो ह्यन्तस्स एवाज्यत्र तत्रैव सूत्रप्रसङ्गः । तेन अजन्तेषु दोषाभावेऽपि हलन्तेषु लिम्पविन्दादिष्वपि धातुषु मिदभावापत्तिरत एव षष्ठी स्वीकर्तव्या इति तेषामाशयः। मन्मते तु पञ्चमीपक्षेऽपि दूषणोद्धारः सुलभः । प्रक्रियाकौमुदीं व्याख्यायता विठ्ठलाचार्येणापि सन्निविष्टामचां मध्येऽन्त्यादचो मिदित्युक्त्या पञ्चमीपक्षेऽपि एतादृशसूत्रसुलभतेति दिङ्निर्देशो लब्धः। कथमेष इति तु लेखे विस्तरेण निरूप्यते। निर्धारणषष्ठ्या लब्धस्यैवार्थस्य विशेषणद्वारा लाभे सति पञ्चमीपक्षेऽपि नास्ति क्षतिरिति। अर्थसाम्ये सति सामानाधिकरण्येन व्याख्याने लाघवातिरेकं पञ्चमीपक्षे पश्यामः। भाष्यकारस्य षष्ठ्युक्तिस्तु पञ्चमीफलिकैव न तु निर्धारणषष्ठीसमर्थिकेति पञ्चमीपक्षो निर्दोष इति विचारकतया भट्टोजिदीक्षितोक्तस्य वाक्यस्य सुसमीक्षा लेखे समाचरिता।

**शब्दकुञ्जी :** प्रक्रियाकौमुदी, पाणिनीयव्याकरणम्, भट्टोजिदीक्षितः, मिदचोऽन्त्यात्परः, सिद्धान्तकौमुदी।

**परिचयः**

श्रीमत्पाणिनिप्रणीतामष्टाध्यायीं को न जानीते संस्कृतजगति । को वा न जानीयाद्भट्टोजिदीक्षितप्रणीतां वैयाकरणसिद्धान्तकौमुदीं नाम तद्व्याख्यान-तत्प्रकरणव्यवस्थापनमहितां वैयाकरणमनोहारिणीम्। के वा अपरिचितास्तिष्ठेयुः तत्कार्यपथिकृद्भूतायाः प्रक्रियाकौमुद्याः विषये ? के वा सिद्धान्तकौमुद्या एव टीकाग्रन्थं प्रौढमनोरमां नामापि शृणुयुर्वैयाकरणतत्त्वबुभुत्सवः ? विदितमेव यद् अष्टाध्यायीस्थसूत्राणां स्वबुद्धिपरिकल्पितप्रकरणविशेषविशेषाधायिनी प्रक्रियाकौमुदी आचार्येण रामचन्द्रेण विरचिता । ततश्च तादृश्यैव रीत्या भट्टोजिदीक्षितेनापि वैयाकरणसिद्धान्तकौमुदी विरचिता। सिद्धान्तकौमुदीविषये समधिकं ज्ञातुमिच्छद्भ्यो हिताय अथ च तत्र समापततां विप्रतिपत्तिमूलानां विचाराणां च निराकरणाय प्रौढमनोरमा इति टीका रचिता। यद्यपि अष्टाध्यायीति मूलग्रन्थस्समान एव तयोः कौमुद्योस्तथापि व्याख्यानं तु

भिद्यत एव। तत्र तावदेकं निदर्शनमेव पश्यामः, 'उपदेशेऽजनुनासिक इत्' इति सूत्रघटको यः खलु उपदेशपदार्थः कः स इति विषये प्रक्रियाकौमुदीकारेण धातुसूत्रगोणादीति परिगणनं विहितम्, दीक्षितेन तु सर्वथा तदनुचितमिति प्रौढमनोरमायां खण्डितम्। अथ च आद्योच्चारणमेव तदिति च व्याचख्यौ। तथैव दीक्षितः "मिदचोऽन्त्यात्परः"(अष्टाध्यायी १.१.४७) इति सूत्रप्रसङ्गे सिद्धान्तकौमुद्यां सूत्रव्याख्यानप्रसङ्गे वृत्तेः प्रागेव अच इति षष्ठी इत्युवाच। का चाावश्यकता विभक्तिनिर्देशस्य ? सूत्रार्थापनादपि प्रागेव विभक्तिविशेषनिर्देशस्तु कश्चन विशेषो वाग्व्यवहार इति परिशील्यते । अत्र हेतुस्तु प्रक्रियाकौमुदीकृत्खण्डनमेव। अतः "अच इति षष्ठी" इति कथयता दीक्षितेन प्रक्रियाकौमुदीमते के के दोषाः परिकलिताः स्युरिति चर्च्यो विषयः। अथ च प्रक्रियाकौमुदीं व्याख्यायता विठ्ठलाचार्येण दीक्षितमतमननुसरताऽपि कथमेष निराक्रियते दोष इत्यपि रोचको विषयः। अस्मिलँलेखे तु भट्टोजिमतमेव समीचीनं वा , प्रक्रियाकौमुदीकारमतमिति, कश्च तयोरेकतरपक्षपाते हेतुरिति च विशेषतः समीक्षिष्यते।

**अध्ययनविधिः**

लेखेऽस्मिन् मूलतः मिदचोऽन्त्यात्पर इति पाणिनिसूत्रविषये समुपलब्धानां व्याख्यानां साहाय्यमवलम्बितमिति पुस्तकालयगताः द्वैतीयकसामग्र्य एव प्रयुक्तास्तथा च सूत्रव्याख्यानसन्दर्भे विश्लेषणात्मकताऽनुपालिता। निष्कर्षानयनसन्दर्भे च पञ्चम्यन्तषष्ठ्यन्ततास्वीकारयोः कतरः श्रेयानिति विषये तुलनात्मकविधिराश्रितः । विषयेऽस्मिन् समीक्षिकैरनसन्धाातृभिरर्वाचीनैर्विहिताः शोधा नोपलभ्यन्त इति प्राचीनटीकाकृत एवास्माकं पूर्वकार्याणि तानि च “ग्रन्थान्तरमतानि”इत्युपशीरषके समीक्षिष्यन्ते।

**अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च**

लेखेऽस्मिन् मिदचोऽन्त्यात्पर इति पाणिनिसूत्रस्य अच इति पदं पञ्चम्यताहो षष्ठीत्येव मूलरूपेण चर्चितम्। तत्र हेतुः कस्तत्र च दीक्षितशैलीविशेषद्योत्यता तदनुषङ्गतया षष्ठी च निर्धारणे कथमिति कस्तत्रान्येषां विचार इत्यपि प्रस्तुतः। तदतिरिक्तं सूत्रव्याख्यानमथ च प्रयोगादिसमीक्षणमपि नाभिव्याप्नोतीति सीमा । सूत्रान्तरमपि एतत्सूत्रघटकविभक्तिनिर्धारणसहायकमेवात्र विषयीकृतमिति।

**मिदचोऽन्त्यात्परः सूत्र - प्रसङ्गः**

सूत्रमिदम् अष्टाध्यायाः प्रथमाध्यायस्य प्रथमपादस्य सप्तचत्वारिंशत्तमत्वेन परिगण्यते। इतः पूर्वं पाणिनिना आद्यन्तौ टकितौ (अ.१.१.४६) सूत्रमुपन्यस्तमासीत्। ततश्च प्रक्रियाकौमुदीग्रन्थे पूर्वार्धे सूत्रमेतत्पठ्यते। सिद्धान्तकौमुद्यां तु संज्ञाप्रकरणानन्तरं परिभाषाप्रकरणमिति पठ्यते । तत्रैव सूत्रस्यास्य सन्दर्भः । टित्कितौ यस्योक्तौ तौ आद्यन्तावयवौ भवतः इति निरूपयता दीक्षितेन इत्त्वसाधारण्येन मिद्यस्योक्तः सोऽपि क्व विधेय इति व्यवस्थापनाय अनियमे नियमकरणाय सूत्रप्रस्तावो विहितः।
सूत्रे मित् अचः अन्त्यात् परः इति चत्वारि पदानि विलसन्ति। मिदिति प्रथमैकवचनम्। अचः इति प्रक्रियाकौमुदीकृन्मते पञ्चमी (रामचन्द्रः, सन् १९८८, पृ.४१) । दीक्षितमते षष्ठी । पञ्चम्येकवचने ङसिः षष्ठ्येकवचने तु ङस् , उभयथाऽप्यनुबन्धलोपाभ्यामसेव शिष्यत इति मतद्वयस्य उत्सः। अन्त्यात् इति पञ्चम्येकवचनम्। परः इति प्रथमैकवचनम्।

म् (मकारः ) अवयव इत् यस्य स इति मित्, अजिति प्रत्याहारो न तु प्रत्ययोऽत्र, व्याख्यानात् । प्रत्ययपरत्वस्य निष्प्रयोजनत्वात् । वर्णसमाम्नायस्थ-अकारादिचकारान्तसमुदायघटितवर्णपरमत्राजिति तेन स्वरा गण्यन्ते । तेन यः अन्त्यः अच् ( यद्वा यः अचाम् अन्त्यः ) तस्मात् परो मिद्भवतीति सामान्यतयाऽर्थः ।

तत्र सूत्रार्थं विदधता दीक्षितेन लिख्यते -

अच इति निर्धारणे षष्ठी । अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित् स्यादिति ।

उदाहरणमुखेन सूत्रार्थं घटयामः -

मुञ्चति इति रूपसिद्धिप्रक्रियायामस्योपयोगः स्फुटतरं सिद्ध्यति । मुच्लृ-धातोर्लटि तिपि तुदादित्वाच्छे "शे मुचादीनाम्" इति सूत्रेण नुम्विधातव्यः । मुच् इत्यस्य नुमि विधातव्ये "मुच्" इति समुदाये अन्त्यः अच् मकारोत्तरवर्ती उकारः । स च यद्यपि आद्योऽपि, तथापि देवदत्तपुत्रगतज्येष्ठकनिष्ठत्वव्यवहारवत् अन्त्योऽपीति स एव गृहीतः । तस्मात् परो नुम् भवति, तेन मुन्च् इत्यवस्था । परं मुञ्चतीति सन्धिना सिद्ध्यति । यत्रानेकाच् तत्र तु इतोऽपि स्फुटतया अन्त्याच्त्वं दृश्यते । यथा ज्ञानशब्दाज्जसि "शि"आदेशे नुम्विधेयः । तत्र अन्त्योऽच् नकारोत्तरः । ततो नुम् । स च तस्यैवान्तावयत्वेनाध्यवसितः इति रूपसाधनप्रसङ्गः । तेन ज्ञानानीति सिद्ध्यति ।

तस्यैवान्तावयव इत्यपि सङ्क्षेपतो विचारयामस्तावत् । दीक्षितेन तस्यैवान्तावयवो मिद्भवतीति प्रत्यपादि । तच्छब्दस्य सर्वनामत्वात् बुद्धिस्थपरामर्शकत्वेन कोऽयं बुद्धिस्थो दीक्षितस्येति प्रत्यासत्त्या यस्य मिद्विहितस्तस्यैवान्तावयव इत्यर्थो लभ्यते । अत एव नागेशेनापि लघुशब्देन्दुशेखर उक्तम् - यस्य विहितस्तस्यैवेत्यर्थः इति । स च भाष्योक्तमप्युद्धरँस्तत्र स्वोक्तं प्रमाणयति - अत एव समुदायभक्तो नोत्सहतेऽवयवस्येगन्ततामपहन्तुमिति भाष्यं सङ्गच्छत इति ।

तस्यैवान्तावयवत्वे फलमाह दीक्षितः - तेन त्रपुणीत्यादौ अङ्गस्य नान्तत्वेन दीर्घः सिद्धः इति । अत्रायमाशयः - त्रपुशब्दः नित्यनपुंसकलिङ्गः । ततः प्रातिपदिकात् प्रथमायाः बहुवचने जसि तत्स्थाने "जसः शि" इति श्यादेशेऽनुबन्धलोपे "नपुंसकस्य झलचः" इति सूत्रेण अजन्तस्य त्रपुशब्दस्य नुम् प्राप्तः । स च नुम् मकारेत्संज्ञकः सन् किंस्थानको भवेदित्यनियमे नियामिकेयं परिभाषा । त्रपुशब्दस्यैव नुम्विहित इति त्रपुशब्दस्यैवान्तावयवो नुम् भवति । ततः 'त्रपुन् इ' इति परिस्थितिः । अत्र दीर्घो विधातव्यः। दीर्घविधायकञ्च सूत्रम् - सर्वनामस्थाने चासम्बुद्धाविति । स च नान्तस्योपधायाः दीर्घं विधत्तेऽसम्बुद्धौ सर्वनामस्थाने परे । अत्र नान्तो नाम त्रपुशब्दो यदि न स्यात्स तर्हि कथङ्कारं दीर्घतां लभेत । नकारस्य त्रपुशब्दस्यान्तावयवयत्वे हि उपधादीर्घो भवितुमर्हतीति । यद्युच्यते "त्रपु इ" इत्यत्र जस एवादिरवयव एष इति, स तु न दीर्घं प्रयोजयतीति । अत एव परादित्वे स न सिद्ध्येदिति ।

अनवयवो हि मिद्भवेदित्युच्यते चेदुत्तरम् - अभक्तत्वे तु वहंलिह इत्यत्र वहाभ्रे लिहः इति खशि अरुर्द्विषदिति मुमि मोऽनुस्वारो न स्यात्, अपदान्तत्वादिति भावः । अत्रायं भावः -

वहाभ्रे लिहः (अ.३-२-३२) इत्यनेन पाणिनिसूत्रेण वह अभ्र इत्येतयोः कर्मणोरुपपदयोर्लिहेर्धातोः खश् प्रत्ययो भवति । वहं लेढीति वहंलिहो गौः। अभ्रंलिहो वायुः । इत्युदाहरणे सूत्रस्य । वहंलिह्शब्दे साधयितव्ये अनेन सूत्रेण खशि प्रत्यये सति अरुर्द्विषदजन्तस्य मुम् (अ.६.३.६७) इति सूत्रेण मुम्भवति । मुमिति मित्त्वात् मिदचोऽन्त्यात्पर इति परिभाषया अजन्तस्य वहशब्दस्य सम्पन्ने च मुमि मोऽनुस्वारः (अ. ८.३.२३)इत्यनेन विधेयोऽनुस्वारः । यदि ह्यभक्त एष मुम् , मान्तमिदं पदं न स्यात्तेन वहंलिह्शब्देऽनुस्वारसम्पत्तिर्न स्यादिति ।

*अच इति षष्ठ्यन्तम्*

एवं सामान्यतया सूत्रप्रसङ्गो दर्शितः।

**विभक्तिनिर्देशे विशेषः**

सामान्यतया न क्वचिदपि सूत्रे वृत्तौ भट्टोजिदीक्षितो विभक्तिनिर्देशं विधत्ते। विधत्ते च विरलतरास्वस्थासु यत्र हि कश्चन विशेषावशेषो भवति वक्तव्यस्य। यथा हि नलोपः प्रातिपदिकान्तस्य (अ.८.२.७) इति सूत्रे ''नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे '' इत्याह। तत्र च नस्य लोपः इति षष्ठीसमासेऽपि स सिद्ध्यति, असत्यपि समासे लुप्तषष्ठी।

नौ वृ धान्ये (अ.३.३.४८) इति सूत्रे वृ इति लुप्तपञ्चमीकमित्याह। तत्र हि वृङ्वृञोरुभयोरपि धात्वोर्ग्रहणं वृ इत्यनेन। वृ इत्यस्य निर्विभक्तिदर्शनात् केयं विभक्तिरिति सम्भावनानामानन्त्येन पञ्चम्यन्ताबोधनाय विशेष आचरितः।

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति (अ.६.४.३७) इति सूत्रे च मूल एव वैयाकरणसिद्धान्तकौमुद्यामुक्तमनुनासिक इति लुप्तषष्ठीकमिति। तच्च वनतीतरेषां विशेषणमित्यपि तत्रैव। अनुनासिकलोप इत्यत्र नास्ति समासोऽपि तु लुप्तैव षष्ठी तत्रातो न दृश्यते। केवलमेतावताऽप्यतिप्रसङ्गवारणाय पुनरेव विशेषणता कुत्रेत्युक्तम्। वनतेस्तु न तद्विशेषणमव्यभिचारात्। उक्तञ्च

सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्।

न हि शीतेन चोष्णेन वह्निः क्वापि विशिष्यत इति।

एवञ्च सर्तेः कर्तरि घञ्विधायकसूत्रं 'सृ स्थिरे' (अ.३.३.१७) इति। तत्र च मूल एव वैयाकरणसिद्धान्तकौमुद्यामुवाच दीक्षितः - 'सृ इति लुप्तविभक्तिकम्' इति। अपदं न प्रयुञ्जीतेति शिष्टोक्तिमनुसरता पाठकेन किमत्र नास्ति विभक्तिरिति प्रश्ने उद्भावनीये नास्त्यपदमिति प्रतिपिपादयिषुराह दीक्षितो लुप्तविभक्तिरिति।

न लोपः प्रातिपदिकान्तस्य (अ. ८.२.७) इत्यस्मिन्सूत्रे नस्य लोपो नलोप इत्येकपदं, लुप्तषष्ठीकं नेति प्रातिपदिकान्तान्वयीति पदद्वयम् इत्यभयपक्षसाधारणबोधेन सूत्रवाक्यार्थसम्भवे सिद्ध्यति उपायद्वयेन जातसन्देहे तन्निराकरणाय मूल एव लुप्तषष्ठीकत्वमुक्तम्। तेन च प्रातिपदिकान्तस्य इत्यनेन सह सामर्थ्यात् कुतः समासः ? इति प्रश्नोऽपि समाहितो भवतीति विशेष उक्तः।

विरलतरमाचरितमत्रापि प्रयोजनविशेषवशात्। किञ्च तत्प्रयोजनमिति पश्यामः। श्रीमद्रामचन्द्राचार्येण विरचिता प्रक्रियाकौमुदी नाम कृतिः। तत्र पूर्वार्धे अष्टाध्यायिसूत्रमुद्धृतं विवृतञ्च यथा -

'अन्त्यादचः परो मित् स्यात्' इति। (रामचन्द्रः, सन् १९८८, पृ.४१)

अत्र प्रक्रियाकौमुदीवाक्ये अन्त्यादिति पञ्चमी। तत्सन्निहितम् अच इत्यपि पञ्चम्यन्तम्। अन्त्यत्वविशिष्टादचः इति भावः। तत्सङ्घटनञ्च यथा -

वारिशब्दाज्जसि तस्य स्थाने 'शि'आदेशेऽनुबन्धलोपे अजन्तस्याङ्गस्य वारीत्येतस्य नुम् प्राप्तः नपुंसकस्य झलचः इत्यनेन। तत्र अन्त्योऽच् रेफोत्तरवर्ती इकारः। ततः परो नुम्। तेन वारीणीति सिद्ध्यति।

भट्टोजिदीक्षितस्तावत् पञ्चमीं विभक्तिं न मनुते। षष्ठ्येव सा अच इत्यत्र। पञ्चमीपक्षे दोषविशेषाध्यवसायेन स पक्षस्त्यक्तोऽपरश्च गृहीतः। प्रक्रियाकौमुदीकारेण यद्यपि विभक्तिविषये नाधिकमुक्तं तथापि दीक्षितस्तन्मताननुसारी सन् वैमत्यविशेषं दर्शयितुमिदं विभक्तिनिर्देशनमाचरति। तदभिमतान् दोषाँश्चाग्रेऽनुपदमेव पश्यामः।

*अच इति षष्ठ्यन्तम्*

**प्रक्रियाकौमुदीमते नैयून्यप्रदर्शनम्**

'अन्त्यादचः परो मित् स्यात्'इति प्रक्रियाकौमुद्यां सूत्रवृत्तावुक्तमिति। अच इति पञ्चमीति भाति। परशब्दः साकाङ्क्षः। स च कस्मात्पर इत्यवधिमाकाङ्क्षते। पूर्वापेक्षायाम् अजेव स पूर्व इति निर्णीयते। अन्त्यादिति विशेषणवाचकपदम्। अच इति विशेष्यवाचकपदम्। अनयोरभेदान्वयः। अभेदसम्बन्धेन नीलविशिष्टो घटः इति यथा नीलो घट इत्यत्र बोधस्तथैवात्रापि। अन्त्य इति अन्त्यत्वविशिष्टो योऽच् ततः पर इति। अमुमर्थमवलोकयता दीक्षितेन नैयून्यदर्शनपुरस्सरं प्रोक्तम् - ''यत्तु प्राचोक्तम् अन्त्यादचः पर इति तन्न। शे मुचादीनाम् इत्यादावन्त्यस्याचोऽसम्भवात्।'' इति (दीक्षितः, सन् २००९ पृ. ५२) अच इति पञ्चमीपक्षे मुञ्चति इत्यादीनि रूपाणि न सिद्ध्यन्ति इति दीक्षिताशयः।

तत्कथम्? विचारयामः।

मुञ्चति इति रूपे शेमुचादीनाम् इत्यनेन नुम्भवति। नुमो मित्त्वात् ''मिदचोऽन्त्यात्परः'' इति प्रवर्तते। मुच् इत्यत्र अन्त्याच् नास्तीति न नुमवसरः। वर्तत एव यद्यपि मुच् इत्यत्र अच्सत्ता, तथापि अन्त्यत्वविशिष्टाचस्त्वभाव एव।

अत्रेदं बोध्यम्, विशिष्टाभावस्त्रिविधः। विशेषणाभावप्रयुक्तविशिष्टाभावः, विशेष्याभावप्रयुक्तविशिष्टाभावः, उभयाभावप्रयुक्तविशिष्टाभावश्चेति।

उदाहरणमुखेन पश्यामस्तावत्, घटवद्भूतलं नास्तीति कथने घटवद्भूतलाभवः विशिष्टाभावः। घटाभावः विशेषणाभावः। भूतलाभावः विशेष्याभावः। यद्यत्र भूतलमस्ति, नास्ति घटस्तदापि घटवद्भूतलाभावो भवति। यदि नास्ति भूतलमस्ति घटस्तदापि घटवद्भूतलाभावो भवति। यदि च नास्ति भूतलं नास्ति घटोऽपि, तदाऽपि घटवद्भूतलाभावो भवति।

घटाभावप्रयुक्तघटवद्भूतलाभावः विशेषणाभावप्रयुक्तविशिष्टाभावः। भूतलाभावप्रयुक्तघटवद्भूतलाभावः विशेष्याभावप्रयुक्तविशिष्टाभावः। घटभूतलोभयाभावप्रयुक्तघटवद्भूतलाभावः पुनरुभयाभावप्रयुक्तविशिष्टाभावः।

लोकेऽपि रक्ते पटे पुरो दृश्यमाने कृष्णः पटो नास्तीति व्यवह्रियते। कृष्णे घटे विद्यमानेऽपि कृष्णः पटो नास्तीत्युच्यते। रक्ते घटे तु सुतरां कृष्णः पटो नास्त्युत्युद्यत एव। एवं विशिष्टाभावः त्रिधैव लोकेऽनुभूतः। प्रकृतमनुसरामः। अन्त्यत्वविशिष्टाच्परः मित् भवतीति प्रतिपन्नम्। पयांसि इति साधनीयम्। पयस् इति शब्दस्ततो जस्। श्यादेशः। पयश्शब्दे अन्त्यत्वविशिष्टाच् मृग्यः। नास्त्येव सः। पयश्शब्दे अज्द्वयम्। प्रथमन्तावत्पकारोत्तरः। द्वितीयस्तावद्यकारोत्तरः। पकारोत्तरेऽकारे अन्त्यत्वविशिष्टाच्त्वं नास्ति। नास्ति यकारोत्तरोऽप्यकारोऽन्त्यत्वविशिष्टाच्, तत्र सत्यपि अच्त्वे अन्त्यत्वं तु नास्त्येव। पयश्शब्दे सकारे यद्यप्यन्त्यत्वमस्ति, तथापि नास्त्येवाच्त्वम्। अतो मित्क्व विधेय इति प्रतिपादितस्य सूत्रस्य नास्ति प्रसक्तिः।

एष एव दोषः प्रक्रियाकौमुद्युक्तपञ्चम्यन्तपक्षे समापततीति दीक्षिताशयः। दीक्षितमते तु नास्ति दोषः। यद्यपि पयश्शब्दे अन्त्यत्वविशिष्टाच् नास्ति, तथापि यो हि यकारोत्तरवर्ती अकारः स अचामन्त्यस्तु वर्तत एव। यतश्च निर्धारणे इति सूत्रेण निर्धारणार्थे विहितषष्ठ्या नोक्तदोष इत्यवधेयम्। निर्धारणे तु समुदायादेकस्य पथक्करणं भवतीति अज्घटितसमुदायादन्त्यस्य पथक्करणं भवतीति सर्वमवदातम्। अथ केयं निर्धारणषष्ठीत्यनुपदमेव वक्ष्यते।

**निर्धारणषष्ठीविमर्शः**

निरुपसर्गपूर्वकाद् धारयतेर्ल्युटि निर्धारणमिति निष्पद्यते। निश्शेषेण धारणमिति निर्धारणम्। धारणीयस्य ग्रहणीयस्य सम्यक्

धारणं ग्रहणमिति साधारणतयाऽवगम्यते । निर्धारणमिति कस्याश्चिद् व्यक्तेर्ग्रहणमिति ग्रहणीयेतरस्य त्यागोऽपि तदर्थतया बुद्ध्यते । निर्धारणेऽर्थेऽवबुध्यमाने षष्ठीसप्तम्यौ विभक्ती भवत इत्याचार्यः पाणिनिः । तथा च सूत्रम् - यतश्च निर्धारणम् (अ.२.३.४१) इति ।

यतो निर्धारणं ततः षष्ठीसप्तम्याविति भावः । काशिकाकारो विवृणुते निर्धारणपदार्थं यथा - जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणमिति ।

यथा हि -

जात्या निर्धारणं मनुष्याणां क्षत्रियः शूरतमः इति ।

गुणेन निर्धारणं गोषु कृष्णा सम्पन्नक्षीरतमा इति ।

क्रियया निर्धारणं अध्वगानां धावन्तः शीघ्रतमाः इति ।

निर्धारणमिति पदं विव्रियते भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां यथा - जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणमिति । अत्र समुदायादेकदेशस्य पृथक्करणं निर्धारणमिति लक्षणम् । पृथक्करणञ्च किन्निमित्तमिति जातिगुणक्रियासञ्ज्ञा उद्दिष्टाः । जातिगुणक्रियासञ्ज्ञानिमित्तं पृथक्करणमिति यावत् । सिद्धान्तकौमुदीटीकाकृद् बालमनोरमाकारश्च स्वेतरव्यावृत्तधर्मविशेषवत्त्वबोधनमिति पृथक्करणं परिभाषते ।

सिद्धान्तकौमुद्युदाहरणानि पश्यामस्तावत् -

नृणां नृषु वा ब्राह्मणः श्रेष्ठः

गवां गोषु वा कृष्णा बहुक्षीरा

गच्छतां गच्छत्सु वा धावन् शीघ्रः

छात्राणां छात्रेषु वा मैत्रः पटुः ।

एतेनाहत्य निर्धारणे विशेषत इयन्तोंऽशाः परिलक्ष्यन्ते ।

१.यो निर्धार्यते २ यस्मात्स निर्धार्यते ३. येन स निर्धार्यते

यथा हि प्रकृते छात्राणां समुदायादेकश्छात्रो मैत्रो निर्धार्यते । छात्राणां समूह एव स यस्मात्स निर्धार्यते । पटुत्वमिति गुणो येन स निर्धार्यते । छात्रसमुदायैकदेशभूतो मैत्रः स्वेतरसमस्तव्यावृत्तपटुत्वधर्मकः ।

प्रकृतेऽपि अचां समुदायादेको निर्धार्यते, यस्मात्परो नुम्विधीयेत । अन्त्यत्वमिति गुणो येन स निर्धार्यते । यथा पयश्शब्दे यकारोत्तरः अकारः स्वेतरसमस्तव्यावृत्तान्त्यत्वधर्मकः ।

**ग्रन्थान्तरमतानि**

सभापतिशर्मोपाध्यायकृता लक्ष्मीरित्याख्या वैयाकरणसिद्धान्तकौमुद्याः व्याख्या भजत्यादरं काशिकेयविद्वत्परम्परासु । तत्र च षष्ठ्येवेति भट्टोजिदीक्षितमतं समर्थयता उच्यते -

अच इति निर्धारणे षष्ठी, न तु पञ्चमी । यदि तु अन्त्यात् इति पञ्चमी स्यात्तदा यत्रान्त्यभूतोऽच् तत्रैवास्याः प्रवृत्तिः स्याद् यथा कुण्डानि वनानीत्यादौ । यशांसि इत्यादावन्त्याचोऽभावादेतदप्रवृत्तौ अलोऽन्त्यस्य इत्यनेन अन्त्यस्य स्थाने नुम् स्यात् । तथा च इदितो नुम् धातोः(७-१-५८), शे मुचादीनाम् (७-१-५९) इत्यादिना इदिद्धातूनां मुचादीनाञ्च हलन्तत्वेन मिदचः

*अच इति षष्ठ्यन्तम्*

इत्यस्याप्रवृत्त्या अलोऽन्त्य इत्यनेनान्त्यस्य नुमादेशापत्त्या नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (३-१-१३४), अनुपसर्गाल् लिम्पविन्द(३-१-१३८) चिन्तिपूजि (३-३-१०५)इत्यादिसौत्रनिर्देशासङ्गतिः । उक्तनिर्देशैर्लक्ष्यानुरोधेन च निर्धारणषष्ठी एव कल्प्यते । (सभापतिः, सन् १९६६ , पृ. ७९ )

अत्रायं सारः

अच इति षष्ठ्येव न तु पञ्चमी । यदि ह्यत्र पञ्चमी स्यात्तदा अच इत्यनेन सामानाधिकरण्यादभेदान्वयः स्यात् । ततश्च यो हि स्वरवर्णोऽन्त्यभूतः स एवेत्यर्थः । तेन वनानि कुण्डानि इत्यादिषु प्रवर्तमानं सदपि सूत्रं यशांसीत्यादौ न प्रवर्तेत । एतदप्रवृत्तौ पुनर्नुम्क्वेत्यनियमे नियमकारिणीत्वादलोऽन्त्यपरिभाषा प्रवर्तेत । तेन चान्त्यस्य स्थान एव नुम्स्यादित्यापत्तिः प्रदर्शिता । न केवलमेतावता, मुञ्चतीत्यादावपि नुमनापत्तिरूपो दोषस्तदवस्थः । अतषष्ठ्येवेति । अत्र च कश्चन वाग्विशेष उदाहरणरूपः । पञ्चमीस्वीकारे सति पाणिनीयनिर्देशासङ्गतिरिति तु नवीना सभापतीया युक्तिः । अत्र सूत्रत्रयमुदाह्रियते - नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (३-१-१३४), अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च(३-१-१३८) चिन्तिपूजिकथिकुम्बचर्चश्च(३-३-१०५) । अत्रेयं रीतिः । प्रथमोपात्ते नन्दिरिति शब्दः टुनदि समृद्धौ इति धातुविशेषं वक्तिः । तत्र च इदितो नुम्धातोरिति नुमागमो भवति । द्वितीये च लिम्प-विन्द इति धातू सनुमौ । लिप उपदेहे , विद्लृ लाभे इति च तौ । सनुम्कयोर्ग्रहणमुपदेशावस्थायामेव "नुम्" भवतीति ज्ञापनार्थम्। तृतीये च तथा चिन्तिरिति चिति स्मृत्याम् , कुम्बिरिति कुबि आच्छादने इति सनुमौ धातू । यदि ह्यच इति निर्धारणषष्ठी न स्यात्, तदा हलन्तानां नुम्न स्यात्तेन च सौत्रनिर्देशनानि न स्युस्सङ्गतानीति षष्ठ्येवेति । भट्टोजिदीक्षितेन लक्ष्यानुरोध उक्तस्सभापतिना च निर्देशोऽप्युपन्यस्त इति दीक्षितमतस्यैवोपकारो नान्यथा ।

प्राचीनटीकाकृतोऽवलोकयामहै -

काशिका-वृत्तौ मिदचो ऽन्त्यात् परः इति व्याख्यानसन्दर्भे प्रोक्तम् -

अचः इति निर्धारणे षष्ठी। जातौ च इदम् एकवचनम्। अचां संनिविष्टानाम् अन्त्यादचः परो मित् भवति। स्थानेयोग प्रत्ययपरत्वस्य अयम् अपवादः। विरुणद्धि। मुञ्चति। पयांसि। मित्प्रदेशाः रुदादिभ्यः श्नम् ३।१।७८ इत्येवम् आदयः। मस्जेरन्त्यात् पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगाऽदिलोपार्थम्। मग्नः। मग्नवान्। मङ्क्ता। मङ्क्तुम्। (त्रिपाठी, सन् १९८४, पृ.९४)

अत्रापि षष्ठ्येव समर्थिता । पञ्चमीनिराकरणाय हेतुविशेषस्तु नोक्तः ।

स च न्यासकारेणोच्यते यथा -

अत्र यदि "अचः" ४।३।३१ इत्येषा पञ्चमी स्यात्, अन्त्यादित्यनया पञ्चम्या समानाधिकरणत्वं स्यात्। ततः "नपुंसकस्य झलचः" ७।१।५२ इति नुमीहैवा- न्त्यादचः परः स्यात्- "कुण्डानि" इति; अस्ति ह्त्र नपुंसकस्यान्त्योऽचः; पयांसी- त्यत्र तु न स्यात् ।

अत्रापि पूर्ववदेव स्पष्टमिति न पुनश्चर्वितं चर्व्यते ।

तदनुसार्येव पन्थाः बालमनोरमाकारस्यापि । तथा चोच्यते -

शेमुचादीनाम्" इत्यादाविदं न प्रवर्तेत, तत्रान्त्यस्याचोऽभावादत आह अच इति षष्ठ्यन्तमिति। "यतश्च निर्धारणमित्यनेने"ति शेषः। "अच" इत्येकत्वमविवक्षितं, तदाह अचां मध्य इत्यादिना। अन्तावयव इति।

प्रौढबालमनोरमयोरेक एव पन्थाः । सिद्धान्तकौमुदीव्याकर्त्रा नागेशेन तु नास्मिन्विषये बहुधोक्तमिति । वैयाकरणानां

*अच इति षष्ठ्यन्तम्*

प्रमाणभूतः सहस्रजिह्वः पतञ्जलिः किमुवाच प्रसङ्गेऽस्मिन्निति विशेषादरं भजते । अस्तु तावन्महाभाष्यपङ्क्तीरवलोकयामहै-

मिदचोऽन्त्यात्परः २४१, १।१।४६

१,१।४७।१ किमर्थम् इदम् उच्यते । मित् अचः अन्त्यात् परः इति स्थानपरप्रत्ययापवादः । मित् अचः अन्त्यात् परः इति उच्यते स्थानेयोगत्वस्य प्रत्ययपरत्वस्य च अपवादः ।

अत्र भाष्यपङ्क्तौ यद्यपि अचः इति पञ्चमी भवितुमर्हति, तथापि एतत् पदच्छेदमात्रमिति । नात्र विभक्तिनिर्देश इति भाति । तथाप्यग्रेऽस्मिन्नेव सूत्रे भाष्यकृता किमपि भिन्नमुच्यते -

एवमिहापि सत्यपि सम्भवे अचामन्त्यात्परत्वं षष्ठीस्थानेयोगत्वं बाधिष्यते ।

अस्यां पङ्क्तौ तु अचामन्त्यात्परत्वमिति कथनाद्भाष्यकृन्मते षष्ठी सूत्रे इति वक्तुं शक्यते ।

**प्रक्रियाकौमुदीपक्षतः किञ्चित्**

सिद्धान्तकौमुदीकारेण षष्ठ्यन्तता उक्ता, प्रक्रियाकौमुदीकारेण च पञ्चम्यन्तता । उभयोरपि टीकासु तत्तत्पदव्याख्यानं तत्तट्टीकाकृद्भिराचरणीयमेव । यथा प्रौढमनोरमायां पञ्चम्यन्ततापक्षे दोष उक्तस्तथा प्रक्रियाकौमुदीं विवृणुता व्याख्यानञ्च श्रीमद्विट्ठलाचार्येण व्यधायि यथा - "सन्निविष्टानामचां मध्येऽन्त्यादचः परो मित्स्यादित्यभिप्रायः'' (विट्ठलाचार्यः, सन् १९५८ , पृ.५१) । एतेन प्रक्रियाकौमुदीपक्षमनुसरद्भिः यशांसि पयांसि मुञ्चति इत्यादीनि रूपाणि कथं साध्यन्त इति प्रश्नो भवति निरस्तः । प्रक्रियाकौमुद्या मतेऽपि सन्निविष्टानामचां मध्येऽन्त्यः इत्यर्थे विहिते विनाऽपि निर्धारणषष्ठीं दोषोद्धारः सुलभः । परन्त्वत्रेदं विचार्यम् । विट्ठलाचार्येण मूलार्थकरणप्रसङ्गे यदुदितं तत्कथमिति तु शङ्का जागर्त्येव नितराम् । षष्ठ्यां तु निर्धारणार्थकत्वेन निस्तारः । पञ्चम्यां तु यो ह्यच् स चान्त्य एव भवेच्चेदेव प्रवृत्तिर्मित इति कथं समाहितम् ? को हेतुस्तादृशार्थकरणस्येति तु सुलभः प्रश्नः । विषयेऽस्मिन् टीकाकृतां कस्यचन भणितिविशेषस्यानुपलब्धेः किञ्चिदिह दूषणोद्धारायायासो विधास्यते ।

तथा हि - पश्यामो वाक्यद्वयम् , शुक्ला गौर्गच्छतीति प्रथमं गोषु शुक्ला गच्छतीति द्वितीयम् । प्रथमे गवि शुक्लमिति विशेषणपदम् । तेन च स्वेतरसमस्तव्यावृत्तशुक्लत्वधर्मिका गौरित्यर्थो लभ्यते । द्वितीयेन च स एवार्थः । तथैव प्रकृतेऽपि अन्त्यादचः परो मिदिति प्रथमम्, अचामन्त्यात्परो मिदिति च द्वितीयं वाक्यम् । अत्र यथा द्वितीयाद् बोधस्तथैव प्रथमादिति न काचिद् विप्रतिपत्तिः । निर्धारणे हि समुदायादेकः पृथक्क्रियते, विशेषणेनापि समुदायादेकस्य पृथक्कृतिरिति समानफलकमेवोभयम् । तेन च दीक्षितोक्तस्य "अचां मध्ये योऽन्त्यस्तस्मात्" तथा च प्रक्रियाकौमुद्युक्तस्य "अन्त्यादचः परो मित्"इत्येतस्य नास्त्यर्थभेदः । विट्ठलाचार्योक्तस्य ''सन्निविष्टानामचां मध्येऽन्त्यादचः परो मित्" इत्यस्य तात्पर्यञ्च उभयोस्सामञ्जस्ये पर्यवस्यति ।

अत्रायं भवितुमर्हति प्रश्नः- अस्त्येवोभयोरर्थयोर्भेदः ? पञ्चमीपक्षे यो ह्यन्त्यस्तेनाचा भाव्यमिति हलन्तेषु नुमागमानापत्तिरिति, षष्ठ्यां तु अक्षु योऽन्त्य इति अन्त्यत्वमचि अच्समुदायनिरूपितमेवेति भेदः । अत्रायमुच्यते -

षष्ठीपक्षे स समुदायः अचामेव, पञ्चमीपक्षे तु प्रातिपदिकस्य समग्रस्य अज्झल्घटितस्येत्यत्र को हेतुः ? पञ्चमीपक्षेऽपि यशस् इत्यत्र अन्त्यः अच् शकारोत्तरः अकारस्तेन नुम् सुलभः ।

आदिरन्त्यो वा मध्यो वा प्रातिपदिकस्य, धातोस्सूत्रस्य वा भवतीति नास्त्याग्रहः । यदि हि क्लृप्त-लोकप्रसिद्धार्थवत्समुदायस्यादिरेवादिः स्यात्तदा कथं प्रत्याहारनिर्मितिः सुलभा स्यात् ? प्रत्याहारनिर्माणे हि अइउण् इति प्रथमसूत्रस्यादिरकारः। अन्त्यश्च णकारः । तदा अन्त्येनेता सहितादिरित्यणेव , न तु कथञ्चिदिणुण् वा । अथ च णकारोऽपि प्रथमसूत्रस्यैवान्त्यः । वस्तुतोऽन्त्यस्तु हलिति चतुर्दशसूत्रचरमो लकारस्तेन अलित्येव सिद्ध्येत् । रप्रत्यहारासिद्धेस्तु का कथा ? आदिरन्त्येन सहेता इति सूत्रव्याख्यानसन्दर्भेऽपि लघुशब्देन्दुशेखरे नागेशः - परस्मिन्सति यस्मात्पूर्वो नास्ति स आदिः, पूर्वस्मिन्सति यस्मात्परो नास्ति सोऽन्त्य इति - अकारादिग्रहणे - इकारणकारादीनामाद्यन्तत्वस्यैवानापत्तेः ।

अस्मिन्नेव सन्दर्भे बालमनोरमाकारो द्रष्टव्यः - "न च इक्? उक् इच् यय् मयित्यादिप्रत्याहाराः कथं स्युः, इकारादीनामादित्वाऽभावादिति वाच्यं, न हि सूत्रापेक्षमिहादित्वं किन्तु आद्यन्तशब्दाक्षिप्तसमुदायापेक्षम्। ततश्च अइउणिति इकारमारभ्य ऋलृगिति ककारपर्यन्तं वर्णसमुदायं बुद्ध्या परिकल्प्य तदादित्वमिकारस्य सम्भावनीयम् । एवमिजादिष्वपि। तथा अन्त्यत्मपि बुद्धिकल्पितसमुदायापेक्षमेव न तु सूत्रापेक्षम्। ततश्च रप्रत्याहारः सुग्रहः। अन्यथा लण्सूत्रे अकारस्याऽन्त्यात्वाभावात्स न स्यात्।"इति (चतुर्वेदः, सन् १९६१, पृ.२३)

यथा ह्याद्यन्तशब्दयोर्विषये आदिरन्त्येनेति सूत्रे विवेचितं तथैव मिदचोऽन्त्यात्पर इत्यत्रापि विभावनीयम् । तथा सति "पयस्" इत्यत्र सकारो यद्यपि प्रातिपदिकान्तस्तथापि अच्समुदायान्त्यस्तु नास्ति । यकारोत्तरोऽकारो यद्यपि न प्रातिपदिकनिरूपतान्तस्तथापि बुद्धिव्यपदेश्यसमूहनिरूपितान्तता तत्रापि । कस्तर्हि स समुदायो यस्यान्तता विवक्ष्येत? तदा वक्तव्यम् - अचामेव । तत्र च हेतुः समभिव्याहतिरेव । प्रत्यासत्त्या अन्त्यादचः परो मिद्भवतीति कथनेऽच्छ्रुत्या अज्घटितसमुदायान्त्यो यो ह्यच् ततः परो मिद्भवतीति फलति । तेन नास्ति दोषः । अत्र पञ्चमीपक्षे व्याख्यानसरणिराश्रयणीया सा च दर्शितैव । तेन गौरवतरं पक्षेऽस्मिन्निति तु नाग्रहः कर्तव्यः । व्याख्यानाश्रयणं च यथा कथञ्चित् षष्ठीपक्षेऽपि समाचरणीयमेव । तथा हि काशिकाकारेण सूत्रस्यास्यार्थापने प्रोक्तम् - अचां सन्निविष्टानाम् अन्त्यादचः परो मित् भवतीति । अत्र च अचामिति प्रथमम्, अन्यादचः परो मिदिति च द्वितीयमज्ग्रहणम् । सूत्रे तु नास्ति तथा । दीक्षितेन तु सकृदेवोदीरितम् । काशिकां विवृणुता न्यासकारेणोदितमिहावलोक्यताम् –

यदि तर्हि निर्धारणषष्ठीयम्, अन्त्यस्याविशेषितत्वादविशेषेण यतः कुतश्चिदन्त्यात् परो मित् स्यात्; न हि द्वितीयमज्ग्रहणमस्ति, येनान्त्यो विशेष्यते, नैष दोषः; समानजातीयस्यैव हि लोके निर्धारणप्रतीतिर्भवति। तथा हि `कृष्णा गवां सम्पन्नक्षीरतमा` इत्युक्ते गौरेव प्रतीयते; नाजा, नाप्यश्वा । तस्मादिहाप्यचां मध्येऽन्त्यादचोऽवधेरित्यन्त्यत्वेन निर्धार्यमाणः समानजातीयोऽजेव प्रतीयते इति । (त्रिपाठी, सन् १९८४, पृ.९४)

अपराऽप्यत्र कथा विशिष्यते, यथा हि गवां कृष्णा सम्पन्नक्षीरतमा इत्यत्र गोसमुदायात्पृथक्कृता कृष्णा गौरेव, नाजा, नाप्यश्वा। तद्वत् कृष्णा गौः सम्पन्नक्षीरतमा इत्यत्र कृष्णपदं शुक्लादीनां गवां व्यावर्तकं, समुदायश्च गवां, नाप्यजानां, नाप्यश्वानाम् । तथैव अचामन्त्यात् मिदित्युक्ते अचां मध्येऽन्त्यादच एव मिन्नानचःपरः। तथैव अन्त्यादचो मिदित्यत्रापि अचां समुदाये योऽन्त्यस्तस्मादचो मिन्न त्वज्झल्घटितसमुदायस्यान्त्यत्वमत्र किञ्चित्करम् । तेन यद्यपि षष्ठी-पञ्चम्योर्विधायकसूत्र-तदर्थ-तत्प्रसङ्गादिषु कथमपि भेदः सुतरां सिद्धस्तथापि उभयोरर्थयोस्साम्येन पञ्चमीविभक्तिस्वीकारेऽपि नास्ति दोषः । अपि तु पञ्चमीपक्षे सामानाधिकरण्यकृतलाघवमपि राजते । वर्तते च अभियुक्तोक्तिः - सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वम् (दीक्षितः, सन् २००९, पृ. १५९) । स्वयमेव प्रौढमनोरमाकृता इदुदुपधस्य चाप्रत्ययस्य इति

सूत्रव्याख्यानसन्दर्भे उपस्कृतन्यायेनापि पञ्चमीपक्षः सुबलो भवति।

यत्तु भाष्यकृताऽस्मिन्नेव सूत्रे उक्तम् - "एवमिहापि सत्यपि सम्भवे अचामन्त्यात्परत्वं षष्ठीस्थानेयोगत्वं बाधिष्यते।" (पतञ्जलिः, सन् २०२३, पृ.४०१) एतत्तु फलितार्थकथनपरकमात्रपरम् इति व्याख्यातुं शक्यते। तेन पञ्चमीपक्षेऽपि नास्ति भाष्यविरोधः। लक्ष्मीटीकाकारेण पञ्चमीपक्षे ये खलु प्रदर्शिता दोषास्तत्रापि समाधानं सुलभमेव।

पञ्चमीस्वीकारे सति पाणिनीयनिर्देशासङ्गतिरिति सूत्रत्रयमुदाहृतम् - नन्दिग्रहिपचादीति, अनुपसर्गाल्लिम्पविन्देति, चिन्तिपूजीति च। यदि हि पञ्चमीपक्षेऽपि अज्घटितसमुदायनिरूपितान्त्यत्वमिति लभ्यते तदा पयसादिषु प्रातिपदिकान्त्यभूतं सकारं दृष्ट्वा नास्त्यत्रान्त्योऽजिति न वक्तुं शक्यते। यमुद्दिश्य नुमुक्तस्तदन्त्योऽज्नावश्यकः, अपि तु तद्घटकेष्वक्ष्वन्त्योऽजावश्यक इति व्याख्यानेन लिम्प-नन्दि-चिन्तयः समञ्जसं गच्छन्ति।

**निष्कर्षः**

मिदचोऽन्त्यापर इति परिभाषासूत्रं भजते प्रामुख्यं पाणिनीयेषु। तत्र अच इति षष्ठ्येकवचने पञ्चम्येकवचने वा साधयितुं शक्यमिति। पञ्चमीपक्षे अन्त्यादचः परो मिदिति, षष्ठीपक्षे तु अचः अन्त्यान्मिदिति। अच इति जातावेकवचनं, षष्ठी च निर्धारणे। यद्यपि सर्वत्रार्थकरणे विभक्तिनिर्देशो भट्टोजिदीक्षितशैली तथापि स्थलविशेषेषु तु सप्रयोजनमेव विभक्तीर्निर्दिशति। सूत्रे च षष्ठीयं निर्धारणे न तु समानाधिकरणपञ्चम्येषा इति द्योतनाय विशेषतो विभक्तिनिर्देशः - अच इति षष्ठ्यन्तमिति। तेन च अचां मध्येऽन्त्यात्परो मिदिति सूत्रार्थ उक्तो भट्टोजिदीक्षितेन तद्व्याख्यातृभिश्च। प्रक्रियाकौमुद्याञ्च अन्त्यादचः परोमिदिति सूत्रार्थ उक्तः। पञ्चमीस्वीकारे सति यत्र अजेव अन्त्यस्तत्रैव मिदागमः सम्भवति, यत्र हलन्तता तत्र तु न सम्भवतीति दीक्षितस्याक्षेपः। निर्धारणे तु अचां मध्येऽन्त्यस्यैवापेक्षितत्वात्सुलभा रूपसिद्धिर्नुमा इति व्याख्यानादिष्वपि। प्रक्रियाकौमुदीव्याख्याने तु सन्निविष्टानामचां मध्येऽन्त्यान्मिदिति विठ्ठलाचार्यः। पञ्चमीपक्षेऽपि षष्ठ्या समर्थितस्तेन दर्शितः। स तु कथमिति यद्यपि व्याख्याकृता नोक्तस्ताप्यूहितुं शक्यः। अन्त्यशब्दस्य सापेक्षत्वात्कस्समुदायो यस्यान्तता विवक्ष्यत इति विचारे प्रत्यासत्त्या अज्घटितसमुदायस्यैवान्त्यादचः परो मिदिति व्याख्यायते। अथ च यथा निर्धारणे समुदायादेकस्य पृथक्करणं भवति, तथैव विशेषणस्यापि स्वेतरव्यावृत्तिफलकत्वात्पञ्चमीषष्ठ्योः समानफलता सिद्ध्यति। तेन अन्त्यादच इति अचामन्त्यादिति फले साम्यादुभयपक्षस्यापि स्वीकारे दोषाभावः निष्कृष्यते। लक्ष्मीटीकाकारेणापि दत्ता दोषा अज्घटितसमुदायस्यान्त्यादिति व्याख्यानस्वीकारे सुकरसमाधानाः भवन्ति। भाष्येऽपि षष्ठीपञ्चम्योरुभयोरुपादानदर्शनेन उभयत्रापि समानगुणतेत्युत्प्रेक्ष्यते। सामानाधिकरण्यानुरोधेन पञ्चमीस्वीकारे लाघवाधिक्यमित्यपि विभाव्यते।

**सन्दर्भग्रन्थसूची :**

चतुर्वेदः, गिरिधरलालः एवं परमेश्वरानन्दशर्मा (सन् १९६१). वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा–तत्त्वबोधिनी–सहिता), प्रथमो भागः. मोतीलाल बनारसीदास, वाराणसी।

ताताचार्यः, रामानुजाचार्यः (सन् २०२०). शाब्दबोधमीमांसा. राष्ट्रिय संस्कृत संस्थानम्, दिल्ली।

त्रिपाठी, जयशङ्करलालः (१९८४).काशिकावृत्तिः. तारा बुक्स एजेन्सी, वाराणसी।

त्रिपाठी, नारायणदत्तः (२०५६). वरदराजाचार्यः – लघुसिद्धान्तकौमुदी. गीताप्रेस, गोरखपुर।

दीक्षित, पुष्पा (सन् २०२१). अष्टाध्यायी सूत्रपाठः. ज्ञानभारती पब्लिकेसन्स, दिल्ली।

नीलेश बोडस. Ashtadhyayi.com (App).

मदनमोहन झा. अष्टाध्यायी सूत्रानुक्रमणिका (App).

विट्ठलाचार्यः (टी.). प्रक्रियाकौमुदी (प्रसादटीकायुता), प्रथमो भागः।

https://archive.org/details/prakriyakaumudi/mode/1up

शास्त्री, द्वारिकादासः एवं शुक्लः, कालिकाप्रसादः (सन् १९६७). काशिकावृत्तिः (न्यास–पदमञ्जरी–सहिता). तारा पब्लिकेसन्स, वाराणसी।

शास्त्री, श्रीभार्गव (सन् २०२३). महर्षिः पतञ्जलिः – व्याकरणमहाभाष्यम्. चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी।

शर्मा, सभापतिः (सन् १९६६). वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीटीकासमेता). मोतीलाल बनारसीदास, वाराणसी।

श्रीमद्भट्टोजिदीक्षितः (सन् २००९). प्रौढमनोरमा (अव्ययीभावान्ता). चौखम्बा संस्कृत संस्थान, वाराणसी।

श्रीमद्भट्टोजिदीक्षितः (सन् २०२३). वैयाकरणसिद्धान्तकौमुदी. चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**धर्मस्वरूपविमर्शः**

विष्णु प्रसाद शर्मा
धर्मशास्त्राचार्य
Gmail: pyuthanivishnu@gmail.com
DOI:

**लेखसारः**

धार्मिकसामाजिकदृष्ट्या धर्मस्य धर्मशास्त्रविषयाणाञ्च समीक्षात्मकाध्ययनं तस्य विश्लेषणं, विवेचनं मुख्यप्रतिपाद्यविषयरुपेण मन्यते। धर्मतत्वसाधनाय च अन्यशास्त्रस्य अपेक्षया धर्मशास्त्रस्य भूमिका महती वर्तते। धर्मतत्वं, धर्मशास्त्रीय मान्यता ये न स्वीकुर्वन्ति धर्मशास्त्रपारगतेन नवीनोदित-आचार्यवर्येण पूर्णरुपेण खण्डिताः सन्ति । तस्य कार्यकुशलता निरर्थको भवति।

धर्मशास्त्रं तु वै स्मृतिः इत्युक्तेः मन्वत्रिविष्णुयाज्ञवल्क्यादीनां स्मृतयः धर्मशास्त्रनाम्ना प्रसिद्धाः सन्ति । तासु मनुस्मृतिः सर्वश्रेष्ठा सर्वज्येष्ठा च मन्यते । एवं प्रकारेण याज्ञवल्क्यस्मृतिः अपि अग्रस्थानं प्राप्यते । अस्य ग्रन्थे आचारव्यवहारप्रायश्चित्तसम्बद्धाः सर्वे विषयाः सरलया गिरा अतिविस्तरेण निरुपिताः सन्ति । धर्मशास्त्रविषयमवलम्ब्य पिपठिषूणां प्रियपाठक-सज्जनवृन्द-जिज्ञासु-शास्त्रानुयायीनां कृते कुल्लूकभट्ट-मन्वर्थमुक्तावलीसहितायाः मनुस्मृतेः, याज्ञवल्क्य-विज्ञानेश्वर-मिताक्षरा-टीका सहितायाः याज्ञवल्क्यस्मृतिग्रन्थाः एवं धर्मशास्त्रविषया समाविष्टाः सन्ति।

धरति लोकान्,ध्रियते पुण्यात्मभिरिति विग्रहे धृधातोः औणादिकमन्प्रत्यये धर्मशव्दो निष्पद्यते। न्यायः, स्वभावः, आचारः, क्रतु इत्यादयोऽस्य पर्यायाः कोशादौ दृश्यन्ते। तत्र अलौकिकश्रेयः साधनत्वेन च विहितक्रियात्वं विहितत्वं वा धर्मत्वमिति स्फुटं प्रतीयते । अतः वर्णधर्मआश्रमधर्मो, वर्णाश्रमधर्मो, गुणधर्मो, निमित्तधर्मः,साधारणधर्मश्चेति षड्विधस्मार्तधर्मविषयो धर्मः इति ज्ञायते । एतद् गुणविशिष्टधर्मप्रतिपादकं शास्त्रमेव धर्मशास्त्रं कथ्यते । आचारव्यवहारप्रायश्चित्तरूपस्तम्भत्रयविवेचनरहितधर्मो दुर्ज्ञेय इति विचार्य सर्वमानवप्राण्युद्दिधीर्षया स्मृतयः काले काले स्मृतिकारैः प्रणीताः सन्ति । तत्र तासु स्मृतिषु मिथिलाभिजनेन महर्षिणा याज्ञवल्क्येन प्रणीता याज्ञवल्क्यस्मृतिः चिरं प्रख्याता वर्तते एव । ग्रन्थेऽस्मिन् आचारव्यवहारप्रायश्चित्तभेदेन त्रयोऽध्यायाः विद्यन्ते । तत्र आचारः परमो धर्मः इति मनूक्तत्वात् विषयस्यास्य कृते निर्धारितोद्देश्यपूरणाय एवासौ लेखसारोपस्थापितः अस्ति।

**शब्दकुञ्जी:-**धारणम्,पुण्यम्,श्रेयः,सुकृतम्,वृषः,सदाचारः,शिष्टाचारः,आचारः,व्यवहारः,अहिंसा,सन्तुष्टिः,धर्मः, प्रमाणम्।

**१. विषयपरिचयः**

धर्मस्य मूलं वेदो मन्यते । मानवानां कर्तव्याकर्तव्यादिधर्माधर्मनिरुपणार्थं महर्षिभिर्वेदस्य उपदिष्ट मार्गेणैव धर्मशास्त्राणां ग्रन्थरचना विहिता। तत्र ब्राह्मणादीनां चतुर्णां वर्णानां जन्मकालाद् आरभ्य अन्त्येष्टिकालपर्यन्तानां विविधानां

धर्माणां विस्तृतं वर्णनमुपलभ्यते । सनातन धर्मे एव धर्मशास्त्रस्य विशेषतो शिष्टाचारस्य,आचारस्य चज्ञानार्जनाय महत्त्वमधिकमस्ति।

अतः सत्यं वद। धर्मं चर। धर्मान्न प्रमदितव्यम्। सनातनवैदिकधर्मे मानवानां संरक्षणार्थं तथा सर्वजनहिताय सर्वजनसुखाय च सर्वेषु वाङ्मयेषु सर्वाधिकं महत्त्वदायकं निमार्णं धर्ममेव मन्यते।

मानवविकासस्य प्रारम्भे मानवा अपि पशुवत् व्यवहारं कुर्वन्ति स्म । मनस्सौन्दर्यज्ञानस्य प्रादुर्भावेन ते प्राणिषु पृथक् वैशिष्ट्ययुताः सञ्जाताः। अस्य मूलकारणं धर्म एव इति प्रमाणीक्रियते।

**२. शोध समस्या**

धर्म एवं धर्मशास्त्र इति शीर्षकोपरि लिखितेऽस्मिन् लेखे विविधाः समस्याः सन्ति । तासु काश्चन समस्याः निम्नलिखिताः सन्ति।

१. किन्नाम धर्म ?

२. किन्तत्स्वरुपम् ?

३. किन्नाम धर्मशास्त्रम् ?

धर्म एवं धर्मशास्त्रस्य मुख्यत्वम् कथं सिद्ध्यति ? इत्यादिजिज्ञासाः समस्यारुपेण समुद्भवन्ति । तेषु धर्मस्यधर्मशास्त्रस्य मुख्यत्वविवेचनं चात्र शोधलेखने उद्देश्यरुपेण स्थापितम्अस्ति।

**३. शोधस्य उद्देश्यकथनम्**

अस्य लेखपत्रस्योद्देश्यं धर्मशास्त्रस्य सम्यक् रूपेणाध्ययनं कृत्वा तत्रोक्तानां समस्यानां यथासम्भवं समाधानं कर्तुमेवास्य शोधपत्रस्योद्देश्यमस्ति। तेन निम्नाङ्कितानिशोधोद्देश्यानि प्रमुखरुपेण समायान्ति। यथा–

(कः- मानवजीवने धर्मस्यावश्यकता समीक्षणम्।

(खः- धर्मस्यस्वरूपं समीक्षणम्।

(गः- धर्मशास्त्रस्यसमीक्षण्।

उपर्युक्तविषयाणामध्ययनं कृत्वा समुचितनिष्कर्षस्यप्रकाशनमेवास्य शोधकार्यस्योद्देश्यमस्ति।

**४. शोधविधिः**

शोधसामाग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगः कृतो वर्तते। तेषु प्रामुख्येन पुस्तकालयविधिरेवात्र सामग्रीसङ्कलने प्रयुक्तः । तत्र चास्मिन् लेखे धर्मशास्त्रविषयप्रतिपादकाः संस्कृतमूलग्रन्थाः प्राथमिकसामग्रीत्वेन गृहीताः सन्ति।

**५. शोधसीमाङ्कनम्**

धर्म एवं धर्मशास्त्रस्योत्पत्तिनिरुपणपूर्वकं धर्मस्य परिभाषाज्ञानविषये विशदः व्याख्याप्रदर्शनं चास्य अनुसन्धान-

कार्यस्य क्षेत्रमस्ति । शास्त्रानुसारेण बह्वंशाः मतमनुसृत्य सङ्क्षेपेण धर्म एवं धर्मशास्त्रविषये व्याख्यानं तद्भेदनिरुपणत्वात् चास्य लेखस्य सीमा वर्तते ।

**६. सैद्धान्तिकाधारः**

धर्मशब्दस्य व्युत्पत्तिः

धर्मः :- पुल्लिङ्गः

निष्पत्ति :- धृञ् धारणे,मन् प्रत्यये

व्युत्पत्ति :- ध्रियते अनेन लोकः । धरति विश्वं वा

प्रयोगः :- धारणाद्धर्म इत्याहुः

धर्मः शब्दः धृञ् धारणे उत वा धृ धातोः ध्रियते लोकोऽनेनेति धरति लोकं वा, धृ धातोः मन् प्रत्यये कृते धर्म शब्दः निष्पन्नो भवति । अस्यार्थः धारणार्थः, पालनपोषण-धार्मिकसंस्कार-आचारव्यवहाकर्म इति अवगम्यते । छान्दोग्योपनिषदि धर्मशब्दस्य प्रथमं यज्ञाध्ययनं, दानं गृहस्थधर्मं, द्वितीयं तपः तृतीयं ब्रह्मचर्यधर्मं उल्लिखितम् । यथा-

त्रिधाधर्मस्कन्धः यज्ञोऽध्ययनं दानमिति । प्रथमस्तपः एकः, द्वितीयो ब्रह्मचारी आचार्याकुले वसन् सर्व एत पुण्यलोकाः भवन्ति, ब्रह्मसंस्थोऽमृतत्वमेति ।' इति छान्दोग्योपनिषद् २.२३.१ ।

धर्मं करोति चेत् शान्तेः प्राप्तिर्भवति । जनकल्याणकारी भवति । इहलोके सुखी भूत्वा परलोके अपि मोक्षप्राप्तिर्भवति ।

याज्ञवल्क्यस्मृतौ – धर्मशब्दः षड्विधस्मार्तधर्मविषयः तद्यथा – वर्णधर्मः आश्रमधर्मः वर्णाश्रमधर्मः गुणधर्मः निमित्तधर्मः साधारणधर्मश्चेति । तत्र यद्यपि धर्मार्थकाममोक्षाः शास्त्रेणानेन प्रतिपाद्यन्ते, तथापि धर्मस्य प्रधानग्रहणम् । यतो:- जपतपस्तीर्थयात्रादिना धर्मनिष्पतिः इति । २ याज्ञवल्क्यस्मृतिः पृस्ठ सं १.२

शब्दकल्पद्रुमे धर्म्मः धर्मशब्देन ( धरति लोकान् ध्रियते पुण्यात्मभिरिति वा । धृ " अतृस्तुहुसृ इतिÆ उणादि सूत्रेण मन् प्रत्ययः । यथा हितोपदेशे उल्लेखानुसारेण च । "एषः श्लोकः मूलतः मनुस्मृतेः उद्धृतः अस्ति ।"

एक एवं सुहृद्धर्म्मो निधनेऽप्यनुयातियः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति ॥ मनुस्मृति (८.१७)

तत्पर्यायः पुण्यम्, श्रेयः, सुकृतम्, वृषः इत्यमरः ।

यथा महाभारते

यथा प्रवर्ग्यं धर्माख्यं यथावत् द्विजसत्तमाः ।
चक्रुस्ते विधिवद्राजंस्तथैवाभिषवं द्विजाः ॥ महाभारत, अध्याय ८९, श्लोक २०

अहिंसा उपनिषत् इति मेदिनी ।

यथा योगसारे :-" प्राणयामस्तथा ध्यानं प्रत्याहारोऽथ धारणास्मरणञ्चैव योगेऽस्मिन् पञ्च धर्म्माः प्रकीर्तिताः ॥

विशेषतः धर्मशब्देन सदाचारः आचारः व्यवहारः अहिंसा धार्मिककृत्य-शुभकर्माणि एवं परलोकसाधकनिमित्तपुण्यकर्माणि च धर्मशब्देन अवगम्यन्ते ।

७. धर्मः लक्षणम्

प्रकृष्टपरमात्मज्ञानरुपधर्मज्ञानाय जगत्कारणं ब्रह्म प्रतिपाद्य अधुना ब्रह्मज्ञानाङ्गभूतं संस्कारादिरूपं धर्मं प्रतिपिपादयिषुः धर्मसामान्यलक्षणं ज्ञापयते। अहिंसा परमो धर्मः। परोपकारः पुण्याय पापाय परपीडनम्। धारणाद् धर्ममित्याहुः धर्मो धारयते प्रजाः। इत्यादि वाक्यांशाः धर्मस्य प्रमुखलक्षणानि स्पष्टं प्रकाशयन्ति। अस्य प्रमाणपुष्टिः अधोनिर्दिष्ट श्लोकानुसारेण भवति।

विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः।
हृदयेनाभ्यनुज्ञातो यो धर्मः तन् निबोधत ॥ मनुस्मृति २।१

विद्वद्भिः ज्ञात इति प्रयुत्पन्ननस्य विशेषणम्। वेदादेव परिज्ञातो धर्म इत्युक्तवान् वृद्धमनुः। हृदयेनाभिमुख्येन ज्ञात इत्यपि निर्दिशन्श्रेयः साधनमित्याह तत्र ह्यभिमुखं मनः। वेदप्रमाणकः श्रेयः साधनं धर्म इत्यतः। मनूक्तमेवधर्मलक्षणं मुनयः प्राणिन्युः। अतः एव हारीत-अनुसारेण यथा :- "अथातो धर्मं व्याख्यास्यामः। श्रुति प्रमाणको धर्मः" इति। मनुस्मृति पृष्ठ ११६।

भविष्यपुराणे च:-

धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयलक्षणम्। स तु षड्विधः प्रोक्तो वेदमूलः सनातनः॥
अस्य सम्यगनुष्ठानात् स्वर्गो मोक्षः च जायते। इह लोके सुखैश्वर्यमतुलं च खगाधिप॥
श्रेयसाधनं इत्यर्थः। भविष्यपुराण अध्याय २, श्लोक १३ र १४।

जैमिनिरपीदं धर्मलक्षणमसूत्रयत् :- चोदनालक्षणार्थो धर्मः। (जै.ध.मी.सू.१.१.२)
वैशेषिकसूत्रानुसारेण यथा:- यतोऽभ्युदयनिश्श्रेयससिद्धिः स धर्मः। (वैशेषिकसूत्रम् १.१.२)
महाभारत शास्त्रानुसारेण :- वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतोपरः।
शिष्टाचारोपरः प्रोक्तः त्रयो धर्माः सनातनाः॥ (महाभारत,अनुशासन पर्व १४१.६५)

एवं प्रकारेण देवीभागवतानुसारेण धर्मसम्बन्धिनां प्रमाणपुष्टिश्लोकः यथा :-

श्रुतिस्मृतिभ्यां कथितं यत् स धर्मः प्रकीर्तितः।
अन्यशास्त्रेण यः प्रोक्तो धर्माभासः स उच्यते॥ (देवीभागवत ७.३९.१५)

एवं प्रकारेण श्रीमद्भागवतमहापुराणानुसारेण धर्म सम्बन्धिनां प्रमाणपुष्टिश्लोका प्रस्तूयन्ते।

वेदप्रणिहितो धर्मो ह्यधर्मः तद्विपर्ययः।
वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम॥ (श्रीमद्भागवत ६.१.४०)

एवं प्रकारेण श्रीस्कन्दपुराणानुसारेण धर्मसम्बन्धिप्रमाणपुष्टिश्लोकः अधोनिर्दिष्टः प्रस्तूयते।

श्रुतिस्मृतिपुराणेषु प्रोक्तो धर्मः सनातनः।
वर्णाश्रमस्वरुपेण निषेव्यः सर्वदा जनैः॥ (स्कन्दपुराण, ब्राह्मखण्ड ३.११.१७)

**८. धर्मप्रमाणम्**

मूलतः धर्मस्य प्रमाणं वेदः अस्ति इत्यस्मिन् विषये न कस्याऽपि मतान्तरम्। वेदविहितानि यानि कर्माणि अस्माकं समाजे प्रचलिता सन्ति तेषां प्रमाणं वेद एव इति। ऋग्यजुसामाथर्वणलक्षणः सर्वोविध्यर्थवादमन्त्रात्मा धर्मे मूलं प्रमाणं वेदः। अथर्वादानामपि विध्येकवाक्यतयास्तवकत्वेन धर्मे प्रामाण्यम् इति।

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ (मनुस्मृतिः२/६)

वेदोऽखिलो धर्ममूलमिति। वेदः ऋग्यजुस्सामाथर्वलक्षणः,स सर्वो विध्यर्थवादमन्त्रात्मा धर्मस्य मूलं प्रमाणम्। वेदस्य च धर्मे प्रामाण्यं यथानुभवकरणत्वरुपं न्यायसिद्धम् भवति। तेनैव यः कश्चित्कस्यचिद् ब्राह्मणादेर्मनुना धर्मोक्तं तत्सर्वं वेदे प्रतिपादितम्। यस्मात्सर्वज्ञोऽसौ मनुना सर्वज्ञतया चोत्सन्नविप्रकीर्णपठ्यमानवेदार्थं सम्यक् ज्ञात्वा लोकहिताय निबद्धवान्।

यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हिः सः ॥ (मनुस्मृतिः २/७)

विशेषतः श्रुत्युल्लिखितधर्मानुसारंयो नर आचरति सः इह लोके धार्मिकत्वेनानुषङ्गिकीं कीर्तिं परलोके च धर्मफलरूपम् उत्कृष्टस्वर्गापवर्गादिसुखं प्राप्नोति। अनेन वास्तवगुणकथनेन श्रुतिस्मृत्यूदितं धर्ममनुतिष्ठेदिति विधिः कल्प्यते। यथा:-

श्रुतिस्मृत्यूदितं धर्ममनुतिष्ठन्हि मानवः।

इह कीर्तिमवाप्नोति प्रेत्यचानुत्तमं सुखम्॥ (मनुस्मृतिः२/९)

वेदो हि धर्मस्य मूलप्रमाणं क्वचित् तु स्मृत्यानुमितप्रमाणं एवं चतुर्विधधर्मप्रमाणसम्बन्धिनां मनुना उल्लिखिता तेषां वेदः, स्मृति, सदाचारः शिष्टाचारः, स्वस्य च आत्मनः सन्तुष्टि एव धर्मे प्रमाणम् इति यथा–

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।

एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥ (मनुस्मृतिः २/१२)

**९. धर्मस्य वेदमूलकता**

वेदादन्येषां वेदमूलत्वेन प्रामाण्येऽभिहितेऽपि मनुस्मृतेः सर्वोत्कर्षज्ञापनाय विशेषेण वेदमूलतामाह। तत्र श्लोकः यथा:-

यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥ (मनुस्मृतिः२/७)

यः कश्चित् कस्यचिद् ब्राह्मणादेः मनुना धर्म उक्तः स सर्वो वेदे प्रतिपादितः स्यात्। यस्मात् सर्वज्ञो मनुः सर्वज्ञतया चोत्सन्नविप्रकीर्णपठ्यमानवेदार्थं सम्यग् ज्ञात्वा लोकहितायोपनिबद्धवान्।

**१०. धर्मस्य हेतवः**

धर्मस्य हेतवः द्विविधाः कारकहेतुः ज्ञापकहेतुश्चेति। याज्ञवल्क्यानुसारेण कारकहेतूनां यस्मिन्देशे मृगाः स्वतन्त्ररूपेण विचरन्ति तस्मिन्देशे यथा शास्त्रविहितसमये सत्पात्रस्य श्रद्धापूर्वकं गवादि यत् द्रव्यं च दीयते तत् धर्मस्य लक्षणम् इति।

देशकाल उपायेन द्रव्यं श्रद्धासमन्वितम्।

पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम्॥ (याज्ञवल्क्यस्मृतिः आचाराध्याय ६)

ज्ञापकहेतूनामिदं धर्मस्य ज्ञापकहेतु सम्बन्धिनां वेदः स्मृति धर्मशास्त्रविहितकर्म सदाचारः शिष्टव्यवहारानुष्ठानं स्वस्य च प्रियमात्मनश्च सन्तुष्टिं, प्रफुल्लितं कृत्वा सम्यक्संकल्पजातकामः कर्माणि च क्रियते तत्सकलं धर्मस्य मूललक्षणं मन्यते इति।

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेश्वमीमांसे ताभ्यां धर्मोहि निर्वभौ॥ (मनुस्मृतिः २/१०)
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्॥ (या०स्मृतिः आचाराध्याय७)

सः पूर्वाचार्यैः निर्दिष्टानि धर्मलक्षणान्यपि मनुः कथयति–

वेदस्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥ (मनुस्मृतिः २.१२)

वेदो धर्मप्रमाणं स क्वचित्प्रत्यक्षः क्वचित्स्मृत्यानुमितः इत्येवं तात्पर्यं न तु प्रमाणपरिगणने। अतः एव श्रुतिस्मृत्यूदितं धर्ममित्यत्र द्वयमेवाभिहितवान्। सदाचारः शिष्टाचारः स्वस्य चात्मानप्रियमात्मतुष्टि एवं चतुर्धा धर्मप्रमाणमाह॥

**११. धर्माधर्मविवेकः**

धर्माधर्मविवेकविषये कुल्लूकभट्टकृत-अन्वर्थमुक्तावलीसहिता मनुस्मृतिः ग्रन्थे अधोलिखितप्रमाणरुपेण श्लोकः प्राप्यते। स चः-

कर्मणां च विवेकार्थंधर्माधर्मौव्यवेचयत्।
द्वन्द्वैरयोजयच्चैमाःसुखदुःखादिभिःप्रजाः॥ (मनुस्मृतिः १.२६)

धर्मो यज्ञादिः,स च कर्तव्यः, अधर्मो ब्रह्मवधादिः, स न कर्तव्यः इति कर्मणां विभागाय धर्माधर्मौ व्यवेचयत् पृथक्त्वेन। धर्मस्य फलं सुखं भवति। अधर्मस्य फलं दुःखं भवति। धर्माधर्मफलभूतैः द्वन्द्वैः परस्परविरुद्धैः सुखदुःखादिभिरिमाः प्रजा योजितवान्। आदिग्रहणात् काम-क्रोध-राग-द्वेष-क्षुत्-पिपासाशोक-मोहादीनांग्रहणं भवति।

**१२. आचारस्य धर्मे प्राधान्यम्।**

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः॥ (मनुस्मृतिः १.१०८)

मानवजीवने धर्मस्य आवश्यकता एवं उपयोगिता अधिकाधिकं वर्तते। धर्मस्य अभावे सति मानवाः,पशुसमानाः भवन्ति। समाजे स्थिरः सुख शान्ति नैव अनुभूयते। वैदिकसनातनधर्मः सर्वेषु प्राचीनः,प्रकृतिसम्मतः, सुदृढः,दार्शनिकाधार-शिला-रुपेण ज्ञायते। शास्त्रं मुख्यरुपेण वेदः अस्ति। शास्त्रोपरि श्रद्धा नभवति चेत् तस्य धार्मिक कार्यं निष्फलो भवति, निरर्थको भवति। निरर्थको भवति चेत् तस्य सारं नैव प्राप्यते। न्यायसंस्थापनार्थं सुखशान्त्यर्थमेव च,लोकेधर्मविचारस्य आवश्यकत्वमिति स्थितिः अनुभूयते। तस्मात् कारणात् धर्मपालनस्य आवश्यकता दृष्टिगोचरो भवति। युक्तो यत्नवान् आत्महितेच्छुः। सर्वस्यात्मास्तीति आत्म शब्देन आत्महितेच्छा लक्ष्यते।

**१३. धर्मशास्त्रस्य परिचयः**

वैदिकधर्मशास्त्रं शाश्वतः ज्योतिरुपेण दृश्यते। वैदिकधर्मशास्त्रेण सामान्यतया लौकिकः, व्यावहारिकः, आधिभौतिकः,

आधिदैविकः एवं आध्यात्मिकः पक्षाणां विषयाणां व्यवस्थां स्वीकुर्वन्ति । धर्मशास्त्रसम्बद्धाः अनेकाः विषयाः प्रामाणिकवचनस्वरुपेण स्वीक्रियन्ते । सर्वे विषयाः शास्त्रसम्बद्धाः भवति । ते विषयाः अन्धविश्वासपूर्ण नैव भवति । अस्य धर्मशास्त्रस्य विशेषता अद्वितीय वर्तते । शिष्यतेऽनेन इति शास् धातोः करणे त्रन्प्रत्ययो भवति । धर्मशासने मन्वादिप्रणीते धर्मप्रतिपादके ग्रन्थभेदे स्मृतिशास्त्रे तस्य कर्तारश्च हेमाद्रिव्रतखण्डे दर्शिताः यथा “ शङ्खलिखितौ स्मृतयो धर्मशास्त्राणि तेषां प्रणेतारो मनु-विष्णु-यम-दक्षाङ्गिरोऽत्रि-बृहस्पत्युशन-आपस्तम्ब-वशिष्ठ-कात्यायन-पराशर-व्यास-शङ्ख-लिखित-संवर्त-गौतम-शातातप-हारीत-याज्ञवल्क्य-प्राचेतसादयः ।

मनुर्यमो वसिष्ठोऽत्रिः दक्षोविष्णुस्तथाङ्गिराः । उशना वाक्पतिर्व्यास आपस्तम्बोऽथ गौतमः ।
कात्यायनोनारदश्च याज्ञवल्क्यः पराशरः । संवर्तश्चैवशङ्खश्च हारीतो लिखितस्तथा ।
एतैर्यानिप्रणीतानि धर्मशास्त्राणि वै पुरा । तान्येवातिप्रमाणानि न हन्तव्यानि हेतुभिः ॥
याज्ञवल्क्य स्मृति ,अध्याय १, श्लोक ४ र ५

“आदिशब्दात्-वृद्धदेवल-सोम-जमदग्नि-प्रजापति-विश्वामित्र-वृद्धशातातप-पैठिनसि-पितामह-बौधायन-च्छागलेय-जाबालि-च्यवन-मरीचि-कश्यपाः “इतिशब्दकल्पद्रुमः । तथाहि भविष्यपुराणे–

“अष्टादशपुराणेषु यानि वाक्यानि पुत्रकः । तान्लोच्य महाबाहो तथा स्मृत्यन्तरेषु च ।
मन्वादिस्मृतयोयाश्च षड्विंशत् परिकीर्तिताः । तासां वाक्यानि क्रमशः समालोक्य व्रवीमिते ।"
भविष्यपुराण– अध्याय २, श्लोक ७ र ८

मन्वादिस्मृतीनां षड्त्रिंशत्वमुक्तम्, तच्चान्तरोक्ताभिरेव पूर्यते । यानि पुनर्महाभारतरामायणविष्णुधर्मशिवधर्मप्रभृतीनि गृह्यपरिशिष्टानि च तानि च स्मृत्यन्तरेषु चेत्यनेनैवोक्तानि तथा चोक्तं भविष्यपुराणे–

“अष्टादशपुराणानि रामस्य चरितं तथा । विष्णुधर्माणिशास्त्राणि शिवधर्माश्च भारत ।
कार्ष्णश्च पञ्चमोदेशे यन्महाभारतंस्मृतम् । सौराश्चधर्मा राजेन्द्र मानवोक्ता महीपते ।
भविष्यपुराण अध्याय २, श्लोक ५ र ६

जयेतिनाम चैतेषां प्रवदन्ति मनीषिण इति ॥ तदपि स्मृत्यनन्तरेषु चैवेत्यनेनैव परिगृहीतं वेदितव्यं हेमाद्रौ व्रतखण्डे । 'चतुर्वर्ग चिन्तामणि' व्रतखण्ड उपोद्घात (प्रस्तावना) पृष्ठ ३ ।

**१४. धर्मशास्त्रप्रवर्तकाः**

अस्माकं सनातनसमाजे धर्मशास्त्रस्य महत्वपूर्णस्थानं वर्तते । प्राचीन समयादेव धर्मशास्त्रीयमान्यतानुसारेणसमाजः परिचालित आसीत् । धर्मशास्त्रस्य व्याख्यातारः वहुधाः सन्ति तेषां नामानि याज्ञवल्क्येन उद्धृताऽस्ति यथा :– मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः । यमापस्तम्बसंवर्ताः कात्यायनबृहस्पतिः ॥ पराशरव्यासशङ्खलिखिता दक्षगौतमौ । शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ (याज्ञवल्क्यस्मृतिः ४.५)

मनुः अत्रिः विष्णुः हारीतः याज्ञवल्क्यः उशनाः अङ्गिराः यमः आपस्तम्बः कात्यायनः बृहस्पतिः पराशरः व्यासः शङ्खः दक्षः गौतमः शातातपः वशिष्ठः इत्येता धर्मशास्त्र प्रयोजकाः सन्ति ।

**१५. धर्मशास्त्रस्य प्रयोजनम्**

सामान्यतया धर्मशास्त्रस्य प्रयोजनं शास्त्रीयज्ञानप्राप्तये तस्य प्रयोगः स्वस्य च कायिकवाचिकमानसिककर्मदोषादि विनाशार्थंञ्च भवति । अतः धर्मशास्त्राध्ययनं कर्तव्यम् इति मनुः कथयतिः विशेषतः शास्त्रविज्ञैः अधिकारिभिः सह धर्मशास्त्रं सम्यक्तया अध्येतव्यम् । स्वः शिष्येभ्यश्च प्रवक्तव्यम् । धर्मशास्त्राध्ययनेन अध्येता कायिकवाचिकमानसिकपवित्रतां प्राप्नोति । वस्तुतस्तु सप्तसप्त परावरान् जनान् उद्धरन्ति ते एव कृष्णस्य जगतः हितकार्यं कर्तुं पारयन्ति यथाः–

विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः । शिष्येभ्यश्च प्रवक्तव्यं सक्यक् नान्येन केनचित् ॥

इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः । मनोवाग्देहजैर्नित्यं कर्मदोषैर्नलिप्यते ॥

पुनाति पंङ्क्तिं वश्याश्च सप्त सप्त परावरान् । पृथिवीमपि चैवेमां कृत्स्नामेकोऽपि सोऽर्हति ॥

(मनुस्मृतिः १/१०३, १०४, १०५ )

तेनैव याज्ञवल्क्यमपि ये इदं धर्मशास्त्राध्ययनं निरन्तरं अनलसो भूत्वा पठन्ति अर्थात् धर्मशास्त्राध्ययनं कुर्वन्ति ते इह लोके कीर्तिं प्राप्नुवन्ति परलोकेऽपि स्वर्गंमोक्षं वा प्राप्नुवन्ति । यदि धर्मशास्त्राध्यायी विद्यार्थी अस्ति चेत् सः सौकर्येणैव विद्यां प्राप्नोति धनार्थी चेत् धनैश्वर्यं प्राप्नोति दीर्घजीवनं कामोऽस्ति चेत् दीर्घजीवनं प्राप्नोति । श्रीकामोऽस्ति चेत् श्रियं प्राप्नोति यथा–

य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः । इह लोके यशः प्राप्य ते यास्यन्ति त्रिविष्टपम् ॥

विद्यार्थी प्राप्नुयाद्विद्यां धनकामो धनं तथा । आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियम् ॥

श्लोकत्रयमपि ह्यस्माद्यः श्राद्धे श्रावयिष्यति । पितृणां तस्य तृप्तिः स्यादक्षय्या नात्र संशयः ॥

ब्राम्हण : पात्रतां याति क्षत्रियो विजयी भवेत् । वैश्यश्च धान्यधनवानस्य शास्त्रस्य धारणात् ॥

(याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्याय ३२९,३३०,३३१,३३२)

**१६. धर्मे श्रुतेः परमप्रमाणत्वम्**

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ।

धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥ (मनुस्मृतिः २.१३)

अर्थकामेष्वसक्तानामर्थकामलिप्साशून्यानां कृते धर्मोपदेशोऽयम् । ये त्वर्थकामसमीहया लोकप्रतिपत्त्यर्थं धर्ममनुतिष्ठन्ति न तेषां धर्मफलम् इत्यर्थः। धर्मं च ज्ञातुमिच्छतां प्रकृष्टं प्रमाणं श्रुतिः । प्रकर्षबोधनेन च श्रुतिस्मृतिविरोधे स्मृत्यर्थो आरणीय एव इति भावः । अत एव जाबालेन उक्तम् :-

श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।

अविरोधे सदा कार्यं स्मार्तं वैदिकवत् सता ॥

जाबालि स्मृति श्लोक संख्या १ (प्रारम्भिक खण्ड)

एवमेव भविष्यपुराणेप्युक्तं श्रुत्या सह विरोधे तु बाध्यते विषयं विना । एवं प्रकारेण जैमिनिना उक्तम्

विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् । श्रुतिविरोधे स्मृतिवाक्यमनपेक्ष्यप्रमाणं न अनादरणीयम् । असति विरोधे मूलवेदानुमानमित्यर्थः । धर्मज्ञानाय मुख्यः साधनरुपेण वेदा एव प्रमुखाः मन्यते ।

**१७. धर्मविमर्शः**

निष्पत्तिः – धृञ् धारणे:- "मन्" प्रत्ययः

व्युत्पत्तिः – ध्रियतेऽनेन लोकः। धरति विश्वं वा

प्रयोगः – "धारणाद्धर्म इत्याहुः"

अर्थ :- यज्ञः, नियमः,न्यायः, कानुनः, धर्मशास्त्रः, इत्यादयः .

'धरति विश्वम्' अस्य अवस्थायां विग्रहे सति 'धृञ्धारणे', भ्वादि उभयपदी इत्यनेन 'अर्तिस्तुसु' इत्यादि उणादि सूत्रेण 'मन्' प्रत्यये,धर्मः शब्द : निष्पन्नो भवति। सनातन धर्मानुसारेण धर्मस्य सगुणः स्वरूपः एवं दर्शयते :-

दक्षिणपार्श्वे अक्षमालाः सहितायाः, वामपार्श्वे पुस्तकः युक्ताः,सर्वाङ्गानि कुण्डलादिनि धारणयुक्ताः,श्वेतवर्णयुक्तः,श्वेतवस्त्रधारी,चत्वारो मुखाः,चत्वारः पादाः, चत्वारःबाहवः,एवं शरीरयुक्तस्वरूपः धर्मः कथ्यते।

"चतुर्वक्त्रश्चतुष्पादश्चतुर्वाहुः सिताम्बरः।
सर्वाभरणवान्श्वेतो धर्मः कार्यो विजानता ॥
दक्षिणे चाक्षमाला च तस्य वामे तु पुस्तकम् ॥

विष्णुधर्मोत्तर पुराण (तृतीय खण्ड, अध्याय ४२)

विष्णुधर्मोत्तरहरिवंशानुसारेण धर्मस्य चत्वारः पादाः सन्ति । ते सर्वे चत्वार आश्रमेषु उद्धृताः सन्ति । ब्रह्मचर्याश्रमस्य स्वाध्यायः, गृहस्थाश्रमस्य पवित्रता, वानप्रस्थ-आश्रमस्य गौरवान्वितः तपस्या एवं संन्यासाश्रमस्य ज्ञानमिति महावाण्यामपि विचारः क्रियते।

पादा धर्मस्य चत्वारो यैरिदं धार्यते जगत्।
ब्रह्मचर्येण व्यक्तेन गृहस्थेन च पावनाः ॥
गुरुभावेन वाक्येन गुरुमार्गानुगामिना।
इत्येते धर्मपादाः स्युः स्वर्गहेतोः प्रचोदिताः ॥

विष्णुधर्मोत्तर पुराण द्वितीय खण्ड (अध्याय २), श्लोक ३ र ४।

हरिवंशः- हरिवंशानुसारेण धर्मस्य पंच पादाः सन्ति। तेषु मध्येसत्ययुगे चत्वारपादात्मको धर्म आसीत्, एकपादात्मको अधर्मः आसीत्। त्रेता युगे तृतीयपादात्मको धर्म आसीत्। तत्र द्वितीयपादात्मको अधर्मः आसीत्। द्वापरयुगेद्वितीयपादात्मको धर्म आसीत्। तत्र तृतीयपादात्मको अधर्मः। एवं प्रकारेण कलियुगे एकपादात्मको धर्मः भवति। चतुष्पादात्मकोऽधर्मः ॥

सत्ये तत्र धर्मश्चतुष्पादो ह्यधर्मः पादविग्रहः।
त्रेतायां द्वाभ्यामधर्मः पादाभ्यां त्रिभिर्धर्मो व्यवस्थितः ॥
द्वापरे द्वाभ्यां धर्मःस्थितः पद्भ्यामधर्मस्त्रिभिरुत्थितः।
कलौ तत्राधर्मश्चतुष्पादः स्याद्धर्मः पादविग्रहः ॥

'चतुर्वर्ग चिन्तामणि' 'परिभाषा-प्रकरण' (हरिवंश पुराण, भविष्य पर्व, अध्याय ३, श्लोक २०-२२)।

वैशेषिकदर्शनानुसारेण

"अभ्युदयः एवं मोक्षस्य सिद्धिः यः कर्मस्य भवति सः धर्मं जानीम। 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'। वैशेषिक दर्शन

(महर्षि कणाद कृत) अध्याय १, आह्निक १, सुत्र २ ।

न्यायनुदर्शनासारेण

“वेदनिर्देशितकर्मणः सम्पादनं भवति चेत् सः धर्म कथ्यते । ‘विहितकर्मजन्यो धर्मः’ । न्याय-वैशेषिक दर्शनको प्रसिद्ध ग्रन्थ 'तर्कसंग्रह' पृष्ठ ६० ।

जैमिनिसूत्रानुसारेण –

“चोदनालक्षणोऽर्थोधर्मः”यः कोपि विधान स्पष्टं भवति सः प्रमाणवाक्य लक्षणसम्बन्धीनः अर्थस्य धर्मः कथ्यते ।

(हेमाद्रिको व्रतखण्डको 'परिभाषा प्रकरण' मा प्रायः पृष्ठ २-५) ।

अमरकोशानुसारेण –

वेदनिर्देशितसदाचारः एवं यज्ञयागादिकर्म क्रियते चेत् धर्मः भवति । ‘श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः’ । (अमरकोश (नामलिङ्गानुशासन)प्रथम काण्ड)।

याज्ञवल्क्यस्मृत्यनुसारेण – धर्मस्य लक्षणम्

देशः :- यस्मिन् देशे कृष्णसारमृगः स्वच्छन्दो भूत्वा चरति तस्मिन्देशे, अर्थात् हिंसात्याचार इत्यादिरहितो देशः । याज्ञवल्क्य स्मृति प्रथम अध्याय (आचाराध्याय), श्लोक २ ।

कालः :-सङ्क्रान्ति, जन्माष्टमीः इत्यादिना पर्व, उत्सव सहिताः दिवसः ।

उपायः :- धर्मशास्त्रेण निर्दिष्टकर्मसम्पादनविधिः:- एवं ।

द्रव्यम् :- अन्यजनानां बाधावरोधरहितेन प्राप्तं धनं, प्रेमः,सद्भावः, श्रद्धा सहितेन कृतं दानं, दानं ग्रहणं वाइत्यवस्थायां धर्मस्य लक्षणं स्पष्टं भवति । एवं स्व-आत्मसन्तुिष्टिकर्म,प्रियकर्म, शास्त्रसंबद्धकर्म इति उल्लेखितो वर्तते ।

देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् । पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥

(याज्ञवल्क्यस्मृतिः आचाराध्यायः ६/७)

राजा रन्तिदेवेन राज्यं,स्वर्गं, मोक्षं च नैव स्वीकृता दुःखीजनानां, दुःखशान्तिहेतोः स्वात्मप्रियधर्मः स्वीकृतः ।

न त्वहं कामये राज्यं न स्वर्ग नपुनभर्वम् ॥

कामये दुःखतप्तानां प्राणिनामर्तिनाशनम् ॥

श्रीमद्भागवत पुराण नवम स्कन्ध (९औँ स्कन्ध), अध्याय २१, श्लोक १२ ।

शास्त्रसंबद्धं कर्म ये कुर्वन्ति ते धर्मकर्तारः भवन्ति । उक्तं हि यथा:-

न प्रवक्ष्यामि पुरुषं भ्रातककनन्याँश्च पार्थिवान् ॥

स्थितो निदेशे ज्ञातीनां योक्ष्ये तत् समुदाहरन् ॥

महाभारत उद्योग पर्व श्लोक उद्योग पर्व को अध्याय ३, श्लोक १७ ।

विष्णुधर्मोत्तरानुसारेण –

धर्मलक्षणविषये – यज्ञः, तपः, दानं, दया, क्षमा, अहिंसा, सत्यं, तीर्थसेवा, स्वाध्यायः, सत्सङ्गः, देवपूजा, गुरु–मातृ–पितृसेवा, ब्राह्मणसेवा, इन्द्रियनिग्रहः, ब्रह्मचर्यपालनम्, अमात्सर्यः, गङ्गास्नानम्, हरिहरपूजनं, नारायणध्यानम् एवं

आत्मचिन्तनम् इत्यादीनां विषयाणां उल्लेखः दृश्यते।

हिंसा त्यागस्तथा सत्यं तीर्थानुसरणं शुभम्। स्वाध्यायसेवा साधूनां सहवासः सुरार्चनम्॥
गुरूणां चैव शुश्रूषा ब्राह्मणानां च पूजनम्। इन्द्रियाणां जयश्चैव ब्रह्मचर्यममत्सरम्॥
गङ्गास्नानं हरिहराभ्यर्चनं स्वात्मचिन्तनम्। ध्यानं नारायणस्यैतत् संक्षेपाद्धर्मलक्षणम्॥

विष्णुधर्मोत्तर पुराण खण्ड: द्वितीय खण्ड अध्याय: अध्याय २५ श्लोक संख्या: ६, ७ र ८

मनुस्मृत्यनुसारेण–

धर्मस्य लक्षण विषये चर्चा क्रियते। सर्वेजनाः सुरक्षिताः सन्ति। धर्मः स एवोच्यते यस्मान्मानव इहलोके सुखं शान्तिं सौमनस्यमनुभवति चेत् मरणानन्तरं परलोके च कर्मानुरुपं स्वर्गं मोक्षं वा लभते,स धर्मः कथ्यते। धर्मेणैव प्रजायाः रक्षा भवति। "धारणाद्धर्म इत्याहुर्धर्मो धारयते प्रजाः" इति मनुः। धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः। तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतो वधीत्॥ मनुस्मृति, अध्याय ८, श्लोक १५।

विज्ञानेश्वरमतेन :-

अत्र च धर्मशब्दः षड्विधस्मार्तधर्मविषयः । तद्यथा वर्णधर्म, आश्रमधर्मो,वर्णाश्रमधर्मो,गुणधर्मो,निमित्तधर्मः,साधारणधर्मश्चेति । तत्र 'वर्णधर्मो –'ब्राह्मणो नित्यं मद्यं वर्जयेदित्यादिः । 'आश्रमधर्मो – 'अग्नीन्धनभैक्षचर्यादिः ।' 'वर्णाश्रमधर्मः – 'पालाशो दण्डो ब्राह्मणस्येत्येवमादिः' । 'गुणधर्मः'– 'शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः' । 'निमित्तधर्मो' – 'विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तम्' । 'साधारणधर्मः' – 'साधारणधर्मोऽहिंसादिः ।' न हिंस्यात्सर्वा भूतानी त्याचाण्डालं साधारणो धर्मः ॥ याज्ञवल्क्य स्मृति (याज्ञवल्क्य स्मृति मिताक्षरा टीका)अध्याय: १(आचाराध्याय)प्रकरण: उपोद्घात (प्रस्तावना/भूमिकाखण्ड)।

**निष्कर्षः:-**

पौरस्त्यवाङ्मये धर्मशास्त्रस्य स्थानं विशिष्टतमं वर्तते। आलेखेऽस्मिन् धर्म एव धर्मशास्त्रत्त्वं धर्मसामान्यलक्षणमिति विचार्य तस्य विमर्शत्वे सति धर्म एवं धर्मशास्त्रस्य आवश्यकत्वमित्यपि विवेचितम्। ततो गुणदोषभिन्नत्वे सति अस्य अपरिहार्यता एवं धर्मः,धर्मशास्त्रस्य अभावे सति किम् भवति ? अस्य कर्मत्वमित्यपि धर्मलक्षणं सम्यक् प्रकारेण विवेचितम्। मानवीयजीवनस्य यथार्थचित्रणेनास्य धर्मशास्त्रानि पाठकजनानां,अनुयायिनानां कृते प्रियतमानि सन्ति । वेदानां रक्षार्थं यज्ञसम्पादनार्थं धर्मशास्त्रमध्येयम् । अर्थात् धर्मशास्त्रं अध्ययेनेन वेदरक्षापि भविष्यति,मानवजीवनस्य सारमपि प्राप्यते । पौरस्त्यवाङ्मये आर्षसंप्रदायानुमताविद्या विद्यास्थानमितिपदेनाप्यभिधीयत इति प्रसिद्धम् । तानि चविद्यास्थान-प्रमाणानि श्लोकानि यथा :-

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥ (महाभारतम् १.६६.७)

इति प्रसिद्धानि चतुर्दशसंख्यकानि विद्यास्थानानि ऋषिभिः परिगणितानि । अतः धर्मशास्त्राध्ययनं विना विद्यासिद्धिः नैव भवति। आचारः विषयस्य साङ्गोपाङ्गस्वरुपेण प्रतिपादनं यः शास्त्रः करोति तस्य नामः धर्मशास्त्रः इति।धर्मशास्त्रेषु धर्मो द्विविध कथितः। वैदिक धर्मः स्मार्तधर्मश्चेति। वैदिकधर्मत्वेबहुदेववादी यज्ञ एव प्रधानधर्मः आसीदिति वेदविदो वदन्ति।

यज्ञसंस्था तेषां धर्मस्याविभाज्यमङ्गमिति मन्यते । यत्र वैदिकमन्त्राणां प्रयोगेणैव यज्ञसम्पादनं विधीयते । स्मार्तधर्मोषड्विधो निगदितः । ते च यथा:- वर्णधर्मः,आश्रमधर्मः,वर्णाश्रमधर्मः,गुणधर्मः, निमित्तधर्मः,साधारणधर्मश्चेति ।
अतः एतद् गुणविशिष्टधर्मप्रतिपादकं शास्त्रमेव धर्मशास्त्रम् ।

**कृतज्ञताज्ञापनम्**

अस्मिन् आलेखे धर्मस्वरूपविमर्शः स्वरूपविश्लेषणक्रमे, सैद्धान्तिकविषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विषयविज्ञेभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् हार्दिकीं कृतज्ञतां व्यनज्मि ।

**शोधसन्दर्भग्रन्थसूची**

१. आपस्तम्बधर्मसूत्रम्, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी १ ई. १९६९ ।
२. उपाध्याय काशीनाथविरचित धर्मसिन्धुः खेमराज श्रीकृष्णदास प्रकाशन बम्बई ई. २००५ फरवरी ।
३. कमलाकरभट्टकृतेनिर्णणसिन्धौ नारायण राम आचार्य काव्यतीर्थ इत्यनेन निरपव्यादिभिरलंकार संस्कृत चौखम्बा विद्याभवन वाराणसी २००१ ।
४. गौतमधर्मसूत्राणि चौखम्वा संस्कृतसिरीज अफिस वाराणसी, २०२३ ।
५. चूडोपनयन विधि : बम्बई पुस्तकल भवन, कचौडी गली वाराणसी २०४८ ।
६. दैवज्ञवाचस्पति श्रीवासुदेवः, पराशरस्मृति, चौखम्बा अमरभारती प्रकाशन, वाराणसी १९८३ ।
७. दैवज्ञनारायणविरचित, मुहूर्तचिन्तामणि, पीयूषधारा व्याख्या चौखम्बा सुरभारती प्रकाशन वाराणसी ई. २००० ।
८. दैवज्ञनारायण विरचित, मुहूर्तमार्तण्डः चौखम्वा विद्याभवन, वाराणसी २००९ ।
९. पराशरस्मृति माधवचार्यकृता पराशरमाधवीय संहिता, चौखम्बा संस्कृत सिरीज अफिस वाराणसी, २०२३ ।
१०. पारष्करगृह्यसूत्रम् गुजरातीमुद्रणालयाधिपति, मुम्बई ।
११.बृहदारण्यकोपनिषद् (सानुवाद शाङ्करभाष्यहित:-, गीताप्रेस गोरखपुर सं २०२९ ।
१२. भट्टकुल्लुक, मनुस्मृतिः मोतिलाल वनारसीदास, वाराणसी ई. १९८३ ।
१३. श्रीमद्भागवद्गीता गीताप्रेस गोरखपुर, २०६६ ।
१४. श्री माधवचार्येण विरचिता जैमिनीयन्यायमाला स्वमीशैलाभिजनः विरचित एवाभिनाथार्यः वम्वई १९८३ ।
१५. श्रीमहर्षि वौधायन प्रणीतं चौखम्वा संस्कृत संस्थान वाराणसी, २०४७ ।
१६. श्रीमहर्षि याज्ञवल्क्य प्रणिता याज्ञवल्क्यस्मृतिः, विज्ञानेश्वरमिताक्षराव्यख्याः चौखम्वा संस्कृत प्रतिष्ठान, दिल्ली ।
१७. डा. लक्ष्मीकान्त पन्थी हिन्दुसंस्कार परिचय र विमर्श, रत्नपुस्तक भण्डार काठमाण्डौ ।
१८. वाचस्पत्यम्, शब्दकल्पद्रुमः ।
१९. महाभारत,गोरखपुरः गीताप्रेस, सन् १९५१ ।
२०.हेमाद्रि (पण्डित हेमाद्रि पन्त)'चतुर्वर्ग चिन्तामणि' चौखम्बा संस्कृत संस्थान , वाराणसी सन् १९८५ (वि.सं. २०४२) ।
२१.श्रीमद्भागवत पुराण गीताप्रेस गोरखपुर, २०६६ ।

Sharada Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : xxxx-xxxx

**ऋतुविचार खण्डकाव्यमा वक्रोक्ति**

हरिप्रसाद खतिवडा
सहप्राध्यापक
शारदा विद्यापीठ, महेन्द्रनगर
Gmail: hariprasadkhatiwada1@gmail.com
DOI:

**लेखसार**

प्रस्तुत शोधलेख कविशिरोमणि लेखनाथ पौड्यालद्वारा रचित ऋतुविचार खण्डकाव्यमा प्रयुक्त वर्णविन्यास वक्रतामा केन्द्रित रहेको छ । ऋतुविचार खण्डकाव्य ६०६ श्लोकमा संरचना गरिएको मझौला आकारको प्रसिद्ध कृति हो । यो काव्य पात्रका जीवनको एक खण्डलाई आधार मानेर सृजना गरिएको नभई एक वर्षको समयावधिलाई आधार मानिएको छ । यसको विषयवस्तु शृङ्खलाबद्ध नभई एक अर्का श्लोकमा समन्वय नभएको हुँदा यसलाई कोषकाव्यको संज्ञा दिएको पाइन्छ । यस काव्यलाई वक्रोक्तिका प्रमुख छ भेदहरूमध्ये वर्णविन्यास वक्रताका आधारमा अध्ययन गरिएको छ । वर्णविन्यास वक्रताका एकवर्णविन्यास वक्रता, द्विवर्णविन्यास वक्रता, बहुवर्णविन्यास वक्रता, वर्गान्तयोगीस्पर्शवर्ण वक्रता, तलनादिद्वित्ववर्ण वक्रता, रकारादिसंयुक्तवर्ण वक्रता र यमक तथा यमकाभास वक्रता आधारमा विश्लेषण गरिएको छ । एउटा वर्ण पुनरावृत्ति भएर चमत्कार सृजना गर्ने एकवर्णविन्यास वक्रता हो भने दुईवटा वर्णको पुनरावृत्तिबाट उत्पन्न चमत्कार द्विवर्णविन्यास वक्रता हो । त्यसैगरी तीनवटा वर्ण पुनरावृत्ति भई चारुता सृजना गर्ने बहुवर्णविन्यास वक्रता हो । यी तीनै प्रकारका व्यवधान र अव्यवधान गरी उपभेद रहेका पाइन्छन् । व्यवधानबिना पुनरावृत्ति भएमा व्यवधानरहित र व्यवधान भएर उत्पन्न चमत्कारलाई व्यवधानयुक्त भनिन्छ । त्यसैगरी संयुक्त वर्णहरूको योग भई चमत्कार सृजना भएमा वर्गान्तयोगी भनिन्छ भने त, ल, न वर्णको उत्पन्न चमत्कारलाई तलनादि भनिन्छ । य, व, र, ल, श, क्ष, स, हसँग 'र' वर्ण लागेर संयुक्तवर्ण भई काव्यमा चारुता सृजना भएमा रकारादि संयुक्तवर्ण वक्रता भनिन्छ । सार्थक र निरर्थक वर्ण समूह पुनरावृत्ति भई सौन्दर्य उत्पन्न भएमा यमक वक्रता हुन्छ भने स्वरवर्ण फरक भई पुनरावृत्ति भएमा यमकाभास वक्रता हुन्छ । अतः ऋतुविचार खण्डकाव्यमा वर्णविन्यास वक्रताको कुलतापूर्वक प्रयोग भई काव्य उत्कृष्ट रहेको निष्कर्ष निकालिएको छ ।

**शब्दकुञ्जी :** कोषकाव्य, चारुता, भङ्गीभणिति, राजानक, वक्रता ।

**विषयपरिचय**

प्रस्तुत आलेखमा कविशिरोमणि लेखनाथ पौड्यालको ऋतुविचार खण्डकाव्यमा वर्णविन्यासगत वक्र

ता‍को विश्लेषण गरिएको छ । जसमा सर्वप्रथम वक्रोक्तिको सामान्य परिचय दिँदै वर्णविन्यास वक्रताको परिचय र यसका प्रकारहरूलाई चिनाउने काम गरिएको छ । साथै एकवर्णविन्यास वक्रता, द्विवर्णविन्यास वक्रता, बहुवर्णविन्यास वक्रता, वर्गान्तयोगी स्पर्शवर्णविन्यास वक्रता, तलनादि द्वित्ववर्ण वक्रता, रकारादि संयुक्तवर्णविन्यास वक्रता, यमक र यमकाभास वक्रताको विश्लेषण गरिएको छ । यसरी विश्लेषण गर्दा उक्त काव्यका प्रत्येक ऋतुबाट आवश्यकताअनुसार श्लोकहरूलाई लिइएको छ । यसका अतिरिक्त वर्णविन्यास वक्रताका कुन कुन रूपको बढी र कुन कुन रूपको कम प्रयोग गरिएको छ भन्ने कुरा अध्ययन गरिएको छ । यसका साथै वर्णविन्यास वक्रताले ऋतुविचार खण्डकाव्यमा के कस्तो चामत्कारिक अवस्था सृजना गरी सुन्दरता प्रदान गरेको छ, सो कुराको समेत विश्लेषण गरिएको छ ।

**समस्याकथन**

प्रस्तुत लेखमा निम्नलिखित समस्याहरू रहेका छन् :

क) ऋतुविचार खण्डकाव्यमा के कस्ता वर्णविन्यास वक्रताको प्रयोग गरिएको छ ?

ख) ऋतुविचार खण्डकाव्यमा वर्णविन्यास वक्रताका प्रयोगले के कस्तो सुन्दरता प्रदान गरेको छ ?

**लेखको उद्देश्य**

ऋतुविचार खण्डकाव्यमा वर्णविन्यास वक्रताको अध्ययन गर्नका लागि निम्नलिखित उद्देश्यहरू रहेका छन् :

क) ऋतुविचार खण्डकाव्यमा प्रयुक्त वर्णविन्यास वक्रताको विश्लेषण गर्नु,

ख) ऋतुविचार खण्डकाव्यमा वर्णविन्यास वक्रताले सृजना गरेका सुन्दरताको विश्लेषण गर्नु ।

**अध्ययनविधि**

ऋतुविचार खण्डकाव्य (६०६ श्लोक) लाई र कुन्तकको वक्रोक्तिजीवितम् लाक्षणिक ग्रन्थलाई यस अध्ययनको प्राथमिक सामग्रीका रूपमा लिइएको छ भने वक्रोक्तिसम्बन्धी टीका, वर्णविन्यासका आधारमा गरिएका अन्य आलेख, समीक्षात्मक लेखहरूलाई द्वितीयक सामग्रीका रूपमा लिइएको छ । साथै व्याख्या विश्लेषणका क्रममा मूलतः निगमनात्मक र आवश्यकता अनुसार आगमनात्मक विधिको प्रयोग गरिएको छ ।

**सैद्धान्तिक आधार**

राजानक कुन्तकद्वारा प्रतिपादित वक्रोक्तिवादको वर्णविन्यास वक्रता नै यस आलेखको सैद्धान्तिक आधार रहेको छ ।

## ऋतुविचार खण्डकाव्यमा वक्रोक्ति

### वक्रोक्तिको ऐतिहासिक पृष्ठभूमि

वक्रोक्तिकाव्यजीवितम् ग्रन्थमा वक्रोक्ति सिद्धान्तलाई विशद रूपमा चर्चा गरिएको छ । जसमा वक्रोक्तिसम्बन्धी कारिका, वृत्ति र उदाहरणहरू प्रस्तुत गरिएका छन् । उक्त ग्रन्थमा चारवटा उन्मेष वा अध्याय रहेका छन् । जसमध्ये तेस्रो र चौथो उन्मेष केही खण्डित अवस्थामा रहेको छ भने बाँकी दुईवटा पूर्ण रहेका छन् । पहिलो उन्मेषमा काव्यको लक्षण, काव्यको प्रयोजन, वक्रोक्तिको स्वरूप, मार्ग र गुण तथा वक्रोक्तिका छ वटा भेदहरूको सामान्य चर्चा गरिएको छ भने द्वितीय उन्मेषमा वर्णविन्यास वक्रता, पदपूर्वार्ध वक्रता, पदपरार्ध वक्रता र अव्युत्पन्न वक्रताका भेदोपभेदको चर्चा गरिएको छ । यसैगरी तृतीय उन्मेषमा वाक्य वक्रताका भेदहरू सहजा, आहार्य, चेतनवस्तु र अचेतनवस्तु, स्वभाव प्रधान, रस प्रधान र लोकव्यवहार प्रधानको चर्चा गरिएको छ भने चौथो उन्मेषमा प्रकरण वक्रता र प्रबन्ध वक्रताको चर्चा गरिएको छ । यस काव्यमा प्रयुक्त कारिका र वृत्ति कुन्तकका आफ्नै हुन् भने उदाहरणहरू पूर्वाचार्यका कृतिहरूबाट साभार गरिएका छन् ।

वक्रोक्तिवादका प्रवर्तक कुन्तक हुन् । उनले यो सिद्धान्तलाई व्यापक रूपमा अध्ययन गरेर स्थापना गरेका हुन् । यो सिद्धान्त स्थापना गर्दा पूर्ववर्ती आचार्य भामह, दण्डी, वामन, रुद्रट आदि विद्वान्हरूको प्रभाव प्रशस्तमात्रामा ग्रहण गरेका छन् ।  सर्वप्रथम भरतमुनिका उपमा, रूपक, दीपक, यमक अलङ्कारलाई भामहले उन्चालिसवटा अलङ्कारमा परिणत गरेका हुन् । उनले अतिशयोक्ति सबैभन्दा मूल अलङ्कार हो र त्यो अतिशयोक्ति नै वक्रोक्ति हो भनेका छन् । सबै अलङ्कारको मूलमा वक्रोक्ति रहन्छ, वक्रोक्तिबिना कुनै अलङ्कार सृजना हुँदैन । यसका लागि कविले यत्न गर्नुपर्दछ । पूर्वीय काव्यमान्यतामा भामहदेखि आनन्दवर्धनसम्मका विद्वान्हरूले वक्रोक्तिलाई कसैले विशेषरूपमा र कसैले सामान्य रूपमा मान्दै आएको पाइन्छ । यी आचार्यहरूका सिद्धान्तहरूबाट केही प्रभाव ग्रहण गर्दै आचार्य कुन्तकले आधारभूत सिद्धान्तका रूपमा वक्रोक्तिवादको स्थापना गरेका हुन् । उनले काव्यको आत्मा वक्रोक्ति हो भन्दै वक्रोक्तिको स्थापना गरेका हुन् । यस सिद्धान्तले साहित्यका वर्ण, पद, वाक्य, प्रकरण, प्रबन्ध आदि सबै तहहरूको सूक्ष्म रूपमा विश्लेषण गर्दछ ।  कारण उनले रस, अलङ्कार, रीति, गुण, ध्वनिलाई वक्रोक्ति भित्रै समेटेका छन् । जसका कारण उनको यो सिद्धान्त नवीन, व्यापक, समन्वयात्मक र मह  वपूर्ण रहेको छ । यो सिद्धान्तको उत्तरवर्ती आचार्यहरूले धेरथोर मात्रामा ग्रहण गरेका छन् ।

वक्रोक्ति उत्तर अवस्था

एघारौँ शताब्दीको पूर्वार्धमा कुन्तकले वक्रोक्तिवादको स्थापना गरेपछि केही आचार्यहरूले यसलाई समर्थन गर्दै अगाडि बढे भने केही आचार्यहरूले यसको विरोध गरेको पाइन्छ । कुन्तकले मानेजस्तो काव्यको सर्वस्वचाहिँ कसैले पनि मानेको पाइँदैन । सर्वप्रथम ध्वनिविरोधी आचार्य महिम भट्टले वक्रोक्तिको विरोध गरेका छन् । उनले ध्वनिकै समान वक्रोक्तिका पनि भेद उपभेद रहेका र उदाहरण पनि तिनै दिइएका हुँदा वक्रोक्तिलाई ध्वनिसिद्धान्तकै अर्को रूप मानेका छन् । अतः ध्वनि जस्तै वक्रोक्ति पनि अनुमितिमा समाहित हुने कुरा बताएका छन् । उनी भन्छन् : ध्वनिवदेषापि वक्रोक्तिरानुमानिकम् ।

(व्यक्तिविवेक, १ / ७०) त्यसपछि आचार्य भोज देखा पर्दछन् । उनी सम्पूर्ण काव्यलाई वक्रोक्ति, रसोक्ति र स्वभावोक्ति गरी तीन भागमा विभाजन गर्न पुग्दछन् । यी तीनमध्ये रसोक्तिलाई बढी महत्व दिन्छन् । यसबाट पनि उनी वक्रोक्तिभन्दा रस महत्वपूर्ण हो भन्ने मान्दछन्, यो कुरा प्रमाणित हुन पुग्दछ । भोजका भनाइलाई उद्धृत गर्दै बराल भन्छन् :

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम् ।

सर्वासु ग्राहिणतासुरसोक्ति प्रतिजानिते ॥ (बराल, २०५५, पृ. ७३६)

त्यसपछि आचार्य विश्वनाथ ध्वनिसम्बन्धी आफ्नो धारणा राख्दछन् : वक्रोक्ति काव्यको आत्मा हो भन्ने वक्रोक्तिजीवितम्को भनाइ बेठिक ठहर्दछ, किनभने वक्रोक्ति वक्र अलङ्कार मात्र हो अर्थात् एतेन वक्र ोक्ति काव्यजीवितम् इति वक्रोक्तिजीवितकारोक्तमपि परास्तम् । वक्रोक्तेरलङ्काररूपत्वात् । (विश्वनाथ, १ / २) यसैगरी अन्य आचार्यहरू रुद्रट, मम्मट, अप्पयदीक्षित, जगन्नाथ आदि आचार्यहरूले पनि वक्र ोक्तिलाई एउटा अलङ्कारका रूपमा स्वीकार गरेका छन् । नेपाली विद्वान् सोमनाथ सिग्देल वक्रोक्तिसम्बन्धी धारणा राख्ने सन्दर्भमा भन्दछन् : कविले शब्दको उपेक्षा गरी अर्थमामात्र किं वा अर्थको उपेक्षा गरी शब्दमा मात्र कुशलता देखाएर मात्र हुँदैन । दुवैमा वक्रता अर्थात् चमत्कारी पना देखाउन सकेमात्र त्यो रचना काव्य श्रेणीमा पर्दछ । चमत्कारी बनाउनका लागि वक्रोक्ति
हुनुपर्दछ । (बराल, २०५५, पृ ७४०) उनका यो भनाइले पनि वक्रोक्तिको महत्तालाई दर्साउँछ । कुन्तकले स्थापना गरेको वक्रोक्ति सिद्धान्त उत्तरवर्ती आचार्यहरूले सामान्यरूपमा लिएको हुँदा सोहीअनुरूप मात्र चल्न सक्यो । यति भएर पनि एक विशिष्ट सिद्धान्तका रूपमा वक्रोक्तिवादी सिद्धान्त स्थापना रहिरहेको पाइन्छ ।

आचार्य कुन्तकको जन्मसमय र जन्मस्थानका बारेमा स्पष्ट रूपमा उल्लेख गरिएको पाईंदैन । उनी पूर्वका आचार्यहरूले उल्लेख गरेका भनाइहरूलाई आधार मानेर यहाँ अध्ययन गरिएको छ :

## वक्रोक्तिको परिचय

वक्रोक्ति शब्दको व्युत्पादन हेर्ने हो भने वक्र र उक्ति शब्दमा गुण सन्धि भएर बनेको पाइन्छ । वक्र ाक भनेको टेढो, मेढो, घुमाउरो र उक्ति भनेको भनाइ वा कथन हो । यसरी वक्रोक्तिको शाब्दिक अर्थ घुमाउर ो भनाइ वा टेढोमेढो भनाइ वा कुटिल भनाइ भन्ने रहेको हुन्छ । शास्त्रीय दृष्टिबाट चाहिँ यसको तात्पर्य शास्त्र एवं लोकव्यवहारमा प्रसिद्ध उक्तिभन्दा विलक्षण तथा चमत्कार पूर्ण अर्थ बुझाउनु रहेको हुन्छ । वक्रोक्तिमा विचित्र उक्ति पाइने हुँदा यसलाई विचित्रोक्ति पनि भनिन्छ । (शर्मा, लुइँटेल, २०६३, पृ. ९५) यसलाई अझ व्यापक रूपमा हेर्दा वक्रोक्ति भनेको घुमाउरो वा परिहासपूर्ण, चातुर्यपूर्ण, विनोदात्मक र आह्लादात्मक उक्ति भन्ने बुझिन्छ । साथै वक्रोक्ति नै काव्यको प्राण हो भन्ने ठहर यिनको रहेको छ । (पौ डेल, २०६८, पृ. ६०४) यस प्रकार वक्रोक्तिलाई विभिन्न आचार्यहरूले विशेष अर्थमा अर्थ्याएका छन् ।

वक्रोक्ति प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा । कीदृशी वैदग्ध्यभङ्गीभणितिः । वैदग्ध्यं

विदग्धभावः कविकर्म कौशलं तस्य भङ्गी विच्छित्तिः, तया भणितिः विचित्रै वाभिध वक्रोक्तिरित्युच्यते । (कुन्तक, २०४७, पृ ४८) अर्थात् वक्रोक्ति कथनभन्दा भिन्न प्रकारको विचित्र अभिधा हो । चतुरतापूर्ण कवि कर्मकौशलद्वारा प्रस्तुत गरिएको चारुता वा विच्छिति युक्त उक्ति नै वक्रोक्ति हो ।

